अर्हम् ॥

श्रीनेमि-विज्ञान-कस्तूर-यशोभद्रसूरिसद्गुरुवरेभ्यो नमः ॥

## कलिकालसर्वज्ञ-श्रीहेमचन्द्राचार्यविरचितस्य

# त्रिषष्टिशलाकापुरुषचरितस्य-गद्यात्मकसारोद्धारः

**४**

## षष्ठं सप्तमं च पर्व


कर्ता - आ. श्रीविजयशुभङ्करसूरिः

सम्पादकः - मुनिधर्मकीर्तिविजयः





: प्रकाशक :

कलिकालसर्वज्ञ-श्रीहेमचन्द्राचार्यनवमजन्मशताब्दी-स्मृति-शिक्षणसंस्कारनिधिः

अमदावाद

कलिकालसर्वज्ञ-श्रीहेमचन्द्राचार्यविरचितस्य
**त्रिषष्टिशलाकापुरुषचरितस्य**
**गद्यात्मकसारोद्धारः ४**
**( षष्ठं सप्तमं च पर्व )**
Trishashti-Shalakaa-Purusha-Charitam

**© सर्वेऽधिकाराः स्वायत्ताः**

**कर्ता : आ. श्रीविजयशुभङ्करसूरिः**
**सम्पादकः : मुनिधर्मकीर्तिविजयः**
**प्रकाशकः : कलिकालसर्वज्ञ-श्रीहेमचन्द्राचार्यनवमजन्मशताब्दी-स्मृति-शिक्षणसंस्कारनिधिः - अमदावाद**

**द्वितीयसंस्करणम् : वि.सं. २०६८ ई०सं० २०१२**
**प्रतयः : ५००**
**मूल्यम् : रू. १२५-००**
**पृष्ठानि : १८ + २३४ = २५२**
**प्राप्तिस्थानम् : १ श्रीविजयनेमिसूरीश्वरजी जैन स्वाध्याय मन्दिर**
१२, भगतबाग,
आणन्दजी कल्याणजीनी पेढी समीपे,
नवा शारदामन्दिर रोड, पालडी, अमदावाद - ३८०००७.
फोन : २६६२२४६५
दूरभाष : ०९८०८६३७७१४

**२ सरस्वती पुस्तक भण्डार**
११२, हाथीखाना, रतनपोल, अमदावाद-३८०००१.
फोन : २५३५६६९२

**मुद्रणम् : किरीट ग्राफीक्स**
४१६, वृन्दावन शोपींग सेन्टर, रतनपोळ, अमदावाद.
दूरभाष : ०९८९८४९००९१



# समर्पणम्

बालानामिव माता च सरितामिव सागरः ।
दुर्बलानामनाथानां कृते चैकाश्रयास्पद ! ॥ १ ॥

निगूढमन्त्र-तन्त्रज्ञ ! ज्योतिर्विज्ञानकोविद ! ।
मुनिसंमेलनस्तम्भ ! शासनोद्योततत्पर ! ॥ २ ॥

प्रबलसत्त्वसंपन्न ! शिष्योत्थाने कृतोद्यम ! ।
लब्धनन्दनसूर्याशीः ! प्रवचनकलाधर ! ॥ ३ ॥

शुद्धचारित्रसंनिष्ठ ! सर्वसूरिशिरोमणे ! ।
तथा वात्सल्यपाथोधे ! निर्मलब्रह्मपालक ! ॥ ४ ॥

सूर्यसदृशतेजस्विन् ! मृगेशोपमनिर्भय ! ।
चन्द्रसंकाशसंदीप्त ! रत्नाकरगभीर ! च ॥ ५ ॥

सदाग्रह्यपि सत्ये हि सदा निराग्रहिन् ! मुदा ।
स्व-परमोहदुर्भेद-ग्रन्थिविच्छेदकृत् ! खलु ॥ ६ ॥

नेमि- विज्ञान- कस्तूर- यशोभद्र- शुभङ्कराः ।
सूरीशा गुरवो यस्य प्रबलमहिमान्विताः ॥ ७ ॥

पठन-पाठनप्राण ! सेवातत्पर ! साधुराट् ! ।
औदार्यादिगुणोपेत ! **सूर्योदयगुरो** ! अहो ॥ ८ ॥

ज्ञानादिकं मयाऽवाप्तं प्रभावेण प्रभो ! तव ।
सर्वं पुण्यस्मृतौ तत्ते त्वदीयं तुभ्यमर्पये ॥ ९ ॥

**– धर्मकीर्तिविजयः**

# प्रकाशकीय निवेदन

कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्यनी नवमी जन्मशताब्दी (वि.सं. ११४५-२०४५)ना मंगल अवसरे पूज्य आचार्यश्रीविजय-सूर्योदयसूरीश्वरजी तथा पूज्य आचार्यश्रीविजयशीलचन्द्रसूरीश्वरजीनी शुभप्रेरणाथी अमारा आ ट्रस्टनी स्थापना थई हती. प्राचीन ग्रन्थोनुं संशोधन-सम्पादनपूर्वक प्रकाशन, अनेक विद्वज्जनोनुं सन्मान, 'अनुसंधान'नामनी शोधपत्रिकानुं प्रकाशन-इत्यादि साहित्यिक प्रवृत्तिओ आ ट्रस्टनो मुख्य उद्देश छे.

ते अनुसार कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्यनी नवमी सूरिपद शताब्दी (वि.सं. ११६६-२०६६)ना उपलक्ष्यमां तेओना द्वारा विरचित त्रिषष्टिशलाकापुरुषचरितनो पूज्य आ.श्रीविजयशुभंकरसूरिजी रचित गद्यात्मकसारोद्धार प्रगट करतां अमो आनन्द अनुभवीए छीए.

आ गद्यात्मकसारोद्धारनी रचना पूज्य आ.श्रीविजयशुभंकरसूरिजीए पूर्वे वि.सं. २०१६ना वर्षे करी हती. आजे ५० वर्ष पछी पूज्यश्री विजयसूर्योदयसूरीश्वरजीना शिष्य मुनिश्रीधर्मकीर्तिविजयजी द्वारा पुनः सम्पादित-संशोधित करेल आ ग्रन्थना प्रकाशननो लाभ अमारा ट्रस्टने मल्यो, ते बदल अमो तेओना ऋणी छीए.

लि.

वि. सं. २०६७

**कलिकालसर्वज्ञ-श्रीहेमचन्द्राचार्य**
**नवमजन्मशताब्दीस्मृति-**
**शिक्षणसंस्कारनिधिः**
**अमदावाद.**



# किञ्चित् प्रास्ताविकम्

सुविदितमेवेदं विदुषां यत् कलिकालसर्वज्ञेतिबिरुदधारिणा परमविदुषा जैनाचार्येण श्रीमता हेमचन्द्राचार्येण भगवता गूर्जरनरेशद्वयं सिद्धराजजयसिंह-कुमारपालचौलुक्येति संज्ञं प्रतिबोधितं; गूर्जरराष्ट्रे सुविशालेऽमारिः प्रवर्तिता; अनेकशतसङ्ख्या जिनालया निर्मापिताः; सोमनाथमहादेवाभिधशिव-तीर्थस्योद्धारकार्ये राजा प्रेरितस्तत्तीर्थपुनःस्थापनावसरे स्वयमुपस्थितं च। युगप्रभावकेनाऽनेन सूरिपादेन सर्वजनताया हितकराणि मूक-पशूनामभयदानि जैनधर्मस्योद्योतकारीणि च नैकानि महान्ति कार्याणि यथा कृतानि, तथैव तेन भगवता नानाविधशास्त्रनिर्माणकार्यमपि विद्वश्चेतश्चमत्कृतिकारकं विहितमेव ।

तद्विरचितेषु ग्रन्थेषु सिद्धहेमचन्द्राभिधं शब्दानुशासनं, काव्यानुशासनं, छन्दोनुशासनं, लिङ्गानुशासनं, वादानुशासनं, शब्दकोषद्वयं, संस्कृतद्व्याश्रय-महाकाव्यं प्राकृतद्व्याश्रयकाव्यं, स्तुतिकाव्यानि, योगशास्त्रम्-इत्यादयो ग्रन्थाः प्रमुखाः प्रसिद्धाश्च विद्याक्षेत्रे ।

तद्विरचित एको महान् ग्रन्थोऽयमप्यस्ति-त्रिषष्टिशलाकापुरुषचरितमहा-काव्यम् । प्रायः ३६०००श्लोकमितो ग्रन्थोऽयं जैनपुराणप्रबन्धसन्निभो महाकाव्यलक्षणोपेतश्च । ग्रन्थेऽत्र जैनधर्मस्वीकृततीर्थङ्कर-चक्रवर्ति-वासुदेव-बलदेव-नारदादीनां शलाकापुरुषाणां चरितवर्णनं विशदं विहितमस्ति । जैनसंघे एतदध्ययनाध्यापनप्रचारोऽविरतं बहुशतवर्षेभ्यः प्रचलति ।

संस्कृताध्ययनकर्तॄणां विद्यार्थिनां बोधवैशद्यार्थमेतस्य काव्यग्रन्थस्या-ऽध्ययनं नितरामावश्यकम् । जैनसिद्धान्तानां सुखबोधार्थं जैनेतिहासस्य च ज्ञानार्थमप्येतदध्ययनमतीवोपयोगि । परन्तु महाकाव्यस्याऽस्याऽध्ययने सर्वे जना न समर्था भवेयुः । मन्दबोधानां सारल्योत्सुकानां चाऽभ्यासिनामेतस्या-ऽध्ययनं बहुधा दुरूहमपि स्यादेव । एतादृग्जनान् मनसि निधाय आचार्य-पादश्रीविजयशुभङ्करसूरिवर्येण ग्रन्थस्यैतस्य सरलीकरणाय तदर्थं चाऽस्य

पद्यात्मकं महाकाव्यप्रौढिसमलङ्कृतं च स्वरूपं गद्यात्मकं वर्णनादिबाहुल्य-मुक्तं च निर्मितं कृपापरीतचेतसाऽस्मत्प्रगुरुवरेण ।

ग्रन्थोऽयं पञ्चाशद्वर्षेभ्यः पूर्वं मुद्रित आसीत् । परमस्य न सञ्जातस्तादृक् प्रचारो येन सर्वेऽभ्यासोत्सुका जना लाभान्विताः स्युः । सम्प्रति चाऽप्राप्योऽयं ग्रन्थः । अतः श्रीहेमचन्द्राचार्यपादानां सूरिपदनवमशताब्द्या वर्षं वि.सं. २०६६तमं यदाऽऽगतं तदा तेषां स्मरणाञ्जलिरूपेण ग्रन्थोऽयं पुनः सम्पादन-विषयीकृत्य मुद्रापणीय इति सङ्कल्प उदितोऽस्मश्चित्ते । साधवः प्रेरिता एतदर्थम् । पूज्यपादश्रीगुरुभगवद्भिः श्रीविजयसूर्योदयसूरिभिरपि सानन्द-मनुज्ञातमेतदर्थे । ततो मुनिश्रीधर्मकीर्तिविजयेन सम्भालितमेतत्कार्यम् । तस्य भक्तिभावितमानसस्य परिश्रम इदानीं फलान्यावहतीति महानानन्दविषयः ।

ग्रन्थोऽयं संस्कृताभ्यासिनां यथोपकारकः, तथैव जैनधर्मविषयकं सम्यग् ज्ञानं प्राप्तुमिच्छुकानां जिनादिमहापुरुषचरितानां जिज्ञासूनां च कृतेऽपि नितान्त-मुपयोगी स्यादेवेति निश्चप्रचम् ।

ग्रन्थसम्पादनकार्ये यदि काऽपि स्खलनाऽस्ति तदर्थमस्माकं प्रमाद एवोपालम्भार्हः । श्रीहेमचन्द्राचार्यभगवतां गद्यात्मकसारोद्धारकर्तृणां चाऽऽशयतो विपरीतं चेत् किमप्यागतं स्यादत्र, तदर्थं मिथ्यादुष्कृतं दत्त्वा क्षमाप्रार्थिनो वयमिति शम् ।

सं. २०६७

आश्विन शुदि-१, सुरेन्द्रनगरे — **शीलचन्द्रविजयः**

• • •



# विषयानुक्रमः

## षष्ठं पर्व

### प्रथमः सर्गः ( श्रीकुन्थुजिनचरितम् )


| विषयः | पृ. |
|---|---|
| सिंहावहनृपवृत्तान्तः | १ |
| कुन्थुजिनजन्म | २ |
| कुन्थुजिनस्य चक्रित्वाभिषेकः | २ |
| कुन्थुजिनस्य दीक्षाग्रहणम् | ३ |
| कुन्थुप्रभोः केवलोत्पत्तिर्देशना च | ३ |
| शासनदेवतयोः कुन्थुजिनसन्निधानम् | ५ |
| कुन्थुप्रभोः परिवारेयत्ताकथनम् | ५ |
| कुन्थुप्रभोर्निर्वाणम् | ५ |


### द्वितीयः सर्गः ( श्रीअरनाथचरितम् )


| | |
|---|---|
| धनपतिमुनेस्तीर्थकृन्नामकर्मोपार्जनम् | ६ |
| अरजिनस्य जन्मारभ्य दीक्षान्तवृत्तान्तः | ७ |
| अरनाथस्य केवलोत्पत्तिर्देशना च | ८ |
| शासनदेवतयोः प्रभुसन्निधानम् | ९ |
| कुम्भगणधरात् सागरदत्तस्य जामातृविषयः प्रश्नः | ९ |
| वीरभद्रस्य गृहान्निष्क्रमणम् | १० |
| वीरभद्रस्य शङ्खश्रेष्ठिगृहवासः | ११ |
| अनङ्गसुन्दर्या वीरभद्रेऽनुरागः | १२ |
| रत्नाकरनृपस्य पुत्रीविवाहचिन्ता | १३ |
| वीरभद्रस्याऽनङ्गसुन्दर्या परिणयः | १४ |
| अनङ्गसुन्दर्या सुव्रतोपाश्रयप्राप्तिः | १५ |
| वीरभद्रस्य रत्नप्रभया विवाहस्तस्याः सुव्रतोपाश्रयप्राप्तिश्च | १६ |
| वामनवीरभद्रस्य प्राप्तिर्भार्याभिस्संगमश्च | १८ |
| वीरभद्रस्य प्राग्भवः | १८ |

विषयः — पृ.

अरजिनस्य परिवारः ............ १९
अरजिनस्य निर्वाणम् ............ १९

**तृतीयः सर्गः ( श्रीआनन्दपुरुष-पुण्डरीक-बलिचरितम् )**

प्रियमित्रनृपस्य देवत्वम् ............ २०
आनन्दपुरुष-पुण्डरीकयोर्बलदेव-वासुदेवयोर्जन्म पुरुषपुण्डरीकेण बलिवधश्च ............ २०

**चतुर्थः सर्गः ( श्रीसुभूमचक्रवर्तिचरितम् )**

भूपालनृपस्य देवभवाप्तिः ............ २२
अग्निकस्य जमदग्निनाम्ना ख्यातिः ............ २२
वैश्वानर-धन्वन्तरिदेवतयोर्विवादः ............ २२
वैश्वानर-धन्वन्तरिदेवाभ्यां पद्मरथ-जमदग्न्योः परीक्षणम् ............ २३
जमदग्निना जितशत्रुकन्या कुब्जीकरणम् ............ २४
जमदग्ने रेणुकया विवाहः ............ २४
परशुराम-कृतवीर्ययोर्जन्म ............ २५
परशुरामेण रेणुका-ऽनन्तवीर्ययोर्वधः कृतवीर्येण जमदग्निवधः परशुरामेण कृतवीर्यवधश्च ............ २५
सुभूमचक्रिजन्म ............ २६
परशुरामेण सत्रागारनिर्माणम् ............ २६
सुभूमेन परशुरामवधः ............ २७

**पञ्चमः सर्गः ( श्रीदत्त-नन्दन-प्रह्लादचरितम् )**

वसुन्धरनृपस्य देवलोकाप्तिः ............ २८
प्रतिविष्णोः प्रह्लादस्य जन्म ............ २८
नन्दन-दत्तयोर्बलदेव-वासुदेवयोर्जन्म ............ २८
दत्तेन प्रह्लादवधः ............ २९

**षष्ठः सर्गः ( श्रीमल्लिनाथचरितम् )**

बलनृपस्य मोक्षः महाबलस्य राज्याभिषेकस्तन्मित्राणि च ............ ३०
महाबलस्य समित्रस्य प्रव्रज्या देवत्वं च मल्लिप्रभोर्जन्म ............ ३१



विषयः — पृ.

प्रतिबुद्धिनृपस्य कुम्भनृपान्तिके दूतप्रेषणम् ............ ३२
मल्लिप्रभोरर्हन्नयद्वारादिव्यकुण्डलद्वयप्राप्तिश्चन्द्रच्छायस्य कुम्भनृपं प्रति दूतप्रेषणं च ............ ३२
चन्द्रच्छायस्य कुम्भं प्रति दूतप्रेषणम् ............ ३३
रुक्मिनृपस्य कुम्भं प्रति दूतप्रेषणम् ............ ३३
मल्लेन चित्रकरकरकर्त्तनमदीनशत्रुनृपस्य कुम्भं प्रति दूतप्रेषणं च ............ ३३
चोक्षापरिव्राजिकाया मल्ल्या पराभवो, जितशत्रोः कुम्भं प्रति दूतप्रेषणं च .. ३४
मल्लेः षण्णां राज्ञां प्रबोधनम् ............ ३५
मल्लेर्नृपप्रबोधाय स्वसुवर्णप्रतिमानिर्मापनम् ............ ३६
मल्लेर्दीक्षाग्रहणं कैवल्यं च ............ ३७
मल्लेर्देशना ............ ३७
मल्लेः शासनदेवते ............ ३८
मल्लेः परिवारः ............ ३९
मल्लेर्निर्वाणम् ............ ३९
मल्लेरायुःकालादि ............ ३९

**सप्तमः सर्गः ( श्रीमुनिसुव्रतनाथचरितम् )**

सुरश्रेष्ठनृपचरितम् ............ ४०
सुमुखनृपस्य वनमालया सुखानुभवः ............ ४१
सुमुख-वनमालयोर्युगलिकभवः ............ ४२
वीरकुविन्दस्य देवत्वं प्राप्य युगलिकपराभवो हरिवंशवर्णनश्च ............ ४२
मुनिसुव्रतस्य जन्मादि ............ ४३
मुनिसुव्रतस्य दीक्षा ............ ४४
मुनिसुव्रतस्य केवलोत्पत्तिर्देशना च ............ ४४
मुनिसुव्रतस्य शासनदेवते ............ ४६
मुनिसुव्रतस्याऽश्वप्रबोधोऽश्वपूर्वभववर्णनं च ............ ४६
कार्तिकश्रेष्ठि-भागवतव्रतयोश्चरितम् ............ ४७
मुनिसुव्रतस्य परिवारो निर्वाणं च ............ ४८
मुनिसुव्रतस्याऽऽयुःकालादि ............ ४८

विषयः | पृ.

**अष्टमः सर्गः ( श्रीमहापद्मचक्रिचरितम् )**


प्रजापालनृपचरितम्....................................................४९
श्रमणेन नमुचिसचिवपराजयः..........................................५०
नमुचिना सिंहलनृपसाधनम्..............................................५०
महापद्मस्य तापसाश्रमगमनम्..........................................५१
महापद्मस्य मदनावल्यामनुरागो, गजसाधनं, कन्याभिः परिणयश्च.........५१
पद्मस्य जयचन्द्रया परिणयः...........................................५३
पद्मस्य चक्रित्वं, मदनावल्या परिणयश्च..............................५४
पद्मोत्तरस्य मुक्तिर्विष्णुकुमारस्य लब्धिप्राप्तिश्च.........................५४
नमुचेः क्रोधः.............................................................५५
विष्णुकुमारस्य नमुचिप्रबोधनम्........................................५६
विष्णुकुमारस्य मोक्षो नमुचिनिगृहश्च..................................५७
पद्मस्य मोक्षः............................................................५७


## सप्तमं पर्व ( जैनरामायण )

**प्रथमः सर्गः**


कीर्तिधवल-देव्योः श्रीकण्ठ-पद्मयोश्च विवाहः, श्रीकण्ठेन
वानराख्यराज्यस्थापनं च................................................५९
श्रीकण्ठस्य मोक्षः.........................................................६१
तडित्केशवृतान्तः..........................................................६१
देव-तडित्केशयोः पूर्वभववृतान्तः तडित्केशघनोदध्योः
परमपदप्राप्तिश्च...........................................................६२
श्रीमाली-किष्किन्ध्योर्विवाहो विजयसिंहा-ऽन्धकयोर्वधं
निर्घातस्य लङ्कराज्यं चाऽशनिवेगस्य प्रव्रज्या च..........................६२
इन्द्रस्य जन्म राज्यं च...................................................६४
मालीन्द्रयोर्युद्धं मालिवधो वैश्रमणस्य राज्यं च..........................६५
रत्नश्रवसो विद्यासाधनं कैकस्या परिणयश्च................................६५
दशमुख-कुम्भकर्ण-विभीषणानां जन्म......................................६६




विषयः | पृ.

**द्वितीयः सर्गः**


मात्रा रावणस्य स्वपूर्वपुरीहरणकथनम्....................................६८
रावणादीनां विद्यासाधननिश्चयश्च..........................................६९
रावणादीनां विद्यासाधनम्.................................................६९
रावणेन चन्द्रहासासिसाधनम्...............................................७१
रावण-मन्दोदर्योर्विवाहः....................................................७१
रावणस्य पद्मावत्यादिषट्सहस्रकन्यकापरिणयनम्..........................७१
कुम्भकर्ण-विभीषणयोर्विवाहः..............................................७२
मन्दोदर्या इन्द्रजिन्मेघवाहननामपुत्रद्वयम्.................................७२
रावणेन लङ्काजयो वैश्रमणस्य प्रव्रज्या च................................७३
रावणस्य भुवनालङ्कारगजप्राप्तिश्च..........................................७४
रावणेन यमनृपगृहगमनम्...................................................७४
वालिनो राज्यं, सुग्रीवस्य यौवराज्यं च....................................७५
खर-चन्द्रणखयोर्विवाहो विराधजन्म च.....................................७५
वालि-रावणयोर्युद्धं, रावणपराजयः, सुग्रीवस्य राज्यं, वालिनः
प्रव्रज्या च...................................................................७६
रावण-श्रीप्रभयोर्विवाहः....................................................७८
रावणस्य वालिकृतो मानभङ्गो, रावणस्य तत्क्षमापनं
रावणाय धरणेन्द्रकृतवरप्रदानं, रत्नावलीपरिणयश्च.......................७८
वालिनः कैवल्यं मोक्षश्च, साहसगतेर्विद्यासाधनार्थ-
गमनं, तारा-सुग्रीवयोर्विवाहादिकं च......................................८०
रावण-सहस्रांशुयुद्धं, सहस्रांशोरनरण्यनृपस्य च प्रव्रज्या...................८२
नारदप्रेरितरावणाज्ञया मरुत्तनृपस्य क्रतुत्यागः............................८३
अभिचन्द्रस्य क्षीरकदम्बस्य च प्रव्रज्या, नारद-पर्वतक-
वसूनामध्ययनादिवृत्तान्तश्च..................................................८४
वसोराकाशस्फटिकवेद्यादिवृत्तान्तः..........................................८६
नारद-पर्वतकयोरजपदार्थविवादः............................................८६
वसुसाक्ष्येण नारदस्य वादे पराजयो, वसोर्नरकप्राप्तिश्च.....................८७

**विषयः** **पृ.**

वसुपुत्राणां केषाञ्चित् देवताभिर्वधोऽन्येषामन्यत्र गमनं च ........ ८८
सगरेण कूटेन परिणयनम् ........ ८८
पर्वत-शाण्डिल्ययोर्लोकवञ्चनम् ........ ८९
पर्वतस्याऽसुरसहायेनाऽसदुपदेशादिना लोके यज्ञप्रवर्त्तनम् ........ ९०
असुरेण सुलसा-सगरयोर्विनाशः ........ ९०
नारदजन्मादिवृत्तान्तो, रावणेन कनकप्रभापरिणयनं च ........ ९१
सुमित्र-प्रभव-मधु-चमरेन्द्राणां कथा ........ ९१
नलकुबरेण कुम्भकर्णादिपराजयः ........ ९३
रावणेन नलकुबरनिग्रहः ........ ९४
रावणेनेन्द्रनृपनिग्रहः ........ ९५
सहस्रारप्रार्थनयेन्द्रस्य रावणान्मुक्तिः ........ ९५
इन्द्रस्य पराजयहेतुः पूर्वभववृत्तान्तो मोक्षश्च ........ ९६

**तृतीयः सर्गः**

पवनञ्जयाऽञ्जनासुन्दर्योर्जन्मादिवृत्तान्तः ........ ९८
पवनञ्जयाऽञ्जनासुन्दर्योर्विवाहनिश्चयः ........ ९८
पवनञ्जयाऽञ्जनासुन्दर्योर्विवाहः ........ ९९
रावणेनाऽऽहूतस्य प्रस्थितस्य पवनञ्जयस्य चिरात्त्यक्ताञ्जनासमागमः .... १०१
अञ्जनाया गर्भधारणं, निर्वासनं, वने मुनिप्राप्तिश्च ........ १०२
अञ्जनापूर्वभववृत्तान्तः ........ १०४
अञ्जनायाः सिंहात् त्राणम् ........ १०५
हनुमतो जन्मवृत्तान्तः ........ १०५
हनुमतः श्रीशैलनामकरणम् ........ १०६
पवनवेगस्याऽञ्जनान्वेषणं, चिताप्रवेशाद्वारेणाऽञ्जना-
समागमो, हनुमतो यौवनं च ........ १०६
रावणेन वरुणपराजयः ........ १०८

**चतुर्थः सर्गः**

वज्रब्राहोः प्रव्रज्या ........ १०९
कीर्तिधरस्य प्रव्रज्या ........ ११०





**विषयः** **पृ.**

सुकोशलस्य प्रव्रज्या ........ ११०
कीर्तिधर-सुकोशलयोर्मुक्तिः ........ १११
सोदासजन्म, मांसभक्षणप्रवृत्तिः, श्रावकत्वं च ........ ११२
सोदासवंशवर्णने दशरथवृत्तान्तः ........ ११२
दशरथ-कैकेयोर्विवाहः ........ ११३
दशरथस्य रावणप्रेरितविभीषणात् त्राणम् ........ ११३
रामादीनां जन्म ........ ११५
भामण्डलजन्मादिवृत्तान्तः ........ ११७
रामस्याऽयोध्यागमनं, राम-सीतयोर्विवाहश्च ........ ११९
सीतापमानीतनारदप्रेरितेन चन्द्रगतिना जनकनिग्रहः ........ ११९
राम-सीतादीनां धनुर्भङ्गादिनां विवाहवृत्तान्तः ........ १२०
दशरथस्य वैराग्यम् ........ १२२
सत्यभूतिमुनिना भामण्डलवृत्तान्तकथनम् ........ १२२
दशरथपूर्वभववृत्तान्तः ........ १२३
रामादीनां वनगमनवृत्तान्तः ........ १२४
भरतेन प्रार्थितस्याऽपि रामस्य वनादपरावृत्तिः ........ १२८

**पञ्चमः सर्गः**

वज्रकर्णस्याऽभिग्रहग्रहणवृत्तान्तः ........ १३०
वज्रकर्णे सिंहोदरकोपः ........ १३१
सिंहोदरेण वज्रकर्णपुररोधः ........ १३१
लक्ष्मणेन सिंहोदरनिग्रहः, कन्याशतत्रयपरिणयनं च ........ १३२
पुंवेषकल्याणमालावृत्तान्तः ........ १३३
लक्ष्मणेन काकम्लेच्छनिग्रहो, वालिखिल्यमोचनं च ........ १३४
लक्ष्मणेन द्विजनिग्रहः ........ १३६
गोकर्णयक्षनिर्मितपुरे रामादीनां निवासः ........ १३६
रामस्य कपिलानुग्रहः, कपिलस्य प्रव्रज्या च ........ १३७
वर्षापगमे रामादीनां प्रस्थानम् ........ १३८
लक्ष्मणेन वनमालात्राणम् ........ १३८

विषयः पृ.

रामादीनां वनमालापितृगृहगमनं ................................ १३९
अतिवीर्येण रामादीनां युद्धे लक्ष्मणेनाऽतिवीर्य-
पराजयोऽतिवीर्यस्य प्रव्रज्या च ................................ १४०
वनमालया लक्ष्मणस्य शपथग्रहणम् ................................ १४१
जितपद्मया सह लक्ष्मणस्य विवाहः ................................ १४२
वंशशैलपर्वते मुनिद्वयस्य कैवल्योत्पत्तिः ................................ १४३
उपसर्गकारणे कुलभूषणमुनिकथितो निजवृत्तान्तः ................................ १४३
जटायुवृत्तान्तस्तत्सम्बन्धे च स्कन्दकमुनिवृत्तान्तः ................................ १४६
लक्ष्मणेन शम्बूकवधः ................................ १४९
चन्द्रणखाया राम-लक्ष्मणयोर्विवाहप्रार्थनं, ताभ्यां कृतो निषेधश्च ................................ १५०
तया खरादिभ्यः पुत्रवधकथनं, तेषां च युद्धार्थमागमनम् ................................ १५०
सिंहनादकरणेन रावणेन सीतापहरणम् ................................ १५१
सीताविलापश्रवणेनाऽऽगतस्य रत्नजटिनो विद्यानाशनम् ................................ १५१
रावणेन सीताप्रार्थनम् ................................ १५२


## षष्ठः सर्गः


रामस्य लक्ष्मणेन पुनः प्रेषणम् ................................ १५३
लक्ष्मणकृतस्त्रिशिरसो वधः ................................ १५३
रामस्य मूर्च्छनम् ................................ १५४
विराधसेवकैः सीताशोधनं निष्फलता च ................................ १५५
साहसगतिना प्रतारणीविद्यासाधनं, सुग्रीवरूपं
धृत्वा तदन्तःपुरप्रवेशनं च ................................ १५५
सत्य-विटसुग्रीवयोर्युद्धम् ................................ १५६
साहसगतेः वधः ................................ १५७
चन्द्रणखाविलापो, रावणदत्तमाश्वासनं च ................................ १५८
मन्दोदर्याः सीताकृतस्तिरस्कारः ................................ १५८
रावणप्रतिबोधने विभीषणस्य नैष्फल्यम् ................................ १५९
सुग्रीवस्य रत्नजटिद्वारा सीताशुद्धिः ................................ १६०
साभिज्ञानदानं हनूमतो लङ्काप्रेषणम् ................................ १६०





विषयः पृ.

हनूमता महेन्द्रपुरि मातामह-मातुलाभ्यां युद्धं जयश्च ................................ १६१
हनूमता लङ्काप्राकारभञ्जनम् ................................ १६२
सीतापार्श्वे गत्वा रामाङ्गुलीयकपातनम् ................................ १६२
हनूमता सीतायै रामसन्देशकथनम् ................................ १६३
हनूमता कृतं देवरमणोद्यानभञ्जनम् ................................ १६४
इन्द्रजिता हनूमतो बन्धनम् ................................ १६४
हनूमता रावणमुकुटभञ्जनं लङ्काभञ्जनं च ................................ १६५


## सप्तमः सर्गः


रामादीनां लङ्काविजयाय प्रयाणम् ................................ १६६
विभीषणेन सीतामोक्षाय रावणस्य बोधनं, क्रुद्धेन च
रावणेन तस्य निर्वासनम् ................................ १६६
विभीषणस्य रामशरणगमनम् ................................ १६७
राम-रावणसैन्ययोर्युद्धम् ................................ १६८
रावणस्य रणप्रवेशः ................................ १६९
सुग्रीव-भामण्डलयोर्बन्धनम् ................................ १७०
राम-लक्ष्मणाभ्यां महालोचनदेवस्मरणम् ................................ १७१
सुग्रीव-भामण्डलयोर्नागपाशतो मोचनम् ................................ १७१
रावण-विभीषणयोर्युद्धम् ................................ १७२
इन्द्रजित्-कुम्भकर्णयोर्बन्धनम् ................................ १७२
रावणेन सह रामस्य युद्धं रावणस्य च लङ्कागमनम् ................................ १७३
लक्ष्मणस्य प्रतिजागरणोपायस्य चिन्तनम् ................................ १७३
विद्याधरोक्तो विशल्यास्नपनोदकसेचनरूपो लक्ष्मणत्राणोपायः ................................ १७४
विशल्यास्पर्शेन लक्ष्मणदेहतः शक्तिनिर्गमनम् ................................ १७५
बन्धुवर्गविमोचनार्थं रावणेन दूतप्रेषणम् ................................ १७६
रावणस्य बहुरूपाविद्यासाधनम् ................................ १७७
अङ्गदकृतोपसर्गेऽपि रावणस्य निश्चलत्वम् ................................ १७७
सीताया अनशनाभिग्रहणम् ................................ १७८

**विषयः** **पृ.**

युद्धे रावणेन चक्रमोचनम् ........ १७८
लक्ष्मणकृतो रावणवधः ........ १७८

**अष्टमः सर्गः**

राक्षसानां रामशरणगमनम् ........ १७९
विभीषणाद्यैः रावणाङ्गसंस्करणम् ........ १७९
इन्द्रजिदादीनां पूर्वभवव्यतिकरकथनम् ........ १७९
कुम्भकर्णादीनां दीक्षा ........ १८०
सीतामेलनम् ........ १८०
विभीषणस्य राज्याभिषेकः ........ १८१
राम-लक्ष्मणमातृभ्यां नारदाय स्वदुःखनिवेदनम् ........ १८१
रामस्याऽयोध्यागमनोत्साहः ........ १८२
अयोध्यायां महोत्सवः ........ १८३
मुनिकथितो भरतस्य हस्तिनश्च पूर्ववृत्तान्तः ........ १८४
भरतस्य कैकेय्याश्च दीक्षा मोक्षश्च ........ १८६
राम-लक्ष्मणयोर्बलदेवत्व-वासुदेवत्वाभिषेकः ........ १८६
शत्रुघ्नस्य मथुराराज्येच्छा युक्तिपूर्वं च मथुरेशस्य पराभवो वधश्च ...... १८६
शत्रुघ्नस्य मथुराया आग्रहित्वे मुनिकथितः पूर्वभववृत्तान्तः ........ १८८
महर्षीणां प्रभावतो देवकृतरोगादीनां शान्तिः ........ १९०
राम-लक्ष्मणयोः पट्टमहिष्यादिपरिवारः ........ १९१
सीतायाः स्वप्नदर्शनं गर्भधारणं च ........ १९१
सीतादूषितत्वम् ........ १९२
रामस्य निशाभ्रमणं जनवादश्रवणं च ........ १९३
अरण्ये सीतात्यागः ........ १९३
रामकृते सीताप्रदत्तः सन्देशः ........ १९४

**नवमः सर्गः**

अरण्ये सीतया सैन्यदर्शनम् ........ १९५
वज्रजङ्घनृपेण तस्याः स्वगृहे नयनम् ........ १९५
सीतासन्देशं श्रुत्वा रामस्य विलापः ........ १९६



**विषयः** **पृ.**

अनङ्गलवण-मदनाङ्कुशयोर्जन्म ........ १९६
लवणस्य विविधकन्याभिः परिणयः ........ १९७
अङ्कुशविवाहनिमित्तं पृथुनृपेण युद्धम् ........ १९७
लवणा-ऽङ्कुशयोरयोध्यां प्रति प्रयाणमयोध्यापुरीरोधनं च ........ १९८
भामण्डलस्य सीतापार्श्वे गमनम् ........ १९९
लवणा-ऽङ्कुशाभ्यां राम-लक्ष्मणयोर्युद्धायाऽऽह्वानं च ........ १९९
लक्ष्मणस्य मूर्च्छा ........ २००
लक्ष्मणेनाऽङ्कुशोपरि चक्रमोचनम् ........ २००
नारदेन पुत्रद्वयवृत्तान्तकथनम् ........ २००
सपुत्रस्य रामस्याऽयोध्याप्रवेशः ........ २०१
रामस्य सीताशुद्ध्यर्थं दिव्यकरणस्याऽऽग्रहः ........ २०१
सुग्रीवाद्यैः सीतानयनम् ........ २०२
सीतया दिव्यपञ्चस्वीकरणं, रामस्य चाऽग्निप्रवेशाज्ञा ........ २०२
सीतासान्निध्यार्थमिन्द्रस्य स्वसेनाधिपतये आज्ञा ........ २०३
सीताया अग्निप्रवेशः ........ २०३
सीताशीलप्रभावादग्निविध्यापनम् ........ २०३
सीतायाः दीक्षा ........ २०४

**दशमः सर्गः**

रामस्य विह्वलता ........ २०५
देशनान्ते रामस्य निजभव्यत्वे प्रश्न उत्तरश्च ........ २०५
रावण-विभीषणादीनां पूर्वभववृत्तान्तः ........ २०५
रामादीनां सीतायै वन्दनम् ........ २१०
सीताया अच्युतेन्द्रत्वम् ........ २१०
लवणा-ऽङ्कुशाभ्यां लक्ष्मणपुत्राणां प्रतिबोधनं, तेषां च दीक्षा ........ २१०
हनूमतो दीक्षा मोक्षश्च ........ २११
लक्ष्मणस्य परीक्षणं लक्ष्मणमृतिश्च ........ २११
लवणा-ऽङ्कुशयोर्दीक्षा मोक्षश्च ........ २१२
रामस्याऽसमञ्जसचेष्टितं, देवद्वयेन च प्रतिबोधनम् ........ २१२

**विषयः** **पृ.**

राम-शत्रुघ्नादीनां दीक्षा ........ २१३
रामस्याऽवधिज्ञानोत्पत्तिः ........ २१३
रामस्याऽभिग्रहः ........ २१४
सीतेन्द्रकृत उपसर्गः ........ २१४
रामस्य केवलज्ञानोत्पत्तिः ........ २१५
रामेण रावण-लक्ष्मणयोर्गतिविषयककथनम् ........ २१५
सीतेन्द्रेण नरकभूमिं गत्वा प्रतिबोधनम् ........ २१६
रामस्य मोक्षः ........ २१७

**एकादशः सर्गः**

नमिनाथभगवतः पूर्वजन्मसम्बन्धः ........ २१८
नमिनाथस्य जन्म ........ २१८
प्रभोर्जन्मोत्सवो नामस्थापनं च ........ २१९
भगवतो राज्याभिषेकः ........ २१९
भगवतो वार्षिकदानं दीक्षा च ........ २१९
प्रभोर्धर्मदेशना गणधरस्थापना च ........ २२०
शासनदेवतयोः प्रभोः परिवारस्य च वर्णनम् ........ २२१
प्रभोर्निर्वाणम् ........ २२२

**द्वादशः सर्गः**

हरिषेणचक्रिणः पूर्वभवसम्बन्धः ........ २२३
चक्रिजन्म ........ २२३
चक्ररत्नोत्पत्तिः षट्खण्डसाधना च ........ २२३
चक्रिणो दीक्षा मोक्षश्च ........ २२४

**त्रयोदशः सर्गः**

जयचक्रिणः पूर्वभवसम्बन्धः ........ २२५
जयचक्रिणो जन्म ........ २२५
चक्ररत्नोत्पत्तिः षट्खण्डसाधना च ........ २२५
जयचक्रिणो दीक्षा मोक्षश्च ........ २२६
कठिनशब्दार्थः ........ २२७

• • •

॥ अर्हम् ॥

॥ श्रीनेमि-विज्ञान-कस्तूर-यशोभद्रसूरिसद्गुरुवरेभ्यो नमः ॥

# त्रिषष्टिशलाकापुरुषचरितम्-

## गद्यात्मकसारोद्धारः

### श्रीकुन्थुनाथ-अरनाथादिचरितप्रतिबद्धं

## षष्ठं पर्व

## श्रीकुन्थुजिनचरितम्

## प्रथमः सर्गः

**चक्री च धर्मचक्री च श्री-शूरतनयो जिनः ।**
**मनःशुद्ध्या श्रियो वृद्ध्यै कुन्थुर्हृदि निधीयते ॥१॥**

अथाऽस्यैव **जम्बूद्वीप**स्य **प्राग्विदेहे**षु **आवर्त्त**नाम्नि विजये **खड्गि**नाम्न्यां महापूर्यां सकलगुणभाजनं धर्मधुरन्धरो नीतिपरायणः **सिंहावहो** नाम नृपो बभूव । सोऽनासक्त्या भोगान् भुञ्जानः कमपि कालं गमयित्वा सातिशयवैराग्यः **संवरा**चार्यपादान्ते दीक्षामग्रहीत् । तीव्रं व्रतं पालयंश्चाऽर्हदाराधनादिभिः स्थानकैस्तीर्थकृन्नाम-कर्मोपार्जयत् । कालयोगेन विपद्य च **सर्वार्थसिद्धे** विमाने महर्द्धिकः सुरोऽभवत् ।

इतश्चाऽस्यैव **जम्बूद्वीप**स्य **भारत**क्षेत्रे चैत्य-प्रासादादिसुशोभिते **हस्तिनापुरे** पुरे तेजसा शूर इव **शूरो** नाम नृपो बभूव । दया-दाक्षिण्यादिगुणालङ्कृतस्य तस्य रूप-लावण्यसमन्विता शीलवती

**श्री**नाम्नी पत्न्यभूत् । तस्याश्च कुक्षौ **सर्वार्थसिद्ध**तस्त्रयस्त्रिंशत्सागरोपममायुः पूरयित्वा **सिंहावह**जीवस्ततश्च्युत्वा श्रावणकृष्णनवम्यां कृत्तिकास्थे चन्द्रेऽवातरत् । तदानीं च निशाशेषे सुखसुप्ता **श्रीदेवी** गजादींश्चतुर्दश महास्वप्नानपश्यत् । तया च प्रमुदितया कथितस्य स्वप्नस्य 'तव पुत्रश्चक्री तीर्थकृच्च भावी'ति फलं नृपोऽकथयत् । ततः पूर्णे समये सा देवी शुभे लग्ने वैशाखकृष्णचतुर्दश्यां कृत्तिकास्थे चन्द्रे सर्वलक्षणसम्पूर्णं छागाङ्कं काञ्चनवर्णं सुतं सुषुवे ।

ततः षट्पञ्चाशद्दिक्कुमार्य्यस्तदानीं सूतिकागृहमेत्य यथाविधि सूतिकर्म चक्रुः । शक्रश्च समेत्य प्रभुं **मेरुं** नीत्वा तत्र सर्वैरिन्द्रैर्देवादिभिश्च समं स्नात्रं विधाय भक्त्या स्तुत्वा च पुनः प्रभुमादाय **हस्तिनापुर**मेत्य **श्री**देव्याः पार्श्वतोऽमुञ्चत् । **शूर**नृपश्च प्रभाते पुत्रजन्मोत्सवं चकार । अस्मिन् गर्भस्थे जनन्या 'कुन्थ्वाख्यो रत्नसञ्चयो दृष्ट' इति स्वामिनः **कुन्थु**रित्याख्यां चकार । प्रभुश्च शक्रसंक्रमितामृताङ्गुष्ठं पिबन् वर्धमानः पञ्चत्रिंशद्धनून्नतो यौवनं प्रपेदे। काले च पित्राज्ञया कर्मफलस्याऽवश्यभोक्तव्यतया राजकन्यकाः परिणिन्ये । जन्मतश्चाऽब्दानां त्रयोविंशतिसहस्रेषु सार्धाष्टमशतेषु गतेषु पित्राज्ञया राज्यमग्रहीत् ।

माण्डलिकस्थितौ तावत्सु सहस्रेषु गतेषु च भर्तुरस्त्रागारे चक्ररत्नं समुदपद्यत । ततः प्रभुश्चक्रपूजां विधिवद् विधाय चक्रानुगो **मागधेशं वरदाम-प्रभासेशौ** च क्रमेण साधयित्वा **सिन्धु**देवीं **वैताढ्या**द्रिकुमारं **कृतमाल**देवं च स्वयं सेनान्या च **सिन्धुनिष्कुटं** च साधयित्वा सेनान्योद्घाटितद्वारां **तमिस्रा**गुहां प्राविशत् । ततो निर्गत्य चाऽऽ**पाता**ख्यम्लेच्छान् साधयित्वा सेनान्या च द्वितीयं **सिन्धुनिष्कुटं** साधयित्वा ततः स्थानाद् ववले चक्रानुगः । ततो



**वैताढ्य**मुपेत्य तच्छ्रेणिद्वयवर्त्तिनां विद्याधरेन्द्राणामुपायनानि पूजाश्च स्वीकृत्य स्वयं **गङ्गा**देवीं **नाट्यमालं** च सेनान्या म्लेच्छसङ्कुलं **गङ्गानिष्कुटं** चाऽसाधयत् । सेनान्योद्घाटितद्वारां **खण्डप्रपाता**गुहां प्रविश्य ततो निर्गत्य च सपरिच्छदो **वैताढ्याद्** निर्गच्छन् **गङ्गा**मुखनिवासिनः स्वयं सिद्धान् **नैसर्प**प्रमुखान् नवनिधीन् धारयत् । ततः सेनान्या द्वितीयं **गङ्गानिष्कुटं** साधयित्वा सम्पूर्णचक्रभृद् नरा-ऽमरनिषेवितो **हस्तिनापुर**माययौ। तत्र च प्रभोर्देवैर्नरेन्द्रैश्च चक्रवर्तित्वाभिषेकश्चक्रे । तदानीं च द्वादशाब्दीं यावत् तस्मिन् पुरे महोत्सवः समजायत। तदेवं **कुन्थु**प्रभोश्चक्रित्वेऽपि वर्षाणां त्रयोविंशतिसहस्राणि सार्धाष्टमशतानि व्यतीयुः।

❀ ❀ ❀

ततो **लोकान्तिका**मरैस्तीर्थप्रवर्त्तनाय प्रार्थितो राज्यं पुत्राय दत्त्वा वार्षिकदानं प्रददौ । देवैर्नृपैश्च कृतनिष्क्रमणोत्सवो विभु**र्विजया**ख्यां शिबिकामारूढः **सहस्राम्र**वणमुपेत्य शिबिकायाः समुत्तीर्य त्यक्तालङ्कारादिर्वैशाखकृष्णपञ्चम्यां कृत्तिकास्थे चन्द्रेऽपराह्णे कृतषष्ठो नृपसहस्रेण समं प्रवव्राज । तदानीमेव च प्रभोश्चतुर्थज्ञानमुत्पेदे । द्वितीयेऽह्नि च **चक्र**पुरे **व्याघ्रसिंह**नृपगृहे परमान्नेन पारणं व्यधात् । तत्र च देवैर्वसुधारादिपञ्चकं **व्याघ्रसिंह**नृपेण च प्रभुपादस्थाने रत्नपीठं च विदधे। प्रभुश्च निःसङ्गश्छद्मस्थः षोडश वर्षाणि वसुन्धरां विजहार ।

अथैकदा प्रभुर्विहरन् **सहस्राम्र**वणमागत्य कृतषष्ठ**स्तिलक**द्रौ प्रतिमाधरस्तस्थौ । ततः प्रभोश्चैत्रशुक्लतृतीयायां कृत्तिकास्थे चन्द्रे घातिकर्मक्षयात् केवलं सञ्जज्ञे । सेन्द्रैश्च देवैस्तदानीमागत्य तत्क्षणं कृते प्राकारादिसमन्विते समवसरणे पूर्वद्वारेण प्रविश्य प्रभुर्विंशत्यग्र-

चतुर्धन्वशतोच्चं चैत्यपादपं प्रदक्षिणीकृत्य यथोपचारं रत्नसिंहासनं पूर्वाभिमुखोऽधितष्ठौ । सुरादयश्च सर्वे यथोपचारं यथाविधि यथास्थानं निविविशिरे । प्रभुं समवसृतं ज्ञात्वा **कुरु**नृपश्चाऽप्यागत्य प्रभुं नमस्कृत्याऽनुशक्रं कृताञ्जलिर्निषसाद । ततः शक्र-**कुरु**राजयोः स्तुत्वा विरतयोः सतोः श्री**कुन्थुनाथो** धर्मदेशनां विदधे-

"अयं भवाम्भोधिर्योनिलक्षचतुरशीत्यावर्तभीषणो महादुःख-निबन्धनम् । अस्य तरणे चेन्द्रियोर्मिजयोर्जिता मनःशुद्धिरेव यानपात्रम् । सा हि ज्वलन्ती दीपिकेव निर्वाणपथप्रदर्शिनी । तस्यां हि सत्यां सर्वे गुणाः सन्ति । तस्यामसत्यां च केऽपि गुणा न सन्त्येव । अतो बुधैः सैव कार्या । मनःशुद्धिं विहाय मुक्तये तपश्चरणं नावं विहाय भुजाभ्यां समुद्रतरणवद् ज्ञेयम् । अन्धस्य दर्पण इव मनःशुद्धिं विना ध्यानं मुधा। चञ्चलं चेतो हि मुक्तये तप्यमानान् देहिनो वात्येवाऽन्यत्र कुत्रचित् क्षिपति । मनोराक्षसो हि जगत्रयीं संसारावर्तगर्ते पातयति । मनोवृत्तिनिरोधे कर्माणि निरुध्यन्ते । तदनिरोधे च तानि प्रसरन्ति । तस्माद् मुक्तिमिच्छता मनःशुद्धिरवश्यं विधेया । अन्यथा तपः-श्रुतादयः कायक्लेशमात्र-फला एव भवन्ति । राग-द्वेषजयश्च मनशुद्ध्यैव कर्त्तव्यः । येनाऽऽत्मा कालुष्यं हित्वा स्वस्वरूपेऽवतिष्ठते"।

एवं प्रभोर्देशनां श्रुत्वा प्रबुद्धा बहवो जनाः प्राव्रजन् । **स्वयम्भू**-प्रमुखाः पञ्चत्रिंशच्च गणधरा अभूवन् । प्रथमपौरुष्यां व्यतीतायां प्रभौ देशनाविरते **स्वयम्भू**र्गणधरः स्वामिपादपीठस्थो देशनाम-करोत् । सोऽपि द्वितीयपौरुष्यां व्यतीतायां देशनां पारितवान् । ततः सुरादयः प्रभुं नत्वा स्वं स्वं स्थानमगुः ।

❀ ❀ ❀



तत्तीर्थे समुत्पन्ने च हंसरथः कृष्णवर्णो दक्षिणाभ्यां बाहुभ्यां वरद-पाशधरो वामाभ्यां च मातुलिङ्ग-ऽङ्कुशधरो **गन्धर्व**यक्षः, केकिवाहना गौराङ्गी दक्षिणाभ्यां बाहुभ्यां बीजपूर-शूलधरा वामाभ्यां च मुषण्ढी-पङ्कजधरा **बलादेवी** च शासनदेवते प्रभोः सदा सन्निहिते अभूताम् ।

ततोऽन्यतो विहरतः प्रभोः परिवारे च साधूनां षष्टिसहस्री, साध्वीनां सषट्शती षष्टिसहस्री, चतुर्दशपूर्वभृतां सप्तत्यधिकषट्शती, अवधिज्ञानिनां च सार्धं सहस्रद्वितयं, मनःपर्ययिणां चत्वारिंश-दधिका त्रयस्त्रिंशच्छती, केवलिनां त्रीणि सहस्राणि शतद्वयं च, वैक्रियलब्धिमतां शतान्येकपञ्चाशच्च, जातवादलब्धीनां सहस्रद्वितयं, श्रावकाणां न्यूनाशीतिसहस्रयुग् लक्षमेकं, श्राविकाणां त्रीणि लक्षा-ण्येकाशीतिसहस्री चाऽभवन् ।

केवलात् त्रयोविंशत्यब्दसहस्रेषु चतुस्त्रिंशत्सहितेषु सप्तसु शतेषु गतेषु निर्वाणसमयं ज्ञात्वा **सम्मेता**द्रिमुपेत्य प्रभुर्मुनिसहस्रेण सममनशनं प्रपन्नवान् । मासान्ते च वैशाखकृष्णप्रतिपत्तिथौ कृत्तिकास्थे चन्द्रे प्रभुस्तैर्मुनिभिः सममव्ययं पदं प्राप । तदेवं प्रभोः कौमार-राज्य-चक्रवर्तित्व-व्रतेषु समभागकं पञ्चनवत्यब्दसहस्रमायुर-भवत् । श्री**शान्ति**जिननिर्वाणादर्धपल्योपमे गते श्री**कुन्थुनाथ**-जिननिर्वाणमभूत् । सदेवैर्देवेन्द्रैश्च प्रभोर्निर्वाणमहिमा विदधे । प्रभोर्दंष्ट्रादि च पूजयितुं यथावद् निजनिजगृहेषु निन्ये ॥१॥

*इति श्रीकुन्थुनाथचरितवर्णनात्मकः प्रथमः सर्गः ॥१॥*

## द्वितीयः सर्गः

### श्रीअरनाथजिनचरितम्

**देवी-सुदर्शनानन्दवर्धनोऽरो जिनेश्वरः ।**
**सुदर्शनप्रदः पायादपायाद्वः सुदर्शनः ॥१॥**

अथाऽस्यैव **जम्बूद्वीप**स्य **प्राग्विदेहे**षु **सीता**नद्या उत्तरतटे **वत्सा**ख्ये विजये **सुसीमा**नाम्न्यां महापुर्यां शूरो यशोधनो **धनपति**-र्नाम नृपोऽभवत् । स तथा मेदिनीं शशास यथा तद्राज्ये कस्याऽपि बन्धन-ताडनादि नाऽभूत् । जिनोक्तधर्मप्रणयी स विरक्तः **संवर**-मुनेरन्तिके प्राव्राजीत् । स च तीव्रं व्रतं पालयन् तपांसि तप्यमानो विविधाभिग्रहपरो महीं विजहार । चातुर्मासिकोपवासान्तपारणे च तं महामुनिं श्रेष्ठिपुत्रो **जिनदासः** श्रद्धया प्रत्यलाभयत् । तथा स **धनपति**र्मुनिरर्हदाराधनादिस्थानकैस्तीर्थकृन्नामकर्माऽऽर्जयत् । समा-हितमनाश्च कालेन विपद्य नवम**ग्रैवेयके** महर्द्धिकोऽमरोऽभवत् ।

इतश्चाऽस्यैव **जम्बूद्वीप**स्य **भारते** क्षेत्रे सर्वसम्पत्समन्विते परिखादिशोभिते हेम-स्फटिकादिचैत्यैर्विराजिते **हस्तिनापुरे** पुरे धर्मिष्ठः प्रतापी सुदर्शनः **सुदर्शनो** नाम नृपप्रष्ठो बभूव । तस्य चाऽन्तःपुर-शिरोरत्नं **देवी** नाम महादेव्यासीत् । पतिव्रतया शीलगुणसम्पन्नया तया सह भोगान् भुञ्जानः स नृपः कियन्तं कालं व्यतीयाय । तस्याश्च **देवी**देव्याः कुक्षौ **धनपति**जीवो निजमायुः पूरयित्वा **ग्रैवेयका**-च्च्युत्वा फाल्गुनशुक्लद्वितीयायां रेवतीस्थे चन्द्रेऽवातरत् । तदानीं सा



महादेवी सुखसुप्ता निशाशेषे तीर्थकृज्जन्मसूचकांश्चतुर्दश महास्वप्नान् ददर्श । पूर्णे च समये सा मार्गशीर्षशुक्लदशम्यां रेवतीस्थे चन्द्रे कनकवर्णं नन्द्यावर्त्ताङ्कं सम्पूर्णलक्षणं सुतमसूत ।

ततः षट्पञ्चाशद्दिक्कुमार्यः समेत्य यथाविधि सूतिकर्म चक्रुः । शक्रश्च प्रभुं **मेरौ** नीत्वा तत्र सर्वैरिन्द्रादिभिः सह यथाकल्पं स्नात्रादि विधाय स्तुत्वा पुन**र्देवी**स्वामिन्याः पार्श्वतोऽमुचत् । **सुदर्शनो** नृपश्च समहोत्सवं तस्य **देव्याः** स्वप्नेऽरदर्शना**दर** इति नाम चक्रे । स चाऽ**रः** सुरस्त्रीभिर्धात्रीभिर्लाल्यमानः क्रमाद् वर्धमानो बाल्यमतीत्य यौवनं प्रपन्नस्त्रिंशद्धनुःसमुन्नतः पित्राज्ञया राजकन्याः परिणिनाय । तथा जन्मतोऽब्दसहस्राणां विंशतौ गतायां पित्राज्ञया राज्यधुरां दधार । ततः प्रभोर्माण्डलिकत्वेऽपि तावति काले गते शस्त्रागारे चक्ररत्नं समुत्पन्नम् । अन्यैश्चाऽपि त्रयोदशभिः सद्रत्नैः समन्वितः प्रभुश्चक्रानुगश्चतुर्वर्षशत्या **भरत**क्षेत्रं षट्खण्डमसाधयत् ।

चक्रिणश्च तस्य प्रभोस्तावत्येव काले गते च **लोकान्तिका**मरैः समेत्य तीर्थं प्रवर्तयेत्यूचे । ततः प्रभुर्वार्षिकदानं प्रदायाऽ**रविन्दा**य सुताय राज्यं दत्त्वा **वैजयन्त्या** शिबिकया **सहस्राम्र**वणं प्राप्य मार्गशीर्षैकादशीदिने शुक्लपक्षे रेवतीस्थे चन्द्रेऽपराह्णे कृतषष्ठो राजसहस्रेण समं प्राव्राजीत्। द्वितीयेऽह्नि च **राजपुरे**ऽ**पराजित**नृपगृहे परमान्नेन पारणं चकार । तत्र च देवैर्वसुधारादिपञ्चकं नृपेण च प्रभुपादस्थाने रत्नपीठं विदधे । ततः प्रभुर्विविधाभिग्रहपरश्छद्म-स्थस्त्रीणि वर्षाणि यावद्वसुन्धरां विजहार ।

❀ ❀ ❀

अथाऽन्येद्युर्विहरन् **सहस्राम्र**वणमेत्य सहकारतरोर्मूले प्रतिमया प्रभुरस्थात् । कार्तिकशुक्लद्वादश्यां रेवतीस्थे चन्द्रे च घातिकर्म-

क्षयात् प्रभोः केवलमुत्पन्नम् । सद्यश्च देवैर्विहिते समवसरणे यथाकल्पं प्रविश्य षष्ट्यग्रधनुस्त्रिशत्युन्नतं चैत्यवृक्षं प्रदक्षिणीकृत्य प्रभुः प्राङ्मुखो रत्नसिंहासने समुपाविशत् । ततो देवादिषु यथास्थान-मुपविष्टेषु शक्रा-ऽ**रविन्दा**भ्यां स्तुतः प्रभुर्धर्मदेशनां प्रारेभे-

'चतुर्वर्गेष्वेकान्तसुखसागरो मोक्षः प्रधानम् । तत्र साधकतमं ध्यानं, तच्च मनसोऽधीनम् । मनश्चाऽऽत्माधीनमपि कुर्वतां योगिनां रागादिभिः समाक्रम्य परायत्तं विधीयते । रागाद्याः पिशाचा इव मनागपि मिषं प्राप्य रक्ष्यमाणमपि मानसं मुहुर्मुहुश्छलयन्ति । तथा रागादिविलुप्तज्ञानेन मनसा जनोऽन्धेनाऽन्ध इव नरकगर्ते पात्यते । रागश्च द्रव्यादिषु रति-प्रीती । तेष्वेवाऽरत्यप्रीती च द्वेषः । एतावुभौ दृढतरौ सर्वप्राणिनां बन्धने सर्वदुःखवृक्षाणां मूलकन्दौ च । यदि राग-द्वेषौ न स्यातां तर्हि सुखे को विस्मयेत दुःखे कः कृपणो भवेत् मोक्षं को वा नाऽऽप्नुयात् ? राग-द्वेषयोश्च परस्परमविनाभावित्वम्। तयोरेकतरत्यागे द्वयमपि त्यक्तं भवति । कामादयश्च रागस्य सेवकाः, मिथ्याभिमानप्रमुखाश्च द्वेषस्य । तयोश्च मोहः पिता । एवमेते त्रय एव दोषाः, तैश्च जन्तवो भववारिधौ भ्रम्यन्ते ।

जीवः स्वभावतः स्फटिकवद् निर्मलः एतैरुपाधिभूतैस्ता-दात्म्येनाऽवभासते । एतैर्हि दोषैर्जीवानां स्वरूपं ज्ञानमेव ह्रियते । निगोदादित आरभ्याऽसन्नमुक्तिजीवपर्यन्तमेतेषां प्रसरः । एतैश्च वैरादिव मुक्त्या मुमुक्षुयोगः प्रतिषिध्यते। मुनिर्व्याधादिभ्योऽपि तथा न बिभेति यथा रागादिभ्यः । योगिनां वर्त्म हि पार्श्वस्थाभ्यां राग-द्वेषाभ्यामतिसंकटम् । अतो मुमुक्षुभिरनलसैः समतया राग-द्वेषजयो विधातव्यः' ।

प्रभोरेवं देशनया प्रबुद्धा बहवो जनाः प्राव्रजन् । **कुम्भा**दयस्त्रयस्त्रिंशद् गणभृतश्च जज्ञिरे । प्रथमपौरुष्यां पूर्णायां प्रभौ



देशनाविरते द्वितीयपौरुष्यां पूर्णायां च **कुम्भे** गणधरे देशनाविरते शक्राद्याः प्रभुं नत्वा स्वं स्वं स्थानं ययुः ।

तत्तीर्थे समुत्पन्ने च श्यामवर्णस्त्र्यक्षः शङ्खरथो दक्षिणैः षड्भिर्भुजैर्मातुलिङ्ग-बाण-खड्ग-मुद्गर-पाशा-ऽभयधरो वामैश्च नकुला-ऽसि-चर्म-शूला-ऽङ्कुशा-ऽक्षसूत्रधरो **यक्षेन्द्रः**, नीलाङ्गी कमलासना दक्षिणाभ्यां बाहुभ्यां मातुलिङ्गोत्पलधरा वामाभ्यां च पद्मा-ऽक्षसूत्रधरा **धारिणी** नाम देवी च - शासनदेवते **अरनाथ**-प्रभोः सदा सन्निहिते अभूताम् ।

❋ ❋ ❋

अथाऽन्यदा प्रभुर्मेदिनीं विहरन् **पद्मिनीखण्ड**पत्तने सम-वासार्षीत् । तत्राऽपि च देशनां कृत्वा विरते प्रभौ **कुम्भे** गणधरे च संशयच्छिदं देशनां कृत्वा विरते एको वामनोऽभ्येत्य धर्मं श्रोतुमुपाविशत् । ततः श्रेष्ठी **सागरदत्तः कुम्भं** गणधरं नत्वाऽब्रवीत् - 'भगवन् ! भविनः सर्वे भवप्रकृत्या दुःखिनः । तेष्वहं विशेष-तो दुःखितोऽस्मि, यतो मम सुखलेशोऽपि नाऽस्ति । **जिनमत्यां** भार्यायां मे नामतः **प्रियदर्शना** रूपवती दुहितोत्पन्ना । कलाकुशला च सा यौवनं प्रपेदे । तस्या अनुरूपं वरमपश्यन् दुःखितो **जिनमत्या** किं चिन्तामाप्नोसीति पृष्टश्चिन्ताकारणमकथयम् । ततस्तयोक्तम् - 'श्रेष्ठिन् ! त्वया श्रेष्ठो वरो ग्राह्यः, येनाऽऽवयोरनुतापो न भवेत्' । मयोक्तं-'भाग्याधीनमेतत्, सर्वेऽपि हि स्वहितमिच्छन्ति' । तामेव-मुक्त्वा विपणौ गच्छन् **ताम्रलिप्त्याः** पुर्याः समागत**मृषभदत्त**-सार्थवाहमद्राक्षम् । तेन सह च साधर्मिकत्वात् सस्नेहाः पूर्वसुहृदेव वाणिज्यादिवार्ताः समभूवन् ।

एकदा च स मम गृहमागतः **प्रियदर्शनां** सुचिरमद्राक्षीत् । कस्य कन्येयमिति पृष्टोऽहं 'ममेयं, केन हेतुना त्वया सुचिरं वीक्ष्यते'

इत्यब्रवम् । सोऽवोचत्-''श्रेष्ठिन् ! **वीरभद्र**नामा सम्प्राप्तयौवनो रूपवान् कविर्ज्ञानी सङ्गीतादिकलाकुशलो गुटिकादिप्रयोगतः कामरूपी चाऽस्ति । तस्याऽनुरूपेयं कन्यका दृश्यते' । मयाऽप्युक्तं-'ममैषा कन्यका कलाकुशला, अस्या अनुरूपवरार्थं चिराच्चिन्ताग्रस्तोऽस्मि । दैवानुकूल्यात् तदयं सङ्गम आवयोः, तद्द्वयोस्तनयौ वधू-वरत्वेन घटेताम्' ।

ततः सहृष्टो निजां पुरीं गत्वा महत्या जन्ययात्रया **वीरभद्रं** प्राहिणोत् । स च मम कन्यां परिणीय कतिचिदहानि स्थित्वा सदारः स्वपुरीं ययौ । अन्यदा चाऽश्रौषं यद् **वीरभद्रो** निशाशेषे मम तनयां सुप्तां मुक्त्वैकाकी क्वचिदप्यगात् । सम्प्रति च कोऽपि वामन-स्तत्प्रवृत्तिमानैषीत् , किन्तु स व्यक्तं नाऽऽख्याति । ततः प्रभो ! स्फुटमाख्याहि' ।

एवं **सागरदत्ते**न विज्ञप्तः **कुम्भो** गणधरः प्राह- 'तस्यां रात्रौ तव जामातैवमचिन्तयत्-यत् कलाकुशलो यन्त्रनिपुणः सिद्धमन्त्रो ज्ञातदिव्यगुटिकाप्रयोगः सर्वविज्ञानपटुश्चाऽस्मि । किन्त्वप्रकाशनात् सर्वमपि निरर्थकम् । इह च गुरुलज्जया नियन्त्रितोऽस्मि । इह कूपमण्डूकवत् तिष्ठन् कापुरुषोऽस्मि । तदन्यदेशेषु गत्वा निजान् गुणान् प्रकाशयामि' । एवं विचिन्त्य समुत्थाय भूयः सोऽचिन्तयत्-यदि मम प्रिया कृतकसुप्ता, तर्हि सा गतिविघ्नाय भवेत्' । ततः स कामक्रीडाकृते तां समुदस्थापयत् ।

सोवाच-शिरोर्तिर्मां बाधते, ततः किं कदर्थयसि । कस्य दोषेण तव शिरोर्तिरिति तेन पृष्टा सा त्वद्दोषेणेति जगाद । ततः कीदृशेन दोषेणेति पुनस्तेन पृष्टा सा-अत्राऽपि समये यत्तव वैदग्ध्यवाक्, तेनैवेत्युदतरत् । ततः सोऽवोचत्-मा कुपः, पुनर्नेदृशं करिष्ये' । तां साभिप्रायमेवमुक्त्वाऽधिकं रमयामास । साऽपि



रतिश्रान्ता तां वक्रोक्तिमजानती सुखमस्वाप्सीत् । ततस्तां सत्यसुप्तेति मुक्त्वा **वीरभद्रो** निजाद् गृहाद् निर्जगाम । तथा स गुटिकाप्रयोगेण स्वं श्यामवर्णं चकार । तथा स्वकलापाटवं दर्शयन् ग्राम-पुरादिषु विद्याधर इव स्वैरमभ्राम्यत् । सा **प्रियदर्शना** च श्वसुरावापृच्छ्य पितृगृहमगात् ।

**वीरभद्र**श्चैकदाऽटन् **सिंहलद्वीपे रत्नाकरा**ख्यनृपाधिष्ठितं **रत्नपुरं** नाम पुरमगात् । तत्र **शङ्ख**स्य श्रेष्ठिनो हट्टे निषण्णस्तेन कुत आगत इति पृष्ट**स्ताम्रलिप्त्याः** स्ववेश्मतो रुषित्वा निःसृतो भ्रमन्निहाऽऽगममित्यवोचत् । ततः **शङ्खो**ऽवोचत्-त्वया न साधुकृतं, तदेवं वक्रमपि कर्म दैवेन सरलीकृतं, यदक्षताङ्गो मम सन्निधावत्राऽऽगाः । एवमुक्त्वा तं स्वगृहं नीत्वा स्नान-भोजनादि कारयित्वा सस्नेहमुवाच-'ममाऽनुत्पन्नपुत्रस्य त्वमेव पुत्रः, तत्स्वामी भूत्वा मद्विभवमुपभुङ्क्ष्व, दानधर्मादिकं कुरुष्व च । मद्दृशोः प्रीतिं कुरुष्व । धनं हि सुलभं, किन्तु तद्वोक्ता सुतो दुर्लभः' । ततो **वीरभद्रो**ऽपि सविनयमुवाच-'पितुर्गेहाद् निष्क्रान्तोऽपि पितुर्गेह एवाऽहमागमम् । तवाऽऽज्ञावशंवदोऽस्मि, तथा सर्वदा तव शिष्योऽस्मि । अहं तव धर्मपुत्रोऽस्मि' । ततः **शङ्ख**स्य श्रेष्ठिनो गृहे पौरान् कलाकौशलैर्विस्मापयन् सुखमस्थात् ।

तत्र च **रत्नाकर**नृपस्य विश्वसुन्दरी पुरुषद्वेषिण्य**नङ्गसुन्दरी** नाम सुताऽऽसीत् । **शङ्ख**श्रेष्ठिसुता च **विनयवती** नाम तस्याः पार्श्वे प्रतिदिनं याति स्म । सैकदा क्व यासीति **वीरभद्रे**ण पृष्टा यथातथमाख्यत् । सा ते सखी कैर्विनोदैः कालं गमयतीति तेन पृष्टा सा वीणाद्यैरित्यवोचत् । ततोऽहमपि यास्यामीति तेनोक्ता सा-तत्र पुंसो बालकस्याऽपि न प्रवेशः, तव कुत इत्युक्तो वधूरूपं विधाय यास्मामीत्यभिधाय स स्त्रीवेषमासाद्य तया सममगात् । **अनङ्ग-**

**सुन्दर्या** च केयमिति पृष्टा सा **विनयवती** मत्स्वसेति जगाद । तदा च तयाऽ**नङ्गसुन्दर्या** फलके विरहार्ता हंसी लेखितुमुपचक्रमे । ततस्तां **वीरभद्र** ऊचे- त्वया विरहपीडितेयं लेखितुमारेभे, किन्तु दृष्ट्यादि न तादृशम्' । ततस्त्वमालिखेत्युक्त्वा सा तस्मै फलकमर्पयत् । **वीरभद्रो**ऽपि तादृशीं हंसीं लिखित्वा तस्यै समर्पयामास। सा च तन्निरूप्याऽब्रवीत्-अहो ! अन्तर्भावप्रकाशकमालेख्यनैपुण्यम् । ईदृशी कलाविदियत्कालं किं नाऽऽनीता ?

ततो **वीरभद्रो**ऽवोचत्-गुरूणामभिशङ्कया नाऽहमिहाऽऽनीता, अन्यत् किमपि कारणं न । ततस्तया प्रत्यहमागन्तव्यमित्यूचे, नाम च पृष्टम् । **वीरभद्र**श्च झटिति **वीरमती**ति स्वं नामोक्तवान् । ततोऽन्या अपि कला वेत्सि किमिति तया भूयः पृष्टा **विनयवत्यु**वाच-'स्वयमचिराज्ज्ञास्यसि' । तत एवमस्त्वित्युक्त्वाऽ**नङ्गसुन्दरी** सत्कृत्य तदन्वितां **विनयवतीं** विससर्ज । ततो **वीरभद्रो** गृहे वधूवेषं मुक्त्वाऽऽपणे श्रेष्ठिनः पार्श्वे ययौ । श्रेष्ठिना चेयच्चिरं क्वाऽस्था इति पृष्टश्चोद्यानाय गतोऽस्मीत्युदतरत् । तथैव द्वितीयदिनेऽपि स तत्र गतोऽ**नङ्गसुन्दरीं** वीणां वादयन्तीं ददर्श । तदा स उवाच- 'एषा तन्त्री न सुस्वरा, यतोऽस्यां मनुष्यकेशोऽनुस्यूतोऽस्ति' । त्वया कथं ज्ञायत इति तया पृष्टश्च- 'त्वदुपक्रान्तरागनिर्वाहं दृष्ट्वा ज्ञायत' इत्युक्तवान् ।

ततश्च स तयाऽर्पितां वल्लकीं तत्क्षणमुत्कीलयामास । तन्मध्याच्च मनुष्यकेशमाकृष्य तस्या विस्मयमादधद् दर्शयामास । तथा तत्तन्त्रीं भूयः सज्जयित्वा वादयंश्च श्रवणामृतं रागं प्रपञ्चयामास । तत्कौशलेन च साऽ**नङ्गसुन्दरी** सा पर्षच्चाऽतिविस्मिता जाता । तद्वीणागीतमाकर्ण्य च राजकन्या तस्मिन् नितरां सस्नेहा जाता । स च **वीरभद्र**स्तामवसरप्राप्तमन्यास्वपि कलासु प्रावीण्यं



दर्शयामास । ततः स्वानुरक्तां तां ज्ञात्वाऽन्यदा रहसि **शङ्ख**मवोचत्-'तात ! **विनयवत्याः** पृष्ठतो युवतिवेषं विधाय प्रत्यहमह**मनङ्गसुन्दर्याः** पार्श्वे गच्छामि । तद्युष्माभिर्न भेतव्यम् । अहं तथा करिष्यामि, यथा न कोऽप्यनर्थो भवेत् । प्रत्युत गौरवमेव भवेत् । यदि नृपो मह्यं निजां कन्यां दातुं वः प्रार्थयते, तदा भवताऽऽदौ नाऽनुमन्तव्यम् । ततः श्रेष्ठ्युवाच-'त्वं विज्ञोऽसि, तथाऽपि स्वकुशलं कार्यमिति ब्रवीमि' । **वीरभद्र** उवाच- 'मा विमना स्म भूः, स्वसूनोः शुभपरिमाणं कौशलमचिरादेव पश्य' । ततस्त्वं वेत्सीत्युक्त्वा श्रेष्ठी मौनं समाश्रयत् ।

तदानीं च **रत्नाकर**नृपसभायां वार्त्ता जाता-'**ताम्रलिप्त्याः** कश्चिद् युवा **शङ्ख**श्रेष्ठिगृहे समागतोऽन्वहं पुरे चित्राभिः कलाभिरचित्रीयत । किन्तु वैदेशिकत्वात् तस्य ज्ञातिर्न ज्ञायते । आकृत्या तु महाकुलोत्पन्न इव प्रतिभाति' । ततो नृपतिश्चिन्तयामास-'अयं युवा चेद् मत्पुत्र्यै रोचते, तदा शोभनम्' ।

एकदा च **वीरभद्रेण** 'भोगसामग्र्यां सत्यामपि किं भोगविमुखाऽसी'ति पृष्टाऽ**नङ्गसुन्दर्य**वोचत्-'भोगाः कस्य न वल्लभाः? किन्त्वनुरूपो वल्लभो दुर्लभः । अनूढा नारी वरं, किन्त्वकुलीनेन पत्या विडम्बिता न । इयत्कालमनुरूपं वरं नाऽद्राक्षम्, अल्पगुणं वरं कृत्वाऽलम्' । ततो **वीरभद्रः** पुनरवोचत्-'ममाऽनुरूपो वरो नाऽस्तीति मा वोचः, यत इयं वसुन्धरा बहुरत्ना । कोऽनुरूपो वरस्तव, तत् कथय, अद्यैवाऽहं तत् सम्पादयामि' । तच्छ्रुत्वाऽ**नङ्गसुन्दर्य**वदत्-'एवमाशाप्रदानतः किं मां कदर्थयसि । अदो मिथ्या वदसि । यदि सत्यं, तर्ह्यनुरूपं वरं दर्शय, येन मम कला-रूप-यौवनादि कृतार्थं भवेत्' । तयेत्थमुक्तो **वीरभद्रः** स्वं रूपमदर्शयत्। ततः सोचे-'अहं त्वदधीनाऽस्मि, त्वं मम पतिः' ।

ततः सोऽवोचत्-'अस्त्वेवं, किन्त्वपवादो मा भूदित्यतः परमिह नाऽऽगमिष्यामि, त्वया नृपो विज्ञाप्यः' । तया तत्स्वीकृते **वीरभद्रो** निजगृहं ययौ । साऽपि जननीमाहूयाऽवोचत्-'मयाऽनुरूपो वरो निरूपितोऽस्ति, **शङ्ख**श्रेष्ठिसूनु**र्वीरभद्रः** कला-रूपादिभिः पूर्णोऽस्ति । अद्यैव तस्मै मां देहि । तातो मदर्थे यथा श्रेष्ठिनं स्वयमर्थयते, तथा कुरु । तच्छ्रुत्वा मुदिता राज्ञी राज्ञे सर्वं वृत्तान्तमवोचत् । ततः प्रसन्नो राजा श्रेष्ठिनमाहूयाऽ**नङ्गसुन्दरी**-**वीरभद्र**योर्विवाहं स्थिरीकृत्य शुभे दिने शुभे लग्ने समहोत्सवं तौ पर्यणाययत् । तयोश्च दिने दिने प्रीतिरवर्धत । **वीरभद्र**श्च जैनं धर्ममुपदिशन् तां श्राविकां व्यधात् । पटेऽर्हत्प्रतिमां चतुर्विधं सङ्घं च स्वयं लिखित्वा तस्यै समार्पयत् ।

अन्यदा च **वीरभद्रो** दध्यौ-'मयि स्निग्धेयमीक्ष्यते, किन्तु प्रकृतिलोलानां स्त्रीणां स्थैर्ये न निश्चयः । अत एतस्या आशयं जानामि' । एवं विमृश्य सोऽ**नङ्गसुन्दरी**मवोचत्-'त्वत्तोऽन्यद् न मे किञ्चित् प्रियतमं, तथाऽप्यहं स्वदेशगमनाय त्वामापृच्छे, चिरं मद्वियोगकदर्थितौ मत्पितरौ गत्वाऽऽश्वासयामि, त्वमिहैव तिष्ठ, अहं द्रुतं भूयोऽप्यागमिष्यामि । त्वां विनाऽहमन्यत्र स्थातुं नेश्वरः ' । तच्छ्रुत्वा म्लानमुखी सोवाच-त्वया साधु जल्पितं, यच्छ्रवणमात्रेण मेऽसवो यियासन्तीव । त्वमीदृशः कठिनचित्तोऽसीत्येवमद्यैव ज्ञातम्'।

ततो **वीरभद्रो**ऽवोचत्-प्रिये ! मा कुपः, त्वां सहैव नेष्यामि'। ततः सोऽ**नङ्गसुन्दर्या** सहैव स्वदेशगमनाय नृपं सनिर्बन्धमपृच्छत् । नृपश्च कथञ्चित् प्रियान्वितं **वीरभद्रं** गमनायाऽनुज्ञातवान् । ततस्तौ पोतारूढौ जलवर्त्मना चेलतुः । पोते च कियन्तमध्वानं गते महा-वायुर्वातुमारब्धवान् । उत्तालतरङ्गवशादुच्छलितश्च पोतस्त्रिवासरीं



भ्रामं भ्रामं ग्रावोपरि प्रस्फुटितवान् । स्फुटिते च पोते तदीयमेकं फलकं सम्प्राप्य पञ्चरात्रेण कथञ्चिदेकं वनाकुलं तटं प्राप । तत्र च मूर्च्छिता साऽ**नङ्गसुन्दरी** केनचित् तापसकुमारेण दृष्ट्वोत्थाप्या-ऽऽश्रमपदं नीता । तत्र 'पुत्रि ! विश्रब्धा तिष्ठे'ति कुलपतिनोक्ता तापसीभिः पाल्यमाना कतिपयैर्दिवसैः स्वस्थाऽजायत । ततः कुलपतिस्तस्या रूपातिशयात् तापसानां समाधिच्छेदशङ्कया तामूचे-'वत्से ! इतोऽदूरत एव **पद्मिनीखण्ड**पत्तनमस्ति । तत्र ते भर्त्रा सह सङ्गमोऽवश्यम्भावी, तज्जरद्भिस्तापसैः सह त्वं तत्रैव गच्छ' । इत्थं कुलपत्याज्ञया सा तापसैः सह तत्पत्तनमगात् । तापसाश्च पुरप्रवेशो नाऽस्माकमर्ह इति प्रोच्य पुराद् बहिस्तां त्यक्त्वा व्यावृत्त्य जग्मुः ।

तत्र सेतस्तत ईक्षमाणा कायचिन्तार्थमायान्तीं **सुव्रता**नाम्नीं व्रतिनीं व्रतिनीभिः समन्वितामपश्यत् । ता दृष्ट्वा च- 'मम पत्या पटे लिखित्वैता दर्शिता' इति स्मृत्वा द्रुतमुपेत्य पूर्वाभ्यस्तेन विधिना **सुव्रतां** व्रतिनीश्च ववन्दे । तथा रचिताञ्जलिः **सिंहलद्वीप**चैत्यानि मद्गिरा वन्दस्वेति तामुवाच च । ततः **सुव्रत**या **सिंहला**त् कथमेकाकिनी निष्परिच्छदा समागताऽसीति पृष्टा सुस्था सर्वं कथयिष्यामीत्युक्त्वा तया सह तस्याः प्रतिश्रयं शीघ्रं जगाम । तत्र च भक्त्या साध्वीर्वन्दमाना सा तव सुतया **प्रियदर्शन**या दृष्ट्वा पृष्टा च **सुव्रता**दर्शनान्तं सर्वमात्मनो वृत्तान्तमचकथत् । ततः **प्रियदर्शन**या सोचे-'सुन्दरि ! मद्भर्तु**र्वीरभद्र**स्य त्वया वर्णितं सर्वं कलादि सम्वादि । किन्त्वेकः श्यामो वर्णो विसम्वदति' । ततो गणिन्या **सुव्रत**या 'इयं **प्रियदर्शना** ते धर्मस्वसेत्यनया सह धर्मानुष्ठानतत्परा तिष्ठे'त्युक्ता तया सह साऽ**नङ्गसुन्दरी** तत्र तस्थौ ।

इतश्च **वीरभद्रो**ऽपि प्रवहणे भग्ने एकस्मिन् फलके लग्नः सप्तमे दिवसे **रतिवल्लभ**नाम्ना विद्याधरेण दृष्टो **वैताढ्य**मूर्ध्नि नीतश्च ।

तथा स्वपत्न्या **मदनमञ्जुका**ख्यायास्तेनाऽपुत्रेण पुत्रत्वेन सोऽर्पितश्च। ताभ्यां पृष्टश्च स **वीरभद्रः** सर्वमात्मनः सकलत्रस्य वृत्तान्तमाख्यत् । ततः स विद्याधर **आभोगिन्या** विद्यया सर्वं ज्ञात्वा तव वल्लभे **अनङ्गसुन्दरी-प्रियदर्शने पद्मिनीखण्डे** पत्तने **सुव्रता**याः प्रतिश्रये धर्मानुष्ठाननिरते भगिन्याविव तिष्ठत इत्युक्तवान् । तयोः पत्न्योश्च कल्याणवार्त्तया सुधया सिक्त इव स श्वसिति स्म । तथा सोऽब्धेरुत्तीर्णमात्र एव श्यामिकाकरीं गुटिकामपनीय सहजं गौरं वर्णमाददे । **रतिवल्लभ**श्च **वज्रवेगवती**कुक्षिभवां निजां कन्यां **रत्नप्रभा**ख्यां तेनोदवाहयत् । स **वीरभद्र**श्च तत्राऽऽत्मीयं **बुद्धदासे**ति नाम कथयंस्तया **रत्नप्रभ**या सह वैषयिकं सुखमन्वभूत् ।

अन्यदा च सम्भूय गच्छतो विद्याधरान् दृष्ट्वा क्वैते वेगेन गच्छन्तीति पृष्ट्या **रत्नप्रभ**याऽत्राऽद्रौ शाश्वतार्हतां यात्रां कर्त्तुमेते प्रयान्तीत्युक्तस्सः । ततस्स तया सह **वैताढ्य**शिखरमारुह्य चैत्यानि भक्त्या वन्दित्वा तया सह विचित्रक्रीडाभिः क्रीडन् रतिसागरमग्नः कियन्तं कालं गमयामास । एकदा च निशाशेषेऽद्य दक्षिणे **भरता**र्धे क्रीडितुं गच्छाम इति प्रियामुक्त्वा तया सह विद्यया **पद्मिनीखण्डे सुव्रता**याः प्रतिश्रयं जग्मतुः । तत्र द्वारि स्थित्वा यावदाचम्याऽऽयामि, तावदत्रैव तिष्ठे'ति **रत्नप्रभा**मुक्त्वाऽल्पां भुवं गत्वा तद्रक्षणकृते तत्रैव निलीय तस्थौ । सा च **रत्नप्रभा** क्षणादूर्ध्वमेकाकिनी तारं रोदितुमारेभे । तत्छुत्वा च गणिनी स्वयं द्वारमुद्घाटयामास, तां ददर्श च । तया च-वत्से ! का त्वं, कुत आगाः, कथमेकाकिन्यसि, कुतश्च हेतो रोदिषी'ति पृष्टा सा '**वैताढ्यात्** पत्या सहेहाऽऽगमं, स चाऽऽचमनाय गतश्चिरयत्येव । स च मुहूर्तमपि मां विना स्थातुं न सहते, तेन सुमहत्कारणमाशङ्के' इत्युवाच ।



ततः सानुकम्पं **सुव्रतो**वाच-'मा स्म भैषीः, यावत् ते पतिरायाति, तावदत्रैव प्रतिश्रये स्वस्था तिष्ठ' । तया चेत्थं बोधिता सा प्रतिश्रयं प्रविवेश । **वीरभद्रो**ऽपि च जायां स्थाने गतां दृष्ट्वा ततोऽपासरत् । ततः स्वेच्छावामनरूपः पुरे पर्यटन् विचित्राः कला दर्शयन् पौराणां मनो जहार । तत्रत्यं राजान**मीशानचन्द्र**मप्यत्यरञ्जयत् । **रत्नप्रभा** चाऽ**नङ्गसुन्दर्या प्रियदर्शन**या च पृष्टा सर्वं स्वपतिवृत्तान्तमकथयत् । ततः **प्रियदर्शन**योचे- 'त्वदुक्तं सर्वं मत्पतिलक्षणं, केवलं **सिंहल**वासित्वं **बुद्धिदासा**भिधा च विसम्वदति' । **अनङ्गसुन्दर्या** चोचे- 'वर्णः **सिंहल**वासिता **बुद्धिदासा**भिधा च मत्पतेर्विसम्वदति' । ततस्तास्तिस्रोऽपि भगिन्य इव तपःस्वाध्यायतत्परास्तत्प्रतिश्रये तिष्ठन्ति स्म । स च मायावामनस्तिस्रोऽपि प्रेयसीस्तत्राऽन्वहं निरीक्षते मोदते च ।

अन्यदे**शानचन्द्र**स्य पर्षदि कथा जाता यत्, **सुव्रता**याः प्रतिश्रये रूपवत्यस्तिस्रो युवतयः सन्ति । ताश्च कोऽपि पुमान् भाषितुं नाऽलम्भूष्णुः । ततः स मायावामन ऊचे- 'अहं क्रमाद् भाषयिष्यामि, मम सामर्थ्यं पश्यत ' । ततः स प्रधानैः कपितयै राजपुरुषैश्च पौरैश्चाऽन्वीयमानो गणिन्याः प्रतिश्रयं प्राप्य द्वारे स्थित्वा सहचरानशाद्—यद् युष्माभिः कामपि कथां कथयेति प्रष्टव्यम्' । ततः स एकाक्येव प्रतिश्रयं प्रविश्य गणिनीर्वन्दित्वा निर्गत्य द्वारमण्डप उपाविशत् । तत्र च तद्दर्शनकौतुकात् तास्तिस्रोऽपि सव्रतिन्यः समाययुः ।

ततः स वामन ऊचे-'यावद् राज्ञो नाऽवसरस्तावदत्रैव स्थास्यामि' । ततो राजपुरुषेण कामपि सकौतुकां कथां शंसेति पृष्टः स्वस्य **प्रियदर्शना**सङ्गमादि **रत्नप्रभ**या सह तत्प्रतिश्रयप्राप्तिपर्यन्तं

सर्वं वृत्तान्तमकथयत् । ताश्च तिस्रोऽप्येकपतिसम्वादादुच्चैरुदश्वसन् । इत्येवमभिधाय गणधरः पुनः प्राह-'श्रेष्ठिन् ! स एष वामनस्तव जामाता, यः क्रीडया तासां तिसृणां विरहं ददौ । तच्छ्रुत्वा वामनो गणधरं वन्दित्वा जगाद-'भवद्भिर्ज्ञानदृशैवमेतद् दृष्टं, नाऽन्यथाऽत्र'। ततो द्वितीयपौरुष्यां पूर्णायां गणधरो देशनां विससर्ज ।

श्रेष्ठी च गणधरं वन्दित्वा मुदितो वामनेन सह प्रतिश्रयमगात्। ताश्च तिस्रो वामनमायान्तं प्रेक्ष्य शीघ्रं तत्रोपाजग्मुः । **सागरदत्त**श्च युष्माकं तिसृणामसौ पतिरित्युक्त्वा सर्वं वृत्तान्तमकथयत् । तेन च गणिन्या सममेव तास्तिस्रोऽपि विस्मयं प्रापुः । सोऽपि च वामनत्वं मुक्त्वा पुरा**ऽनङ्गसुन्दर्या** दृष्टवद् भूत्वा पश्चाद् गौरत्वं प्रत्यपद्यत । ततस्सः सर्वाभिश्च ताभिः सोत्कण्ठाभिः प्रत्यभिज्ञातः समादृतश्च । **सुव्रत**या किमेवं भवता कृतमिति पृष्टश्च क्रीडयेत्यवोचत् । ततः **सुव्रता** पुनरुवाच-'धर्मिणः क्वाऽपि दुःखपदेऽप्यतुलं सौख्यमेव लभन्ते, सत्पात्रदानानुभावात् तेषां सर्वत्र भोगा एव भवन्तीत्यार्हतं वचः, तदनेन कस्मै दत्तमित्**यरजिनं** पृच्छामः' । ततः सा गणिनी **सागरदत्तो वीरभद्रः प्रियदर्शना**दयश्चा**ऽरनाथ**मुपेत्य यथाविधि प्रणेमुः ।

ततो **वीरभद्रः** प्राग्भवे किं व्यधादिति **सुव्रत**या पृष्टो जिनेश्वरो जगाद-'इतस्तृतीये मे भवे राज्यं त्यक्त्वा व्रतं गृहीत्वा विहरतश्चातुर्मासोपवासान्ते **रत्नपुरे** पुरे श्रेष्ठिपुत्रोऽसौ **वीरभद्रो जिनदासा**ख्यो भक्त्या भिक्षां ददौ । तेन पुण्येनाऽसौ **ब्रह्मलोके** देवोऽभूत् । ततश्च्युत्वा **जम्बूद्वीपस्यैरवते** वर्षे **काम्पील्ये** पुरे परमर्द्धिः श्रावकत्वं परिपाल्य मृत्वा**ऽच्युते** कल्पे देवोऽभवत् । पुनस्ततश्च्युत्वा **वीरभद्रो**ऽभूत् । तेन पुण्यानुबन्धिपुण्येनाऽसौ



भोगान् भुङ्क्ते । जिनेश्वर एवमाख्याय बहून् जनान् प्रतिबोध्य विहरन्नन्यतो ययौ । **वीरभद्र**श्च भोगांश्चिरं भुक्त्वा प्रव्रज्य क्रमाद् विपद्य देवलोकं जगाम ।

* * *

**अरजिन**स्य च केवलादारभ्य त्रिवर्षोनाब्दसहस्रैकविंशतिं वसुन्धरां विहरतः परिवारे श्रमणानां पञ्चाशत्सहस्राणि, साध्वीनां षष्टिसहस्री, चतुर्दशपूर्वभृतां दशाग्राणि षट्शतानि, अवधिज्ञानिनां सषट्शते द्वे सहस्रे, मनःपर्ययिणां सार्धे सहस्रे द्वे एकपञ्चाशच्च, केवलिनां साष्टशते द्वे सहस्रे, जातवैक्रियलब्धीनां त्रिसप्ततिशती सञ्जातवादलब्धीनां सहस्रं षट् शतानि च, श्रावकाणामुभे लक्षे षोडशसहस्रोनेः, श्राविकाणां त्रीणि लक्षाणि द्वासप्ततिसहस्री चाऽभवन् ।

अथ निर्वाणकालं ज्ञात्वा प्रभुः **सम्मेता**द्रिमुपेत्य मुनिसहस्रेण सममनशनं प्रपद्य मासान्ते मार्गशीर्षशुक्लदशम्यां रेवतीस्थे चन्द्रे तैर्मुनिभिः सममव्ययं पदं जगाम ।

तदेवं प्रभोः कौमार-राज्य-चक्रवर्तित्व-व्रतेषु चतुरशीत्यब्द-सहस्राण्यायुरभवत् । श्री**कुन्थुनाथ**निर्वाणाच्च वर्षकोटिसहस्रोने पल्योपमचतुर्थांशे गते श्रीमतो**ऽरनाथ**स्य मोक्षोऽभूत् । इन्द्राश्च समेत्य भक्त्या**ऽरनाथ**स्य तैर्मुनिभिः समं शिवमुपेयुषः शरीरसंस्कारपूर्वकं निर्वाणकल्याणकमकार्षुः ॥२॥

*इति श्रीअरनाथचरितवर्णनात्मको द्वितीयः सर्गः ॥२॥*

# तृतीयः सर्गः

## आनन्द-पुरुषपुण्डरीक-बलिचरितम्

अथ **विजयपुरे** पुरे चन्द्र इव सुदर्शनः **सुदर्शनो** नाम नृपो बभूव । स **दमधराद्** मुनेर्धर्मं श्रुत्वा विरक्तः प्रव्रज्य तपस्तप्त्वा **सहस्रारे** कल्पे सुरोऽभवत् । तथा **पोतन**पुरे **प्रियमित्रो** नाम नृपो बभूव । **सुकेतु**श्च तत्प्रियां जहार । तत्पराभवाद् विरक्तः **प्रियमित्रो वसुभूति**मुनेः पार्श्वे प्रव्रज्यामुपादाय दुस्तपं तपस्तपन् पत्न्यपहारकवधं प्रति निदानं चकार । तन्निदानमनालोच्यैव चाऽनशनेन विपद्य **माहेन्द्रे** कल्पे महर्द्धिको देवोऽभवत् ।

इतश्च **वैताढ्य**गिराव**रिञ्जय**पुरे **सुभूम**चक्रिणा प्राप्तश्रेणि-द्वितयवैभवस्तस्यैव चक्रिणः **पद्मश्री**नाम्न्याः पत्न्याः पिता **मेघनाद**-नामा विद्याधरनृपोऽभवत् । **सुकेतो**र्जीवश्च भवं भ्रान्त्वा **मेघनादा**-न्वये **बलिः** प्रतिविष्णुरभवत् । स च पञ्चाशद्वर्षसहस्रायुः कृष्णवर्णः षड्विंशधनूत्तुङ्गस्त्रिखण्डपृथिवीशो जज्ञे ।

अथाऽस्य **जम्बूद्वीप**स्य **दक्षिणभरता**र्धे **चक्रपुरे महाशिरा** इति ख्यातोऽपरो लोकपाल इव भूपालोऽभवत् । तस्य च नृपस्य **वैजयन्ती लक्ष्मीवती** च द्वे पत्न्यावास्ताम् । तत्र **वैजयन्त्या** उदरे **सहस्रारात् सुदर्शन**जीवश्च्युत्वा समवातरत् । बलजन्मसूचकेन महास्वप्नचतुष्टयेन हृष्टा सा देवी गर्भं दधौ । पूर्णे समये च पूर्णचन्द्रमिवाऽमलमेकोनत्रिंशद्धन्वोच्च**मानन्दा**ख्यं सुतमसूत ।



**प्रियमित्र**स्य जीवश्च तुर्यकल्पात् परिच्युत्य **लक्ष्मीवत्याः** कुक्षौ समवतीर्णवान् । विष्णुजन्मसूचकैः सप्तभिर्महास्वप्नैर्हृष्टा सा गर्भं धारयामास । काले चैकोनत्रिंशद्धनून्नतं कृष्णवर्णं **पुरुषपुण्डरीका**ख्यं सुतमसूत । तौ च भ्रातरौ पित्रोर्मनोरथैः सह वर्धमानौ तार्क्ष्य-ताल-ध्वजौ नील-पीताम्बरधरौ समस्तकलाकुशलौ क्रमेण यौवनं प्रपेदाते।

**राजेन्द्रपुर**नृप **उपेन्द्रसेनः पुण्डरीका**य **पद्मावतीं** नाम निजकन्यकां ददौ । तां च रूपवतीं श्रुत्वा प्रतिविष्णु**र्बलि**स्तत्र समाययौ । **आनन्द-पुण्डरीकौ** च देवार्पितशार्ङ्ग-लाङ्गलप्रभृति-शस्त्रौ **बलि**ना सह युयुधाते । ततश्च बलिनो **बले**र्बलेन तयोर्बलम-भज्यत । ततश्चाऽऽ**नन्दः पुण्डरीक**श्च रथस्थौ रणाय डुढौकाते । **पुण्डरीक**ध्मातेन पाञ्चजन्यशङ्खशब्देन च **बलि**सैन्यं नष्टम् । ततः कुपितो **बलिः** शरैर्वर्षन् योद्धुमुपतस्थे । तयोः शस्त्राशस्त्रि युद्धे प्रवृत्ते च प्रतिविष्णु**र्बलि**श्चक्रं भ्रमयित्वा **पुण्डरीका**याऽमुञ्चत् । तत्तुम्ब-प्रहाराच्च क्षणं मूर्च्छितो लब्धसंज्ञस्तमेव चक्रमादाय विष्णुर्भ्रमयित्वा मुक्त्वा च **बलेः** शिरश्चिच्छेद । ततश्चाऽऽ**नन्द**सहितोऽहितनृपान् मथ्नन् विष्णुर्दिग्यात्रां विधायाऽर्धचक्री बभूव । तथा **मगधा**न्तरवस्थितां कोटिनरोत्पाट्यां महाशिलां लीलयोत्पाटयामास । वर्षाणां पञ्चषष्टि-सहस्राणि निजमायुरतिवाह्य च स स्वोग्रकर्मभिः षष्ठं नरकं ययौ ।

**पुण्डरीक**स्य च कौमारे सार्धं वर्षशतद्वयं, तावदेव मण्डलित्वे, दिग्विजये च षष्टिवत्सरी, राज्ये च वर्षाणां चतुष्षष्टिसहस्री चत्वारि शतानि चत्वारिंशच्चाऽगात् । **आनन्द**श्चाऽनुजं विना विषण्णः **सुमित्र**मुनेर्दीक्षामुपादाय पञ्चाशीति-वर्षसहस्रायुः केवलमवाप्याऽव्ययं पदं प्राप ॥३॥

*इति आनन्द-पुण्डरीक-बलिचरितवर्णनात्मकः तृतीयः सर्गः ॥३॥*

# चतुर्थः सर्गः

## सुभूमचक्रवर्त्तिचरितम्

अथेह **भरत**क्षेत्रे **विशाल**नगरे **भूपालो** नाम भूपालो बभूव। स एकदा रणे बहुभिः प्रतिपक्षनृपैर्मिलित्वा पराजिग्ये । वैरिभिः पराभूतश्च स विरज्य **सम्भूत**मुनिपादान्ते परिव्रज्यामाददे । तथा स तपसः प्रभुत्वभोगविषयं निदानं कृत्वा विपद्य **महाशुक्रे** सुरोऽभवत् ।

इतश्च **ऋषभनाथ**स्य **कुरु**नामा सुतोऽभवत् । यस्य नाम्ना **कुरु**देशः प्रसिद्धः । तत्सुतश्च **हस्ति**नामा, यस्य नाम्ना **हस्तिनापुरं** तीर्थकृच्चक्रिजन्मभूरस्ति । तस्य वंशे चा**ऽनन्तवीर्यो** नाम नृपो बभूव । तथा **वसन्तपुरे** उच्छिन्नवंशो**ऽग्निको** नाम बालको बभूव । स चा**ऽग्निक**स्तस्मात् स्थानाद् देशान्तरं प्रति चलितः सार्थाद्धीनः परिभ्राम्यन् कञ्चित्तापसाश्रयमगात् । तं चा**ऽग्निकं जमः** कुलपतिस्तनयत्वेनाऽग्रहीत् । तत्र च स **जमदग्नि**नाम्ना ख्यातोऽभूत् । तीव्रं तपश्च तप्यमानोऽसौ दुःसहेन तेजसा भूमौ पप्रथे ।

तदा च श्राद्धः पूर्वजन्मनाम्ना **वैश्वानरः** सुरस्तापसभक्तो **धन्वन्तरि**श्च व्यवदाताम् । तयोरेक आर्हतं धर्ममितरश्च तापसानां धर्मं प्रमाणमाह । तदा च तयोर्निर्णयो जातो-यदार्हतेषु जघन्यस्तापसेषु च प्रकृष्टः, आवाभ्यां को गुणैरतिरिच्यत इति परीक्षणीयम् ।

तदानीं च **मिथिला**पुर्यां नवधर्मपरिष्कृतः **पद्मरथो** नाम नृपो **वासुपूज्य**जिनान्तिकं दीक्षां ग्रहीतुं गच्छन् भावतो यतिस्ताभ्यां देवाभ्यां पथि ददृशे । ताभ्यां च परीक्षाकाङ्क्षया पाना-ऽन्ने ढौकिते, नृपस्तृषितः क्षुधितोऽपि तद् नाऽग्रहीत् । ततस्तौ देवौ कर्करकण्टकैर्नृपस्य पदोः पीडां चक्राते । तथाऽपि सोऽनाकुल एव प्रस्रवद्रक्तधाराभ्यां पादाभ्यां तादृशे पथि सञ्चचार । तथा ताभ्यां भूपतेः क्षोभाय गीत-नृत्तादि निर्ममे । तदपि तस्मिन् मोघमभवत् ।

ततस्तौ सिद्धपुत्ररूपेण पुरोभूयोचतुः-'महाभाग ! तवाऽद्याऽपि महदायुः, युवा चाऽसि, तद्भोगान् स्वच्छन्दं भुङ्क्ष्व । यौवने तपोधीः का ? क उद्यमी निशीथकृत्यं प्रातः कुर्यात् ? तद्यौवनेऽतिक्रान्ते तपो गृह्णीयाः' । तदा नृप ऊचे-'यदि बह्वायुस्तदा बहु पुण्यं भविष्यति, यतो जलमानेन कमलनालं वर्धते । चपलेन्द्रिये यौवने यत् तपस्तदेव तपः । रणे यः शूरः स एव शूरः'। ततस्तस्मिन् सत्वादचलिते साधु साध्विति वादिनौ तौ तापसोत्कृष्टं **जमदग्निं** परीक्षितुं जग्मतुः ।

तं **जमदग्निं** विस्तारिजटासंस्पृष्टभूतलं वल्मीकाकीर्णपादान्तं दान्तं दृष्ट्वा तत्श्मश्रुलताजाले मायया नीडं निर्माय तौ देवौ चटकमिथुनीभूय तस्थतुः । ततश्चटकश्चटकामूचे-'**हिमव**द्गिरौ यास्यामि' । सोचे-'अन्यासक्तस्त्वं न समेष्यसि, अतोऽहं नाऽनुमन्तुं शक्नोमि' । ततश्चटकश्चटकामब्रवीत्- 'यद्यहं न समेष्यामि, तदा गोघातपातकेन गृह्ये' ।

ततश्चटकोवाच-'यद्यस्य मुनेः पापेन गृह्ये इति शपथं करोषि, तदैव त्वां विसृजामि' । तच्छ्रुत्वा च क्रुद्धो **जमदग्नि**रुभाभ्यामपि हस्ताभ्यां गृहीत्वोवाच-'मयि दुष्करं तपः कुर्वाणे कीदृशं पापम् ?'

ततश्चटकोवाच-'ऋषे ! मा कुपः, तव तपो वृथा, यतो'ऽपुत्रस्य गतिर्नास्ती'ति श्रुतिः किं त्वया न श्रुता ?' ततस्तथेति मन्यमानः स मुनिर्दध्यौ-'ममाऽकलत्रपुत्रस्य तपो व्यर्थम्' । तं क्षुभितं दृष्ट्वा तापसैरहं भ्रमित इति चिन्तयित्वा **धन्वन्तरिः** श्राद्धो जातः । ततस्तौ देवावदृश्यौ जातौ ।

❁ ❁ ❁

**जमदग्निश्च नेमिककोष्टकं** पुरं प्राप्य भूयिष्ठकन्यकं **जितशत्रुं** महीपालमेकां कन्यकां प्रेप्सुरुपागतः । स च नृपस्तं सत्कृत्य 'किमर्थमागताः, अहं किं करवाणि, तद् ब्रूतेत्यवोचत् । कन्यार्थ-मागतोऽस्मीति तेनोक्ते नृपः 'शतस्य कन्यानां मध्ये येच्छति त्वां, तां गृहाणेत्युक्तस्स कन्याया अन्तपुरं गत्वा 'भवतीभ्यः काचिद् मम धर्मपत्नी भवत्वि'त्यवोचत् । ताश्च 'जटिलः पलितः क्षामो भिक्षाजीवि चेत्थं वदन्न लज्जसे' इत्युचुः । ततश्च क्रुद्धो मुनिस्ताः कन्याः कुब्जीचकार ।

अथ प्राङ्गणे रेणुपुञ्जे रममाणां **रेणुकां** नृपपुत्रीमिच्छसी-त्युक्त्वा मातुलिङ्गमदर्शयत् । तया च पाणिग्रहणसूचकः पाणिः प्रसारितः । मुनिश्च तां परिजग्राह । नृपश्च गवादिभिः सार्धं तस्मै तां ददौ । ततो मुनिः स्नेहसम्बन्धात् श्यालीस्तपःशक्त्या सज्जीचक्रे । तां च **रेणुका**माश्रमपदं नीत्वा प्रेम्णाऽवर्धयत् । यौवनं प्राप्तां च तामग्निं साक्षीकृत्य मुनिस्तामुपयेमे । ऋतुकाले च स तामूचे-'अहं ते चरुं साधयामि, यथा ब्राह्मणमूर्धन्यो धन्यः सुत उत्पद्यते' । ततः सोचे-'**हस्तिनापुरे**ऽ**नन्तवीर्य**स्य पत्नी मत्स्वसाऽस्ति, तस्यै क्षात्रो-ऽपि चरुः साध्यताम्' । ततः स मुनिः पत्न्यै ब्राह्मं तत्स्वस्रे क्षात्रं च चरुमसाधयत् ।



ततो **रेणुका**ऽचिन्तयत्-'यदहं तावदटवीमृगीव जाता, मत्सुतोऽपि मादृग् मा भूत्' । एवं विचिन्त्य सा क्षात्रं चरुमभक्षयत् । ब्राह्मं चरुं च स्वस्रे प्रादात् । काले च तयोस्तनयौ जातौ । **रेणुका**या **राम**स्तत्स्वसुश्च **कृतवीर्यः** । अन्यदा च तत्र कोऽप्यतिसाररोगाक्रान्तो विद्याधरः समागात् । तद्रोगेण च तस्याऽऽ**काशगामि**नी विद्या विस्मृता । **रामे**ण च भेषजाद्यैः स्वबन्धुवदुपचरितः स तस्मै **पारशवीं** विद्यां ददौ । स च **रामो** मध्ये**शर**वणं गत्वा तां विद्यामसाधयत् । ततः प्रभृति स **परशुराम** इति विश्रुतोऽभूत् ।

एकदा च **रेणुका** पतिमापृच्छ्य **हस्तिनापुरे** स्वसारमुपजगाम । **अनन्तवीर्य**श्च तां श्यालीति लालयन्नरमयत् । ततश्चाऽ**नन्तवीर्याद्** **रेणुका**यां तनयोऽजायत । मुनिश्च तेन पुत्रेणाऽपि सह **रेणुका**-मानयत् । **परशुराम**श्च सञ्जातकोपः पुत्रसहितां तां पर्शुनाऽच्छिदत् । तद्भगिन्या शंसितः क्रुद्धोऽ**नन्तवीर्यो जमदग्न्या**श्रमं गत्वा तमभाङ्क्षीत् । तथा स तापसानां कृतत्रासो गवादि समादाय मन्दं मन्दं परिक्राम्यन्नन्यवर्त्तत । **परशुराम**श्च त्रस्यत्तपस्वितुमुलं श्रुत्वा तां वार्त्तां च ज्ञात्वा क्रुद्धोऽन्तक इवाऽधावत् । तथाऽ**नन्तवीर्यं** पर्शुना खण्डशश्चक्रे । ततोऽमात्यादिभिर्वयसा लघुरपि **कृतवीर्यो** राज्ये निवेशयाञ्चक्रे । तस्य च **तारा**नाम्नी महिष्यभवत् । तस्याश्च कुक्षौ **भूपाल**नृपजीवो **महाशुक्रा**च्च्युत्वाऽवातरत् । अन्यदा **कृतवीर्यो** मातुर्मुखात् पितुः कथां श्रुत्वाऽगत्य **जमदग्नि**ममारयत् । पितृवधक्रुद्धो **राम**श्च द्राग् **हस्तिनापुरं** गत्वा **कृतवीर्य**ममारयत् । तस्य राज्ये च स्वयं न्यविशत् ।

**कृतवीर्य**स्य गुर्विणी राज्ञी च भयात् पलाय्य तापसा-श्रयमगात् । कृपालुभिश्च तापसैः सा भूगृहान्तः स्थापयित्वा क्रूरात् **परशुरामाद**निधानवद् गोप्यते स्म । ततस्तस्याश्चतुर्दशमहा-

स्वप्नसूचितो भूमिग्रहणात् **सुभूमो** नाम सुतोऽभवत् । **परशुराम**स्य पर्शुश्च यत्र यत्र क्षत्रिय आसीत् तत्र तत्र मूर्त्तिमान् कोपाग्निरिवाऽदीप्यत ।

अन्यदा च स **परशुराम**स्तत्राऽऽश्रमे समागात् । तत्पर्शुश्चाऽज्वलत् । ततः किमत्र क्षत्रियोऽस्तीति पृष्टास्तपस्विनो वयं तापसीभूताः क्षत्रिया आस्महे इत्यूचुः । ततोऽमर्षाद् **रामः** सप्तकृत्वो वसुन्धरां निःक्षत्रियां चकार । एकदा च **रामो** मे कुतो वध इति नैमित्तिकानपृच्छत्। ते च 'य इह सिंहासने स्थितेऽमूः पायसीभूता दंष्ट्रा भोक्ष्यते, तेन तव वधो भावी'त्यब्रुवन् । ततो **रामो**ऽवारितं सत्रागारं कारयामास । तत्र सिंहासनं स्थालं चाऽग्रतोऽस्थापयत् ।

**सुभूम**श्च तत्राऽऽश्रमे स्वर्णवर्णोऽष्टाविंशतिधनून्नतोऽद्भुतां वृद्धिमगात् । **मेघनादो** विद्याधरश्च नैमित्तिकान् पृष्ट्वा तदुक्त्यनुसारेण **सुभूमा**य निजां कन्यां **पद्मश्रियं** प्रदाय तस्यैव सेवकोऽभूत्। अन्यदा च **सुभूमो** मातरमपृच्छत्–'किमयं लोक इयानेवाऽधिकोऽपि वा ?' ततस्तन्मातोवाच–'वत्स ! लोकोऽनन्तः, तन्मध्येऽयमाश्रमो मक्षिकापदमात्रम् । अस्मिन् लोके विख्यातं **हस्तिनापुरं** नगरमस्ति। तत्र **कृतवीर्यो** नाम तव पिता नृपोऽभूत् । **राम**श्च तं हत्वा राज्यं स्वयमशिश्रियत् । पृथिवीं च निःक्षत्रियां चक्रे। तद्भयादिह तिष्ठामि' ।

तच्छ्रुत्वा क्रुद्धः **सुभूम**स्तत्कालं **हस्तिनापुर**मगात् । तत्र सत्रे च गत्वा सिंहासन उपविश्य पायसीभूतास्ता दंष्ट्रा बुभुजे । तत्र रक्षका ब्राह्मणाश्च युद्धायोत्तिष्ठमाना **मेघनादे**न जघ्निरे । **राम**श्च क्रुधा समायातः **सुभूमा**य पर्शुं मुक्तवान् । **सुभूम**श्च शस्त्राभावाद्दंष्ट्रास्थालमेवोदक्षिपत् । तत्स्थालं च पुण्यवशात् सद्यश्चक्रीबभूव ।



स चाऽष्टमश्चक्रवर्त्ती **सुभूम**स्तेन **परशुराम**स्य शिरोऽच्छिदत् । ततश्च समस्तां पृथिवीं त्रिःसप्तकृत्वो निर्ब्राह्मणां व्यधात् । तथा षट्खण्डां पृथिवीं क्रमेण साधयित्वा **मेघनादा**य **वैताढ्य**गिरिश्रेण्योर्द्वयोरपि विद्याधरेन्द्रपदवीं प्रदत्तवान् ।

एवं षष्टिवर्षसहस्रायुः स कालपरिणामवशेन विपद्य सप्तमीं नरकभूमिमगात् । तस्य च कुमारभावेऽब्दसहस्रपञ्चकं मण्डलित्वे च पञ्चशतानि, जये चक्रित्वे चाऽब्दपञ्चशत्यूनमर्धलक्षमजनि ।।४।।

*इति सुभूमचक्रिचरितवर्णनात्मकश्चतुर्थः सर्गः ।।४।।*

## पञ्चमः सर्गः

### दत्त-नन्दन-प्रह्लादचरितम्

अस्यैव **जम्बूद्वीप**स्य **प्राग्विदेह**भूषणे **सुसीमा**नगर्यां **वसुन्धरो** नाम भूपालो बभूव । स च चिरं महीं पालयित्वा **सुधर्म**मुनिसन्निधौ व्रतमादाय कालेन विपद्य **ब्रह्मलोक**मुपययौ ।

इतश्च **जम्बूद्वीप**स्यैव **भरता**र्धे दक्षिणे **शील**पुरे **मन्दरधीरो** नाम नृपो बभूव । तस्य च **ललितमित्रो** नाम पुत्रोऽभवत् । तं च दृप्त इति ज्ञापयित्वा प्रत्याख्याय **खलो** मन्त्री भूपतेर्भ्रातरं युवराजत्वे न्यवेशयत् । ततश्च विरक्तो **ललितमित्रो घोषसेन**मुनेः पार्श्वे परिव्रज्यामुपाददे। तप्यमानश्च स दुर्मना 'अनेन तपसा तस्य **खल**मन्त्रिणो वधाय स्यामि'ति निदानं कृत्वा तदनालोच्यैव विपन्नः **सौधर्मे** सुरोऽभवत् । स **खलाख्यः** सचिवश्च चिरं भवं भ्रान्त्वा **जम्बूद्वीप**स्य **वैताढ्ये** गिरावुत्तरश्रेण्यां **सिंहपुरे** विद्याधरेन्द्रः **प्रह्लादः** प्रतिविष्णुरजायत ।

इतश्चाऽस्मिन् **जम्बूद्वीपे दक्षिणभरता**र्धे **वाराणस्यां गङ्गया** सख्येव श्रितायामिक्ष्वाकुवंशेऽ**ग्निसिंह**नामा नृपो बभूव । तस्य च **जयन्ती शेषवती** चेति द्वे पत्न्यावभूताम् । तत्र **जयन्त्या** उदरे **वसुन्धर**जीवः पञ्चमकल्पतश्च्युत्वा समवातरत् । चतुर्महास्वप्न-सूचितबलदेवावतारश्च तस्याः समये **नन्दना**भिधः पुत्रोऽजनि । **शेषवत्याश्च** कुक्षौ **ललित**जीवश्च्युत्वाऽवतीर्णः सप्तमहास्वप्न-



सूचितवासुदेवावतारः समये **दत्त**संज्ञया पुत्रोऽजनि । क्रमेण च तावुभौ षड्विंशतिधन्वोच्चौ श्वेत-श्यामौ नील-पीताम्बरधरौ ताल-तार्क्ष्यध्वजौ यौवनं प्रपेदाते ।

एकदा च प्रतिविष्णुस्तावैरावणसङ्काशं गजेन्द्रमयाचत। ताभ्यां च तस्मिन् कुञ्जरोत्तमेऽदत्ते च कुपितः **प्रह्लादो** योद्धुमुपतस्थे । **प्रह्लाद**सैन्येन भग्नं स्वसैन्यमवलोक्य तौ द्वौ बल-विष्णू रथारूढौ चेलतुः । विष्णुश्च पाञ्चजन्यशङ्खध्वनिना द्विषद्बलं नाशयामास । ततश्च विष्णु-प्रतिविष्णू मिथः शस्त्राशस्त्रि युद्धं व्यतिचक्राते । क्रुद्धश्च **प्रह्लाद**श्चक्रं भ्रमयित्वा **दत्तं** प्रति मुमोच । **दत्त**श्च मोघीभूतं समीपस्थं तच्चक्रमेवाऽऽदाय मुक्त्वा **प्रह्लाद**स्य शिरश्चिच्छेद । तथा दिग्यात्रां कृत्वा **भरता**र्धं साधयित्वा **मगधे** कोटिशिलामुद्धृत्य चाऽर्धचक्र्य-भवत् ।

तस्य च विष्णोः कौमारे द्वे वर्षशते, मण्डलित्वे दिशां जये च प्रत्येकमब्दपञ्चाशदभूत् । एवमब्दानां षट्पञ्चाशतं सहस्राण्य-तिवाह्य स कर्मवशात् पञ्चमीं नरकावनिमगमत् । **दत्त**स्याऽवसाने जाते च **नन्दनः** कथञ्चित् पञ्चषष्ट्यब्दसहस्रायुरतिवाह्य भ्रातृमरणेन विषण्णो भूरिवैराग्यवान् **भुवनशोभि**मुनिपार्श्वे गृहीतदीक्षो निरतिचारं तीव्रं व्रतं पालयित्वा सिद्धिपदप्रतिष्ठामगात् ॥५॥

*इति नन्दन-दत्त-प्रह्लादचरितवर्णनात्मकः पञ्चमः सर्गः ॥५॥*

# षष्ठः सर्गः

## श्रीमल्लिनाथचरितम्

**प्रभावतिकुक्षिजातं कुम्भाङ्कं कुम्भनन्दनम् ।**
**समतादर्शिनं मल्लिजिनं नाथं प्रपद्यताम् ॥१॥**

अथ **जम्बूद्वीपे**ऽ**परविदेहे**षु **सलिलावत्यां** विजये **वीतशोका**यां पुर्यां **बला**ख्यो नाम नृपोऽभवत् । तस्य नृपस्य **धारिण्यां** पत्न्यां सिंहस्वप्नसूचितो **महाबलो** नाम पुत्रोऽभवत् । स च यौवनं प्रपन्न एकदिने **कमलश्री**प्रभृतीः पञ्चशतानि राजकन्याः परिणिनाय । तथा तस्य **महाबल**स्याऽ**चल**-**धरण**-**पूरण**-**वसु**-**वैश्रवणा**-ऽ**भिचन्द्रा**-ख्या बालसुहृदः आसन् । एकदा च **बलो** नृपस्तस्याः पुर्या बहिरै-शान्या**मिन्द्रकुब्जा**ख्य उद्याने समागतानां मुनीनामन्तिके धर्मं श्रुत्वा जातवैराग्यो राज्ये **महाबलं** न्यस्य प्रव्रज्य च शिवं ययौ ।

इतश्च **महाबल**स्य **कमलश्रि**यां पत्न्यां सिंहस्वप्नसूचितो **बलभद्रो** नाम पुत्रोऽभवत् । प्राप्तयौवनं च तं **महाबलो** यौवराज्ये निवेशयामास । तथा स षड्भिः बालसुहृद्भिः सहाऽऽर्हतं धर्मं श्रुतवान् । तेन जातवैराग्यास्ते सर्वेऽपि स्वं स्वं सुतं राज्ये निवेश्य **वरधर्म**मुनिपादमूले प्रव्रज्यामग्रहीषुः । तथैको यत् तपः कर्त्ता-ऽपरैरपि तदेव कार्यमिति तेषां सप्तानामपि प्रतिज्ञाऽभूत् । एवं कृतप्रतिज्ञास्ते सर्वे सममेव चतुर्थादि तपश्चक्रुः । किन्तु **महाबलः** स्वस्याऽधिकफलेच्छया'ऽद्य मे शिरो दुष्यति, अद्योदरं दुष्यति, अद्य



नास्ति क्षुदि'त्यादि व्यपदिश्य पारणाहेऽपि भोजनविरतस्तान् मायया वञ्चयित्वाऽधिकं तपो विदधे । एवं मायामिश्रेण तपसा स स्त्रीवेद-कर्माऽर्हद्भक्त्यादिभिः स्थानकैस्तीर्थकृन्नामकर्म चाऽबध्नात् । ते सर्वे च पूर्वलक्षचतुरशीत्यायुष्काश्चतुरशीत्यब्दसहस्रीं व्रतं पालयित्वाऽऽयुषः क्षये द्विधा संलेखनां कृत्वाऽनशनं प्रपद्य विपद्य **वैजयन्त्या**ख्ये विमाने सुरा जज्ञिरे ।

इतश्च **जम्बूद्वीपे दक्षिणभरता**र्धे **मिथिला**नगर्यामिक्ष्वाकुवंशे **कुम्भो** नाम नृपो बभूव । तस्य च **प्रभावती**नाम्नी महादेव्यासीत् । तस्याः कुक्षौ च **महाबल**जीवः पूर्णायु**र्वैजयन्त**तश्च्युत्वा फाल्गुन-शुक्लचतुर्थ्यामश्विन्यां चतुर्दशमहास्वप्नसूचितार्हदवतारोऽवततार । अस्मिन् गर्भस्थिते च देव्या माल्यशयनदोहदो देवताभिः पूरितः । पूर्णे च समये मार्गशुक्लैकादश्यामश्विन्यां नक्षत्रे सा प्राग्जन्ममाया-जनितस्त्रीकर्मप्रभावात् कुम्भलाञ्छनां नीलकान्ति सर्वशुभलक्षणा-मेकोनविंशमर्हन्तं कन्यकां सुषुवे । तदानीं च दिक्कुमार्य उपेत्य सूतिकर्माणि चक्रिरे । शक्रश्च **मेरुं** नीत्वा तत्र सर्वैरिन्द्रादिभिः सह यथाविधि स्नात्रादि विधाय स्तुत्वा पुनर्मातृसन्निधौ ताममुञ्चत् । तस्यां गर्भस्थायां मातुर्माल्यशयनदोहदोऽभूदिति नृपस्तस्याः समहोत्सवं '**मल्ली**'ति नामाऽकरोत् । शक्रनियुक्ताभिर्धात्रीभिर्लाल्यमाना सा क्रमाद् वृद्धिमाप ।

❁ ❁ ❁

इतश्चाऽ**चल**जीवो **वैजयन्ता**च्च्युत्वा **भरते साकेतपुरे प्रति-बुद्धि**र्नाम नृपो बभूव । तस्य च **पद्मावती** नाम पत्न्यासीत् । तस्मिन्नेव नगरे चैशान्यां नागवेश्मनि मनोरथपूरिका नागप्रतिमा-ऽऽसीत् । एकदा च तस्या यात्रायै राज्ञाऽनुमता सा पुष्पादि सम्पाद्य

नृपेण सहैव यात्रादिवसे नागप्रतिमागृहं जगाम । तत्र च पुष्पमण्डपिकां पुष्पगुच्छं स्वां प्रियां च प्रेक्ष्य नृपः **स्वबुद्धिं** नाम सचिवं पप्रच्छ-'त्वं मया प्रेषितोऽनेकशो राज्ञां गृहेष्वगाः, किं क्वाऽपीदृक् स्त्रीरत्नं पुष्पगुच्छश्चाऽवलोकितः ?' ततः **स्वबुद्धि**रुवाच-'त्वदादेशात् **कुम्भ**भूपान्तिकमुपेयुषा मया **मल्ली** नाम तत्सुता दृष्टा । तस्याः स्त्रीरत्नमुख्याया आयुर्ग्रन्थौ यः पुष्पगुच्छः, स स्वर्गेऽप्यसम्भवी । तामेकवारमपि यः पश्येत् स तां कदाऽपि न विस्मरेत्' । तच्छ्रुत्वा **प्रतिबुद्धिः** पूर्वजन्मानुरागतस्तां वरीतुं **कुम्भ**राजान्तिके सद्यो दूतं प्रैषीत् ।

इतश्च **धरण**जीवो **वैजयन्ता**त् परिच्युत्य **चम्पा**पुर्यां **चन्द्रच्छायो** नाम नृपो बभूव । तत्पुरीवास्तव्यश्च श्रावकोऽ**र्हन्नया**भिधः पोतारूढोऽम्भोधियात्रामकरोत् । तदानीं च मध्येसभं शक्रोऽ**र्हन्नय**समः श्रावको नाऽस्तीति प्रशंसां विदधे । तच्छ्रुत्वा च मत्सरी कोऽपि देवः क्षणात् सागरमेत्यौत्पातिकमरुन्मेघाम्बरं विदधे । सांयात्रिकाश्च पोतभङ्गभयात् क्षुभ्यन्तोऽभीष्टदेवेभ्य उपयाचितकानि चक्रुः । **अर्हन्नय**श्च 'इतो विघ्नाद् मे मृतिश्चेत् तदाऽनशनम्'स्त्विति प्रत्याख्याय समाधिस्थस्तस्थौ । ततः स देवो रक्षोरूपं विकृत्य नभस्थ उवाच-'**अर्हन्नय** ! आर्हतं धर्मं जहीहि, मद्वचः कुरु, नो चेदमुं स्फोटयित्वा त्वां सपरिच्छदं समुद्रसात् करिष्ये' । तथाऽपि धर्मादचलिते तस्मिन् विस्मितः स देवः क्षमणां चकार, तां शक्रप्रशंसां तं जगाद च । तथा तस्मै दिव्ये कुण्डलद्वन्द्वे दत्वा घोरं मेघ-वातादि संहृत्य च तिरोदधे । **अर्हन्नयो**ऽपि क्रमादब्धेस्तीरोर्व्यामुत्ततार ।

अशेषं भाण्डं चाऽऽदाय **मिथिला**पुरीं ययौ । तत्र च विधिज्ञः स **कुम्भ**राजस्योपायने एकं कुण्डलद्वयमदात् । **कुम्भ**राजश्च तद्दुहित्रे **मल्ल्यै** ददौ, तं सत्कृत्य विससर्ज च । ततः सोऽ**र्हन्नयो** विक्रीतक्रीतभाण्ड**श्चम्पा**पुरीमगात् । तत्र च **चन्द्रच्छाया**य द्वितीयं कुण्डलद्वयमदात् । राज्ञा च कुतोऽदः कुण्डलद्वयमिति पृष्टश्च स यथायथं कुण्डलप्राप्तिवृत्तान्तं शशंस । तादृशापरकुण्डलद्वयदानप्रसङ्गाच्च **मल्ल्या** रूपोत्कर्षं विशेषतो वर्णयामास सः । **चन्द्रच्छाय**नरेन्द्रोऽपि च प्राग्जन्मस्नेहतस्तां वरीतुं **कुम्भा**य दूतं प्राहिणोत् ।

इतश्च **पूरण**जीवो **वैजयन्ता**त् परिच्युत्य **श्रावस्त्यां** पुर्यां **रुक्मी**नाम नृपो बभूव, तस्य च **धारण्या**ख्यां पत्न्यां रूप-लावण्यवती **सुबाहुर्नाम** कन्यकाऽऽसीत् । नृपस्य चाऽतिप्रियत्वात् सा चातुर्मास्यां सादरं परिवारेण विशेषमज्जनविधिमकार्यत । कृतस्नाना धृतदिव्यालङ्कारा च सैकदा पितरं नन्तुं ययौ । नृपश्च तामुत्सङ्गमारोप्य सौविदल्लमीदृङ्मज्जनविधिः क्वाऽपीक्षित इत्यपृच्छत् । ततः सौविदल्ल उवाच-'भवदादेशाद् **मिथिलां** गतेन मया **कुम्भ**पुत्र्या आयुर्ग्रन्थौ विशेषोऽवलोकितः । तच्छ्रुत्वा जातानुरागेण **रुक्मिणा मल्लि**मार्गणाय **कुम्भं** प्रति दूतः प्रैषीत् ।

इतश्च **वसु**जीवोऽपि **वैजयन्ता**त् परिच्युत्य **वाराणसी**पुर्यां **शङ्खो** नाम नृपो बभूव । एकदा च **मल्ले**स्तत्कुण्डलद्वये विघटिते तत्सङ्घट्टनायाऽऽदिष्टैः स्वर्णकारैः 'दिव्यमिदं वयं संघट्टयितुं न क्षमा' इत्युक्तेन नृपेण क्रुधा ते स्वर्णकाराः पुर्या निर्वासिता **वाराणसी**मेत्य **शङ्खा**य तद्वृत्तान्तमाचख्युः । कुण्डलप्रसङ्गाद् **मल्ले** रूपं च वर्णयामास । तच्छ्रुत्वा **शङ्खो**ऽपि च **कुम्भात्** तामुपयाचितुं दूतं प्रैषीत् ।

इतश्च **मल्ले**रनुजो **मल्लो** नाम कुतूहलाच्चित्रकरैश्चित्रितां चित्रशालामकारयत् । तेषु चित्रकरेष्वेकाङ्गदर्शनात् तादृक्सर्वाङ्गालेख्य-

लब्धिमान् कश्चिच्चित्रकरोऽन्तर्जवनिकं **मल्लेः** पादाङ्गुष्ठं निरीक्ष्य सर्वाङ्गोपाङ्गसहितं यथावद्रूपमालिखत् । तत्र च क्रीडितुं गतो **मल्ल**श्चित्रगतां **मल्लिं** प्रेक्ष्य साक्षाद् मन्यमानो लज्जया द्रुतमपासरत् । धात्र्या किमेतदिति पृष्टश्चाऽत्र '**मल्ली** वर्त्तत इति कथमत्र क्रीड्यत' इत्यवोचत् । तया च सम्यङ् निरूप्य 'नेयं साक्षाद् **मल्ली**, किन्तु चित्रम्, अतो नाऽपसर्त्तव्य'मित्युक्तश्च **मल्लः** क्रुधा चित्रलेखकं दक्षिणकरं निकर्त्त्य निरवासयत्। स चित्रकरश्च **हस्तिनापुरे** समेत्या-ऽ**दीनशत्रो**र्नृपस्य स्ववृत्तान्तमाचख्यौ, **मल्लि**मवर्णयच्च । तथा चित्रफलकं निष्कास्य चित्रस्थां **मल्लि**मदर्शयत्। तां दृष्ट्वा विस्मितः पूर्वस्नेहाज्जातानुरागश्च स नृप उप**कुम्भं मल्लि**याचनाय दूतं प्रैषीत्।

इतश्चाऽ**भिचन्द्र**जीवो **वैजयन्तात्** परिच्युत्य **काम्पील्य**नगरे **जितशत्रु**नामा नृपोऽभवत् । तस्य च **धारिणी**प्रमुखं राज्ञीसहस्रम-भवत्। तथा **मिथिला**पुर्यां **चोक्षा** नामैका परिव्राजिका राज्ञा-माढयानां च गृहेषु दानमूलस्तीर्थाभिषेकजश्च धर्मः स्वर्गा-ऽपवर्ग-योर्हेतुरिति नस्तत्त्वतो वच इत्युपदिशन्ती पौरान् जनपदांश्च धर्मे प्रवर्त्तयन्ती विहरमाणा **मल्ल्य**धिष्ठितं सदनं समभ्यागात् । तत्र च त्रिदण्डपाणिः काषायवसना सा सदर्भैः कुण्डिकाजलैर्भुवमभ्युक्ष्य स्ववृष्यां निषसाद् । तथाऽन्यजनवद् **मल्ले**रपि तं धर्मं जगौ । ततो **मल्लि**स्त्रिज्ञानधराऽवोचत्-'दानमात्रं धर्माय न, अन्यथा तु कुर्कुटादी-नामपि पोषणं तत्कृते स्यात् । किं च प्राणातिपातमूलैस्तीर्थाभिषेकैः कोऽपि कथं शुचिर्भवेत् ? तस्माद् धर्मो विवेकमूलः । निर्विवेकस्य तपांस्यपि केवलं क्लेशाय । तया च युक्तियुक्तमित्थमुक्ता सा विलक्षाऽधोमुखी परिव्राजिका दास्यादिभिः 'पाखण्डिनि ! कुशासनेन त्वया कियच्चिरमिदं विश्वं वञ्चितमि'ति निरभर्त्सि ।



तत**श्चोक्षा**ऽचिन्तयत्-'राज्यसम्पदुन्मत्तयाऽनया तदनुवर्त्तिना परिच्छदेनाऽपि च यत् स्वैरं तर्जिताऽस्मि, तदेनां स्वबुद्धितो बह्वीषु सपत्नीषु वैरानृण्यहेतवे क्षेप्स्यामि' । एवं विचिन्त्य निर्गत्य सामर्षा सा **काम्पील्य**पुरे **जितशत्रु**नृपान्तिके गत्वा तेन महत्या प्रतिपत्त्या दृष्टा साऽऽशीर्वादं प्रदाय स्ववृष्यामुपाविशत् । राजान्तःपुरेणाऽपि वन्द्यमाना दान-तीर्थाभिषेकजं धर्मं शशंस । ततो भूपतिस्तामुवाच-'अखिलां महीं भ्राम्यन्त्या भवत्या ममाऽन्तःपुरस्त्रैणसदृशं वरमन्यत्रा-ऽपि कुत्राऽपि दृष्टम् ?' तत**श्चोक्षा** स्मेरमुखी जगाद-'राजन् ! **मिथिला**पुरे **कुम्भ**स्य राज्ञो **मल्ली**ति नाम कन्यारत्नं विद्यते । सा हि मृगीदृशां चूडारत्नम्'। तच्छ्रुत्वा पूर्वस्नेहेन जातानुरागः स **कुम्भ**समीपं द्रुतं दूतं प्रैषीत् ।

**मल्लि**श्च प्राग्जन्मसुहृदां तेषां षण्णामपि महीभुजामवधिना बोधं पश्यन्त्यशोकवनिकान्तरे सौधर्मगृहे रत्नपीठे आत्मनो हैमीं प्रतिमामातालुशुषिरोदरां तालुनि सच्छिद्रस्वर्णाम्भोजपिधानिका-सहितां कारयित्वा न्यवेशयत् । प्रतिमापवरकस्य पुरतो भित्तौ च सजालककपाटानि षड् द्वाराणि च कारयामास । तेषां द्वाराणां पुरतश्च षट् ह्रस्वापवरकाणि प्रतिमापृष्ठभित्तावेकं द्वारं चाऽकारयत् । ततः सर्वाहारपिण्डीं प्रतिमायास्तालुनि क्षिप्त्वा स्वर्णाम्बुजेन पिधाय च साऽन्वहं बुभुजे ।

इतश्च तेषां षण्णामपि नृपाणां दूता युगपत् **कुम्भ**सन्नि-धावाययुः। ते सर्वे च स्वस्वामिगुणान् वर्णयन्तः स्वस्वामिप्रार्थनां निवेदयामासुः । ततः **कुम्भ**राजो जगाद-'देवादीनामप्ययोग्या मम कन्या न तेभ्यः केभ्योऽपि नृपेभ्यः प्रदातव्या । तद्यूयमितः शीघ्रं यात, मम नगराद् निर्यात'। एवं राज्ञा निराकृतास्ते षडपि दूता द्रुतं गत्वा स्वस्वामिनं तत् सर्वं वृत्तान्तमवोचन् । ततः समानपराभवास्ते

षडपि राजानः परस्परं दूतान् प्रेष्य **कुम्भ**नृपेण सह विग्रहं निश्चिक्युः । ससैन्यं प्रस्थिताश्च ते षडपि **मिथिला**पुरीं प्राप्य तां परितः पर्यवेष्टयन् ।

**कुम्भो**ऽपि तेन रोधेन खिन्नः कतिपयैर्दिनैश्चिन्तापन्नस्तस्थौ । ततो **मल्लिः** समागत्योद्वेगकारणं पृष्टवती । **कुम्भ**श्च सर्वं यथास्थितमवोचत् । ततो **मल्लि**रुवाच-'तात ! गूढपुरुषैः प्रत्येकं तुभ्यं प्रदास्यामीत्युक्त्वा षडपि नृपान् बोधय, तस्या मम प्रतिमायाः पुरोऽपवरकेषु सायं श्वेतवाससा प्रच्छन्नास्ते क्रमेण समानेयाः' । राजा च तथैव विदधे ।

तेऽपि तथैवाऽऽजग्मुः । कपाटजालकैस्तां **मल्लि**प्रतिमां ददृशुश्च । **मल्ल्य**पि च तत्र प्रतिमापृष्ठद्वारेण प्रविश्य प्रतिमान्तरिता तालुपिधानाब्जमपानयत् । ततश्च सद्यः प्रक्षिप्तकुथिताहारगन्धः शकृद्गन्ध इवाऽसह्यो निर्ययौ । ततस्ते तदुग्रगन्धमसहमाना वाससा नासिकां पिधाय ततः पराङ्मुखा अजायन्त । ततो भोः ! किं यूयं पराङ्मुखा इति **मल्ल्या** पृष्टा अमुं दुर्गन्धं सोढुं न शक्नुम इत्यभ्यधुः ।

**मल्लि**स्तान् प्रत्युवाच-'इयं सौवर्णी प्रतिमा, अत्र चाऽन्वहमाहारप्रक्षेपादीदृशो गन्धः, तथैव विष्ठा-मूत्रादिभृते बहिरन्तश्च बीभत्से देहे विवेकिनः कथमनुरागं कुर्वन्तु ? इतस्तृतीये भवे भवद्भिर्मया सह तपश्चक्रे प्रव्रजितैः, तत् किं न स्मरत' । ततो **मल्ली**वचो विमृशतां तेषां जातिस्मरणमुत्पेदे । ततो **मल्लि**र्जालकपाटान्युदघाटयत् । प्रबुद्धास्ते चाऽभ्युपेत्याऽब्रुवन्-'स्मरामः, यद् भवे पूर्वे सप्ताऽपि वयं सम्भूय कृतसङ्केतास्तीव्रं तपोऽकार्ष्म । त्वया साधु बोधिताः स्मः, नरकाच्च रक्षिताः, अतः परं कृत्यमादिश, त्वं नो गुरुरसि'।



ततः समये प्रव्रज्या ग्राह्येति । तानुदीर्य तान् षडपि **मल्लि**र्विससर्ज। ते च स्वं स्वं पुरं जग्मुः।

❁ ❁ ❁

ततो **लोकान्तिका**मरैस्तीर्थं प्रवर्त्तयेति प्रार्थिता **मल्लि**र्वार्षिकदानं प्रददौ । जन्मतोऽब्दशते पूर्णे पञ्चविंशतिधनून्नता **कुम्भ**राजसुरेन्द्राद्यैः कृतनिष्क्रमणोत्सवा **जरती**नामशिबिकारत्नमारूढा **सहस्राम्रवणं** प्राप । मार्गशुक्लैकादश्यामश्विनीस्थे चन्द्रे कृताष्टमा पूर्वाह्णे बहिःपरिच्छदार्हाणां नृणां दशभिः शतैरन्तः परिच्छदार्हाणां स्त्रीणां त्रिभिः शतैश्च समं प्रवव्राज। तदैव च तस्या मनःपर्ययज्ञानमुत्पेदे । तस्मिन्नेव दिनेऽशोकमूले तस्याः केवलमप्युत्पन्नम् । ततः शक्रादिभिः कृते समवसरणे धनुःशतत्रयोत्तुङ्गचैत्यपादपशोभिते प्राग्द्वारा प्रविश्य यथोपचारं प्रभु**र्मल्लिः** रत्नसिंहासनं प्राङ्मुख्यध्यतिष्ठत् । ततो यथा स्थानं सुरादिषु **कुम्भा**दिनृपेषूपविष्टेषु च **देवराज-कुम्भराजा**भ्यां स्तुता धर्मदेशनां व्यधात् ।

तथाहि- 'संसारः स्वतोऽप्यपारः, स च पूर्णमासीदिनेनाऽब्धिरिव रागादिना विशेषतो वर्धते । न च विना समताजलं नृणां रागद्वेषमलक्षयः कर्त्तुं शक्यः, यज्जन्मकोटिभिरपि तीव्रतपसा कर्म न हन्यते, तत्साम्यावलम्बेन क्षणार्धेन हन्यते । आत्मज्ञानी साधुश्च सामायिकशलाकया संश्लिष्टं कर्मजीवं विभिन्नीकुरुते । योगिनश्च सामायिकांशुना रागादिध्वान्तविध्वंसे कृते स्वस्मिन् स्वरूपं पश्यन्ति।

समताभाजश्च साधोः प्रभावतो नित्यवैरिणोऽपि जन्तवः परस्परं स्निह्यन्ति । समता चेष्टा-ऽनिष्टैश्चेतना-ऽचेतनैर्भावैर्मनसोऽमोहः । बाह्वोर्गोशीर्षचन्दनालेपे वासिच्छेदे वाऽभिन्ना चित्तवृत्तिश्चेत् तदाऽनुत्तमं साम्यं ज्ञेयम् । 'स्तोतरि शप्तरि च यस्य चेतस्तुल्यं स

समताधिष्ठितः। विना हवन-जप-दानादिं साम्यमात्रेणाऽमूल्यक्रीती निर्वृतिर्जायते । ततः क्लिष्टान् रागादीन् विहायाऽयत्नलभ्यं हृद्यं सुखावहं च साम्यमेव धार्यम् । नास्तिकोऽपि साम्यजनितं सुखं स्वसम्वेद्यं नाऽपलपति । खाद्य-लेह्यादिभ्यो विरक्ता अपि यतयः स्वैरं साम्यामृतरसं मुहुः पिबन्ति । यस्य च कण्ठे सर्पो मुक्तादाम च नाऽप्रीत्यै न वा प्रीत्यै, स एव समतापतिः । साम्यं हि बालानां सुधियां च निरुपाधिकं भवरुजौषधम् । योगिनश्चाऽतिक्रूरतरमपि कर्म साम्यशस्त्रेण सुखं घ्नन्ति । समताया अयं प्रभावोऽवश्यं प्रत्येतव्यो यतः पापिनोऽपि क्षणार्धेन शाश्वतं पदमिच्छन्ति । यस्मिन् सति रत्नत्रयं सफलं तस्मै समत्वाय स्वस्ति । उपसर्गे मृत्युकाले वा साम्याद् नाऽन्य उत्तम उपायः'।

प्रभोरेवं देशनां श्रुत्वा ते षड् भूपा अन्येऽपि च प्रबुद्धाः प्रवव्रजुः। **कुम्भा**दयश्च श्रावकत्वं प्रपेदिरे । **भिषगा**दिष्वष्टाविंशतौ गणधरेषु **भिषग्गण**धरो देशनां व्यधात् । द्वितीयदिने च तत्रैव वने **मल्लि**प्रभो**र्विश्वसेन**नृपात् परमान्नेन पारणं जज्ञे । **देवराजा**दयः **कुम्भा**दयो नृपाश्च **मल्लि**पादौ नमस्कृत्य स्वं स्वं स्थानं ययुः ।

❀ ❀ ❀

तत्तीर्थे समुत्पन्ने इन्द्रायुधद्युतिश्चतुर्मुखो गजरथो दक्षिणैर्भुजैर्वरद-पर्शु-शूला-ऽभयधरो वामैश्च बीजपूर-शक्ति-मुद्गरा-ऽक्षसूत्रधरः **कुबेर**यक्षः, कृष्णाङ्गी कमलासना दक्षिणाभ्यां बाहुभ्यां वरदा-ऽक्षसूत्रधरा वामाभ्यां च मातुलिङ्ग-शक्तिधरा **वैरोट्या**देवी च श्री**मल्ले**रर्हतः शासनदेवते अभूताम् । ततः प्रभुस्ततः स्थानाद् भव्यलोकावबोधाय ग्राम-पुरादिषु विजहार ।



**मल्लि**प्रभोः परिवारे च श्रमणानां चत्वारिंशत्सहस्राणि, आर्यिकाणांश्च पञ्चपञ्चाशत्सहस्राः, मनःपर्ययिणां पञ्चाशदन्विता सप्तदशशती, चतुर्दशपूर्वभृतां साष्टषष्टिः षट्शती, अवधिज्ञानिनां द्वाविंशतिशती, केवलज्ञानिनां द्वाविंशतीशती, जातवैक्रियलब्धीनां शतोनां त्रिसहस्री, उत्पन्नवादलब्धीनां चतुर्दश शतानि, श्रावकाणां सत्र्यशीतिसहस्रकं लक्षमेकं, श्राविकाणां ससप्ततिसहस्रिका त्रिलक्षी चाऽभवन् । **मल्लि**प्रभुश्चैतैः परिवारैः परिवेष्टितः संवत्सरशतन्यूनां पञ्चपञ्चाशतं समासहस्रान् विजहार ।

अथ निर्वाणसमयं ज्ञात्वा **सम्मेता**द्रिमुपेत्याऽनशनं साध्वीनां साधूनां च पृथक् पृथक् पञ्चशत्या समं प्रपद्य मासान्ते फाल्गुनशुक्ल-द्वादश्यां याम्यभे तैः साधुभिः साध्वीभिश्च सार्धं निर्वाणमासदत् **मल्लि**प्रभुः ।

तदेवं **मल्लि**प्रभोः कौमारे व्रतपर्याये च वर्षाणां पञ्चपञ्चा-शत्सहस्राण्यभवन् । **अरनाथ**स्य निर्वाणाच्च वर्षाणां कोटिसहस्रे समतिक्रान्ते **मल्लि**जिननिर्वृतिरभूत् । इन्द्रादयश्च तत्कालमुपेत्य श्री-**मल्लि**प्रभोर्निर्वाणमहोत्सवं यथाविधि चक्रुः ॥६॥

*इति श्रीमल्लिजिनचरितवर्णनात्मकः षष्ठः सर्गः ॥६॥*

# सप्तमः सर्गः

## मुनिसुव्रतनाथचरितम्

**जिनः सूनुः सुमित्रस्य पद्मावत्याश्च कुक्षिजः ।**
**सद्धर्मदेशकः पायादपायान्मुनिसुव्रतः ॥१॥**

अथाऽत्रैव **जम्बूद्वीपेऽपरविदेहेषु भारताख्ये** विजये **चम्पापुर्यां** नगर्यां **सुरश्रेष्ठो** नाम महीपतिरासीत् । चतुर्धाऽपि वीरो विनयी जिनधर्मधुरन्धरः स एकदोद्याने समवसृतं **नन्दनं** नाम मुनिं भक्त्या ववन्दे । तद्देशनया प्रबुद्धश्च भवविरक्तस्तस्यैव मुनेः पार्श्वे प्रव्रज्यां प्रपद्य यथावद् व्रतं पालयित्वाऽर्हद्भक्त्यादिभिः स्थान-कैस्तीर्थकृन्नामकर्मोपार्ज्य विपद्य **प्राणते** सुरोत्तमोऽभूत् ।

इतश्चाऽत्रैव **जम्बूद्वीपे भरते वत्समण्डले कौशाम्ब्यां** पुर्यां **सुमुखो** नाम भूपतिरासीत् । एकदा स वसन्ततौं क्रीडार्थमुद्यानं गच्छन् गजारूढो **वीरकुविन्दस्य** भार्यां रूप-लावण्यवतीं दृष्ट्वा कामार्तोऽचिन्तयत्-'किमियं शापेन दिवो भ्रष्टाऽप्सराः, वसन्तश्री-र्वा रतिर्वा, यद् वा ब्रह्मणा कौतुकात् किमपि स्त्रीरत्नं कृतम् ?' एवं विचिन्तयंस्तत्रैव गजमगमयत्, न त्वन्यतो ययौ । 'स्वामिन् ! सर्वं बलं प्राप्तं, किमद्याऽपि विलम्ब्यते' ? इति सचिवेनोक्तश्च कथमपि चेतः संस्थाप्य **यमुनोद्वर्त्तं** महोद्यानं जगाम । तत्र च तया हृतमनाः क्वाऽपि रतिं न प्राप नृपः ।



**सुमति**र्नाम सचिवश्च भावज्ञोऽप्यज्ञ इव तमुद्विग्नमानसं महीपतिमुवाच-'राज्ञां मानसो विकारो वा शत्रुसम्भवं भयं वा मोहाय, न तृतीयं किमपि । तत्र विक्रमाक्रान्तजगतस्ते शत्रुभयं नाऽस्ति, यदि मनोविकारः कोऽपि तर्ह्यगोप्यश्चेद् वद' । ततो राजोवाच-'त्वया सत्यमुक्तं, न त्वत्तः किमपि गोप्यम् । आगच्छता मया पथि काचिदङ्गना निरीक्षिता, तया हृतं मम चेतः स्मरातुर-मस्ति, तेन ताम्यामि' । ततः सचिव उवाच-'सा मया ज्ञाताऽस्ति, सा **वीरकुविन्दस्य** भार्या **वनमाला** । एषोऽहं तवाऽभीष्टं सम्पादयिष्यामि, सपरिवारः स्वमालयं यातु भवान्' । सचिवेनेत्थ-मुक्तो नृपः शिबिकारूढो **वनमालां** तां चिन्तयन् स्वं स्थानमगात् ।

सचिवश्च विचित्रोपायपण्डिता**मात्रेयिकां** नाम परिव्राजिकां **वनमालायै** प्राहिणोत् । सा च **वनमालाया** वेश्म गता, तया वन्दिता साशीःपूर्वमुवाच-'त्वमद्य कुतो म्लानवदना दृश्यसे ?' ततो **वनमालो**वाच-'मयाऽद्य पथि गजारूढो नृपो वीक्षितः । तं दृष्ट्वाऽपहृतमानसा स्मरार्त्ताऽस्मि, किन्तु क्वाऽहं कुविन्दी ? क्व नृपः ? स्वप्नेऽप्यावयोः सङ्गमोऽसम्भवी' ।

तत **आत्रेय्यु**वाच-'मा विषीद, प्रातः राज्ञा सह तव योगं करिष्यामि' । एवमाश्वास्य सा गता नृपार्थं सिद्धप्रायं मन्त्रिणे समाख्यत् । प्रातश्च परिव्राजिका गत्वा **वनमाला**मवोचत्-'मया **सुमुखो** नृपस्तव प्रेमाभिमुखः कृतोऽस्ति, उत्तिष्ठ, नृपसद्मनि गच्छावः, राजपत्नीव राज्ञा सह यथा सुखं रमस्व' । ततो **वनमाला** तया सार्धं नृपगृहं ययौ । राज्ञा च साऽवरोधे निदधे । तथा तया सहोद्यानादिषु भोगसुखमन्वभूत् ।

इतश्च **वीरकुविन्दो वनमाल**या वियुक्त उन्मत्त इव भ्रमन् विवर्णवदनोऽसंस्कृताङ्गः पौरबालकैरुपद्रूयमाणो '**वनमाले** ! क्वाऽसि,

दर्शनं देही'त्यादि विलपन् पुर्यां चत्वरादिषु कालमतिवाहयति स्म। एकदा च बालकैरावृतस्तथैव प्रलपन् राजगृहाङ्गणे समागतः कौतुकाद् राजलोकेन सोऽवेष्ट्यत । **सुमुखो** नृपश्च कोलाहलं श्रुत्वा किमेतदिति जिज्ञासु**र्वनमाल**या सहैव तत्राऽऽगतस्तं विकृताकारं लोकेनाऽऽक्रुश्यमानं **वनमाले** ! क्वाऽऽसीत्यादि विलपन्तं दृष्ट्वा राजा **वनमाला** च दध्यतुः-'अहो ! अस्माभिर्निर्घृणं कर्म विदधे । दुःशीलैरेष विश्वस्तो वञ्चितः । अतः परं नाऽन्यत् किञ्चित् पापं प्रकृष्यते। प्रकृष्टपापिनां मध्ये वयमेव धौरेयाः । इमं वराकं जीवन्तमेव मृतमिवाऽकार्ष्म । विषयलाम्पट्यं धिक् । अनेन पापेन नरकेऽपि खलु नः स्थानं न ।

ये जितेन्द्रियास्ते धन्याः । वैषयिकं हि सुखं विपाके दुःखकारणमेव । ये जिनधर्ममहोरात्रमपि श्रृण्वन्त्याचरन्ति च, ये च विश्वोपकारिणः, ते धन्याः । एवं स्वं विनिन्दतोर्धर्मानुरक्तांश्चाऽभिनन्दतोस्तयोरुपरि तदैव विद्युत् पपात, प्राणानपजहार च । ततस्तौ **हरिवर्षे** वर्षे मिथुनरूपिणौ जज्ञाते । पितृभ्यां **हरिश्च हरिणी** चेति कृतनामानौ प्राग्जन्मवद् दम्पती दिवानिशमवियुक्तौ कल्पद्रुमैः सम्पादितार्थौ विलसन्तौ सुखेन तस्थतुः ।

इतश्च **वीरकुविन्दो**ऽपि सुदुस्तपं बालतपश्चक्रे । मृत्वा च **सौधर्म**कल्पे किल्बिषिकः सुरोऽभवत् । तत्र चाऽवधिना स्वं प्राग्जन्म **हरिणी-हरी** चाऽपश्यत् । ततः क्रुद्धः स **हरिवर्षं** गत 'इहाऽवध्याविमौ मृत्वा क्षेत्रप्रभावतोऽवश्यं स्वर्गं यास्यतः, तद्दुर्गतीनां निर्बन्धेन मृतिपदे स्थाने इमौ नयामि' इति निश्चित्य स सुरः कल्पतरुभिः सह तौ **भरते चम्पा**पुर्यामनैषीत् । तत्र च तदानीमिक्ष्वाकुवंशज**श्चन्द्रकीर्ति**र्नाम नृपोऽभवत् । स चाऽपुत्र एव पञ्चत्वं प्राप। ततस्तस्य प्रकृतयो राज्यार्हमपरं नरमन्वेष्टुं प्रावर्त्तन्त ।



स देवश्च तदा देवर्द्ध्या सर्वान् जनान् विस्मापयन् नभःस्थ उवाच-'भोः ! सचिवाद्याः ! युष्माकं राजाऽपुत्रो मृत इति यूयं राजेच्छवः, अहमद्यैव **हरिवर्षाद् हरिं** युग्मरूपिणं राज्यार्हमनैषम् । अस्येयं **हरिणी** सहजा पत्नी च । अनयोराहारार्थममी कल्पद्रुमाश्चाऽऽनीताः । तदयमद्य वो राजा भवतु । अनयोश्च कल्पद्रुमफलाविद्धं पशु-पक्षिणां मांसं मद्यं चाऽऽहारे देयम्' । ते चैवमस्त्विति प्रोच्य तं देवं प्रणम्य मिथुनं रथमारोप्य राजवेश्मनि नीत्वा **हरिं** राज्येऽभिषिषिचुः । स देवश्च स्वशक्त्या तयोर्ह्रस्वमायुस्तुङ्गत्वे धनुशतं च विधाय कृतार्थो तिरोदधे। स च **हरि**नृपः **शीतलस्वामि**तीर्थेऽभूत् । ततः प्रभृति तन्नाम्ना भुवि **हरिवंशो**ऽभवत् ।

स च **हरी** राजा वसुधां साधयित्वाऽनेकशो राजकन्याः परिणीतवान् । तस्य च **हरिण्यां** कियत्यपि काले गते पृथुलोरःस्थलः **पृथिवीपति**नामा पुत्रोऽभवत् । **हरिणी-हरी** च क्रमाद् विपेदाते । तयोः सूनुः **पृथिवीपति**श्च चिरं राज्यं पालयित्वा पुत्रं **महागिरिं** तत्राऽभिषिच्य तपस्तप्त्वा दिवं प्रत्यपद्यत । **महागिरि**श्चाऽपि सुतं **हिमगिरिं** राज्येऽभिषिच्य प्रव्रज्यां प्रपद्याऽपुनर्भवमव्राजीत्। **हिमगिरि**श्च ज्येष्ठं सुतं **वसुगिरिं** राज्ये न्यस्य प्रव्रज्याऽव्ययं पदं प्राप । **वसुगिरि**रपि **गिरिं** नाम सुतं, **गिरि**श्च **मित्रगिरिं** नाम सुतं, क्रमशो राज्ये निधाय प्रव्रज्योत्तमं पदं प्राप । एवं हरिवंशे जाता नृपाः केचन तपसा निर्वाणं केचन स्वर्गं च प्राप्ताः ।

इतश्चाऽत्रैव **भरते मगधेषु राजगृहे** नगरे हरिवंशीयः **सुमित्रो** नाम भूपतिरभूत् । तस्य च **पद्मावती** नाम पत्न्यासीत् । तस्याश्च कुक्षौ **प्राणत**कल्पात् **सुर**श्रेष्ठजीवो निजमायुः पूरयित्वा च्युत्वा श्रावणपूर्णिमायां श्रवणास्थे चन्द्रेऽवततार । तदानीं निशाशेषे

सुखसुप्ता **पद्मावती** देवी च तीर्थकृज्जन्मसूचकांश्चतुर्दश महास्वप्नान् ददर्श । पूर्णे च समये तमालवर्णं कूर्मचिह्नं ज्येष्ठकृष्णाष्टम्यां श्रवणस्थे चन्द्रे सुखं सुतमसूत ।

दिक्कुमारिकाभिश्चाऽऽगत्य भक्त्या सूतिकर्मणि विहिते प्रभुरिन्द्रेण **मेरा**वुपनीय स्नात्रं विधाय स्तुत्वाऽऽदाय पुनः **पद्मावती**-पार्श्वेऽमुच्यत । प्रभाते **सुमित्र**नृपश्च समहोत्सव'मस्मिन् गर्भस्थे माता मुनिवत् सुव्रता जातेति प्रभो**र्मुनिसुव्रते**त्याख्यां विदधे । ज्ञानत्रयपवित्रात्मा च प्रभुः क्रमेण वर्धमानो यौवनं प्रपद्य विंशति-धन्वसमुन्नतिः **प्रभावती**प्रभृतिका राजपुत्रीः पर्यणैषीत् । प्रभोश्च **प्रभावत्यां सुव्रतो** नाम पुत्रोऽभवत् ।

अथाऽर्धाष्टमेषु वर्षाणां सहस्रेषु गतेषु पित्राऽध्यारोपितं राज्यभारं गृहीत्वा पञ्चदशसहस्राब्दीं क्ष्मां पालयन् तीर्थं प्रवर्त्तयेति **लोकान्तिका**मरैः प्रार्थितो वार्षिकदानं प्रददौ । ततः पुत्रं **सुव्रतं** राज्ये निवेश्य देवैः **सुव्रता**दिभिर्नृपैश्च कृतनिष्क्रमणोत्सवो-ऽ**पराजितां** शिबिकामध्यारुह्य **नीलगुहां** नामोद्यानं प्राप प्रभुः । फाल्गुनशुक्लद्वादश्यां श्रवणस्थे चन्द्रेऽपराह्णे कृतषष्ठो नृपसहस्रेण समं प्रव्रज्य द्वितीयेऽह्नि **राजगृहे ब्रह्मदत्त**नृपगृहे पायसेन पारणं विधाय प्रभु**र्मुनिसुव्रत** एकादशमासान् छद्मस्थो विजहार ।

ततो विहर**न्नीलगुहो**द्यानं प्राप्य चम्पकतरोरधः प्रतिमा-धरस्तस्थौ । फाल्गुनकृष्णद्वादश्यां श्रवणस्थे चन्द्रे च घातिकर्मक्षयात्-प्रभोरमलं केवलमुत्पन्नम् । तदानीं च शक्रादिभिः कृते समवसरणे चत्वारिंशेष्वासशतद्वयोच्चाशोकपादपे यथोपचारं प्रविश्य सिंहासन उपाविशत् । देवेषु सङ्घेषु च यथास्थानं स्थितेषु शक्र-**सुव्रता**भ्यां स्तुतो **मुनिसुव्रत**प्रभुर्विश्वविबोधाय देशनां ददौ ।



तथाहि-'क्षारसमुद्रात् सद्रत्नमिवाऽसारात् संसाराद् धर्मं मतिमानाददीत । स च संयम-सुनृतादिर्दशविधः । निजदेहेऽपि निरीह, आत्मन्यपि निर्ममो, नमस्कुर्वत्यपकुर्वत्यपि समाशय, उपसर्गपरीषहान् सोढुं शक्तो, मैत्र्यादिभावनाभिर्भावितमानसः, क्षमावान्, विनयी, दान्तो, गुरुशासने श्रद्धालुर्जात्यादिगुणसम्पन्नो जनो यतिधर्माय कल्पते ।

गृहमेधिनां च सम्यक्त्वमूलानि पञ्चाऽणुव्रतानि त्रयो गुणा-श्चत्वारि शिक्षापदानि च धर्मः । न्यायलब्धविभवः, शिष्टाचारानु-रागवान्, कुल-शीलतुल्यैरन्यगोत्रजैः कृतोद्वाहः, पापभीरुः, प्रसिद्धं देशाचारं समाचरन्, क्वाऽप्यवर्णवादवर्जितोऽनतिव्यक्तगुप्ते स्थाने सुप्रातिवेश्मिकेऽनेकनिर्गमद्वारवर्जितगृहः, सदाचारैः कृतसङ्गो, माता-पित्रोः पूजक, उपप्लुतं स्थानं त्यजन्, गर्हितेऽप्रवृत्त, आयोचितं व्ययं कुर्वन्, वित्तानुसारिवेशवान्, धीगुणैरष्टभिर्युक्तोऽन्वहं धर्मं श्रृण्वानोऽजीर्णे भोजनत्यागी काले च मितपथ्यभोक्ता, परस्पराबाधया त्रिवर्गं साधयन्, अतिथौ दीने साधौ च यथावत् प्रतिपत्तिकृद्, अनाग्रही, गुणेषु पक्षपाती, बलाबलं जानन्, अदेशकालोचितां चर्यां त्यजन्, वृत्तस्थज्ञानवृद्धानां पूजकः, पोष्यपोषको, दीर्घदर्शी, विशेषज्ञः, कृतज्ञो, लोकप्रियः, सलज्जः, सदयः, सौम्यः, परोपकारपरायण, आन्तर-विजयप्रवृत्तो, जितेन्द्रियो जनो गृहिधर्माय कल्पते । यतिधर्माक्षमेण तु मनुष्येण जन्मसाफल्यमिच्छता श्रावकधर्मोऽपि सेव्यः' ।

प्रभोरमूं देशनां श्रुत्वा प्रबुद्धा बहवो जनाः प्राव्रजन् । अनेके च श्रावका जाताः । स्वामिनश्च ये **इन्द्रा**दयोऽष्टादश गणधरा आसन्, ते**ष्विन्द्रः** प्रभौ देशनाविरते देशनां चकार । तत्राऽपि देशनाविरते शक्र-**सुव्रता**दयः प्रभुं प्रणम्य स्वं स्वं स्थानं ययुः ।

❀ ❀ ❀

तत्तीर्थे च समुत्पन्ने चतुर्मुखस्त्र्यक्षः श्वेतवर्णो जटी वृषास्यो दक्षिणैर्बाहुभिर्मातुलिङ्ग-गदा-बाण-शक्तिभृद् वामैश्च नकुला-ऽक्ष-धनुः-पर्शुधारिभिः शोभितो **वरुण**यक्षः, भद्रासनस्थिता गौरवर्णा दक्षिणाभ्यां बाहुभ्यां वरदा-ऽक्षसूत्रधरा वामाभ्यां च मातुलिङ्ग-शूलधरा **नरदत्ता** देवी च प्रभोः **मुनिसुव्रत**स्य शासनदेवते अभूताम्।

ताभ्यां सहितश्च प्रभुर्मेदिनीं विहरन् **भृगुक**च्छे महापुरे समवासार्षीत् । तत्र च हयारूढो नृपो **जितशत्रु**रागत्य वन्दित्वा प्रभोर्देशनां शुश्राव । तस्य नृपस्य हयश्चाऽप्युत्कर्णः पुलकितः स्थिरः स्वामिदेशनामश्रौषीत् । समये च लब्धावसरो गणधरः स्वामिनं पप्रच्छ-'अत्र समवसरणे को धर्मं प्रपेदे ?' स्वाम्यूचे-'**जितशत्रु**हयं विना नाऽन्यः कोऽपि' । ततः सविस्मयो **जितशत्रुः** स्वामिनमपृच्छत्-'कोऽयमश्वः, यो धर्मं प्रत्यपद्यत ?'

ततो भगवानाह-'पुरा **पद्मिनीखण्ड**पत्तने **जिनधर्म**नामा श्रावकोऽभूत्। तस्य च मित्रं **सागरदत्त** आसीत्। स तेन सममन्वहं चैत्येषु ययौ । अन्यदा च स साधुभ्योऽश्रौषीत्-'योऽर्हद्बिम्बानि कारयेत् सोऽन्यभवे धर्ममाप्नुयात्' । तच्छ्रुत्वा च **सागरदत्तः** सौवर्णमार्हतं बिम्बं कारयित्वा समहोत्सवं साधुभिः प्रत्यतिष्ठिपत् । उत्तरायणे स च नगराद् बाहिः स्वयं कारितं समुत्तुङ्गं शिवायतनमगात् । तत्र च शिवार्चकैर्घृतभक्षणाय कृतत्वरैः प्राक्सञ्चितप्रतिशीनघृतकुम्भाः क्रष्टुमारेभिरे । तेषां घटानामधश्च पिण्डीभूय लग्ना उपदेहिका भूपस्य वर्त्मनि पेतुः । **सागरदत्तः** सञ्चरद्भिः पूजकैश्चूर्ण्यमाणास्ताः समीक्ष्य कृपया वस्त्रेणाऽपनेतुं प्रचक्रमे ।

किं श्वेतभिक्षुभिः शिक्षितोऽसीति सोपहासं जल्पता केनचित् पूजकेनाऽङ्घ्रिघातेन ताश्चूर्णिताः । ततश्च तत्क्षणं विलक्षीभूय



**सागरदत्त**स्तच्छिक्षार्थं तदाचार्यमुखं प्रैक्षत । तस्मिंश्च तत्पापमुपेक्षमाणे **सागरदत्त**श्चिन्तयामास-'अहो ? निर्घृणा अमी, धिक् । इमे दारुणाशया गुरुबुद्ध्या कथं पूज्यन्ते ? इमे ह्यात्मानं यजमानं च दुर्गतौ पातयन्ति' । एवं विचिन्त्य स आग्रहात् तत्कर्म कृत्वाऽनासादित सम्यक्त्वोऽपि दान-शीलस्वभावतः कालेन विपद्य महारम्भार्जितधनत्राणपरायणत्वादयं तव जात्योऽश्वोऽभूत् । तद्-बोधायाऽहमिहाऽऽगमम् । प्राग्जन्मकारितजिनप्रतिमायाः प्रभावतोऽयं नो धर्मोपदेशं श्रुत्वा क्षणादपि सम्बुद्धः। भगवतैवमाख्याते नृपेण सोऽश्वः क्षमयित्वा स्वतन्त्रः कृतः । ततः प्रभृति लोके तद् **भृगुकच्छ**पुरम**श्वबोधा**ख्यं तीर्थं ख्यातमभूत् ।

❀ ❀ ❀

प्रभुश्च देशनां पारयित्वा भुवनस्योपचिकीर्षया विहरन् **हस्तिनापुरे** समवासार्षीत् । तस्मिन्नगरे च **जितशत्रु**नामा नृपो वणिक्सहस्त्रेशः श्रेष्ठी **कार्तिक**नामा श्रावकश्चाऽभूत् । तस्मिन पुरे कषायवसनो **भागवतव्रतो** मासं मासं चोपवासी पौरैर्भृशमपूज्यत। तथा सम्यक्त्ववता **कार्तिके**न विना पारणे पारणे पौरैर्न्यमन्त्र्यत च । स च **भागवतव्रतो** भूतवच्छ्रेष्ठिच्छिद्रान्वेषणतत्पर एकदा पारणे **जितशत्रु**णा न्यमन्त्रि । ततः स परिव्राजको 'यदि **कार्तिकः** मे परिवेषणं करोति, तदा तव गृहे भुञ्जे' इत्यूचे । नरेन्द्रश्चाऽऽमित्युक्त्वा तद्गृहं गत्वा 'त्वया **भागवतव्रत**स्य परिवेषणीयमि'ति ययाचे ।

'स्वामिन् ! अस्माकं पाखण्डधारिष्विदं न युज्यते, तथाऽपि तवाऽऽज्ञया कार्य'मेतदित्युक्त्वा स्वीकृतवान् । पुराऽपि चेत् प्राव्रजिष्यं तदा नाऽकरिष्यमिदमिति विचिन्तयन् खेदाच्छ्रेष्ठी राजकुलं ययौ । परिवेषयतश्च तस्य स परिव्राजकस्तर्जनी-

दर्शनैर्मुहुस्तिरस्कारं दर्शयामास । स च श्रेष्ठ्यनिच्छयाऽपि परिवेष्य निर्विण्णः स्वामिपादान्ते वणिक्सहस्रेण समं प्राव्राजीत् । तथा द्वादशाङ्गधरो द्वादशाब्दीं परं व्रतं कृत्वा मृत्वा **सौधर्मे** तत्कल्पेन्द्रः समजायत । स परिव्राजकोऽपि मृत्वाऽऽभियोग्येन कर्मणा तस्यैव वाहन**मैरावणो** द्विपोऽभूत् । तं च शक्रं प्रेक्ष्य सामर्षः पलायितुं प्रवृत्तः प्रसह्य धृत्वाऽऽरुरोह शक्रः । ततः स द्वे शीर्षे चकार । इन्द्रोऽपि यावच्छीर्षो गजस्तावच्छीर्षो बभूव। भूयः पलायमानः स शक्रेण वज्रेणाऽऽहत्य प्राग्जन्मवैरी वशंवदश्चक्रे ।

**सुव्रत**स्वामिनश्चाऽऽकेवलाद् विहरत एकादशमासन्यूना-र्धाष्टमाब्दसहस्र्यगात् । तदानीं प्रभोः परिवारे च श्रमणानां त्रिंशत्सहस्राणि, साध्वीनां पञ्चाशत्सहस्राणि, चतुर्दशपूर्विणां सहस्रार्धम्, अवधिज्ञानिनामष्टादशशतानि, मनःपर्ययिणां पञ्चदशशतानि, केवलिनामष्टादशशतानि, जातवैक्रियलब्धीनां सहस्रद्वितयम्, उत्पन्नवादलब्धीनां सहस्रं द्वे शते, श्रावकाणां लक्षमेकं द्वासप्ततिसहस्री च, श्राविकाणां सार्धा त्रिलक्षी चाऽभवन् । निर्वाणकाले च **मुनिसुव्रत**नाथः **सम्मेता**द्रिं गत्वा मुनिसहस्रेण सममनशनं प्रपद्य मासान्ते ज्येष्ठकृष्णनवम्यां श्रवणस्थे चन्द्रे तैर्मुनिभिः सममव्ययं पदं प्राप ।

तदेवं **मुनिसुव्रत**नाथस्य कौमार-व्रतयोः पृथक् सार्धाः सप्ताब्दसहस्राः, राज्ये पञ्चदश, एवं त्रिंशद्वर्षसहस्राण्यायुः । श्री**मल्लिस्वामि**निर्वाणाच्च चतुष्पञ्चाशदब्दलक्षेषु गतेषु **मुनिसुव्रत**-नाथनिर्वृतिरभूत् । सुरेन्द्राश्च समुपेत्य तैर्मुनिभिः सममव्ययं पदं गतवतो **मुनिसुव्रत**नाथस्य मोक्षमहिमानं विदधुः ॥ ७ ॥

*इति श्रीमुनिसुव्रतजिनचरितवर्णनात्मकः सप्तमः सर्गः ॥७॥*

## अष्टमः सर्गः

### श्रीमहापद्मचक्रिचरितम्

अथ जिनेन्द्रे **मुनिसुव्रते** विहरत्येव **महापद्म**चक्री बभूव । तच्चरितं यथा–इह **जम्बूद्वीपे प्राग्विदेहे**षु **सुकच्छ**विजये **श्रीनगरे** पुरे **प्रजापालो** नाम राजा बभूव । एकदा स आकस्मिकं विद्युत्पातं दृष्ट्वा विरक्तबुद्धिः **समाधिगुप्त**मुनेः समीपे व्रतमादाय चिरं पालयित्वा विपद्याऽ**च्युतेन्द्रो**ऽभूत् ।

इतश्च **जम्बूद्वीपे भरते हस्तिनापुरे** इक्ष्वाकुवंशे **पद्मोत्तरो** नाम नृपो बभूव । तस्य च **ज्वाला**नाम्नी महिष्यासीत् । तस्यां च तस्य केसरिस्वप्नसूचितो **विष्णुकुमारो** नाम प्रथमः पुत्रो जज्ञे । तथा **प्रजापाल**जीवोऽ**च्युता**च्च्युत्वा **ज्वाला**देव्या उदरे समवतीर्णश्चतुर्दशमहास्वप्नसूचितो **महापद्मो** नाम सुतोऽभवत् । तावुभावपि कुमारौ क्रमेण वर्धमानौ सर्वाः कला आचार्याज्जगृहतुः । तयोश्च **महापद्म**कुमारो जिगीषुरिति ज्ञात्वा **पद्मोत्तर**नृपेण यौवराज्ये निदधे ।

इतश्चो**ज्जयिनी**नगरे **श्रीवर्मा** नाम नृपस्तदमात्यो **नमुचि**श्चा-ऽभूताम् । एकदा च विहरन् **मुनिसुव्रत**दीक्षितः **सुव्रतो** नामा-ऽऽचार्यः तत्र पुरे समवासरत् । तद्वन्दनाय गच्छतो नागरान् जनान् दृष्ट्वा क्वेमे गच्छन्तीति नृपो **नमुचिं** पृष्टवान् । **नमुचि**ना च श्रमणवन्दनाय गच्छन्तीत्युक्तश्च नृपो वयमपि याम इत्यवोचत् । ततो

**नमुचि**ना यदि वो धर्मशुश्रूषा, तर्ह्यहमेव वक्ष्ये इत्युक्तोऽवश्यं गमिष्यामीत्युक्तवान् नृपः । 'स्वामिना मध्यस्थवृत्तिना स्थेयम्, अहं तान् वादे जेष्यामी'ति मन्त्र्यूचे' । ततो नृपः सपरिवारस्तत्र ययौ ।

तत्र च ते मुनिभ्यो धर्मं पप्रच्छुः । ते मुनयश्च तेषां विविधोक्तिभिर्मौनेनैव तस्थुः । ततः क्रुद्धो **नमुचि**रार्हतं शासनं निन्दयामास। ततः कस्मिंश्चिन्मुनौ तत्प्रतिवादायोद्यते स **नमुचि**'रशौचाः पाखण्डिनस्त्रयीबाह्याश्च यूयं स्वमण्डले संवासयितुं न युक्ता' इति स्वपक्षमस्थापयत् ।

ततो मुनिरुवाच-'सुरतमशौचं विदुः, तत्सेवकश्च पाखण्डी, स एव च त्रयीबाह्यः । यत 'उदकुम्भः कण्डनी पेषणी चुल्ली प्रमार्जनी चेति पञ्च सूना गेहिनां पापायेति त्रय्यामर्थः । अतो ये इमाः सूनाः सेवन्ते त एव त्रयीबाह्याः । वयं सूनापञ्चकहीना न नाम त्रयीबाह्याः' । एवं तेन मुनिना सयुक्तिकं निरस्तः स मन्त्री राजा पौरजनश्च स्वं स्वं स्थानं ययुः । निशि च **नमुचि**रुत्थाय क्रुद्धो निशाचर इव तन्मुनिवधाय समायातः शासनदेव्या स्तम्भितः प्रभाते विस्मितैर्जनैर्ददृशे । नृपादयश्च धर्मं श्रुत्वोपाशाम्यन् । **नमुचि**श्च तदपमानात् तन्नगरं त्यक्त्वा **हस्तिनापुर**मगात् । **महापद्म**श्च तं स्वसाचिव्ये चकार ।

इतश्च प्रान्तवास्तव्यो दुर्गस्थोऽतिबली **सिंहबलो** नाम नृपो **महापद्म**स्य मण्डलमवस्कन्दमवस्कन्दं पुनः स्वं दुर्गं प्राविशत् । तं धर्तुं कोऽपि क्षमो न बभूव । ततः क्रुद्धो **महापद्मो नमुचि**मन्त्रिणमूचे-'**सिंहबल**ग्रहे क्वचित् कञ्चिदुपायं वेत्सि ?' ततः स उवाच-'देव ! वेद्मीति वचः कथमहं वच्मि, गृहे वदतां हि गेहेनर्दीत्यपवादः सुलभः, अत उपायं कृत्वा फलेनैव तं दर्शयामि, वचसोपायं वक्तुं कातरा अपि पण्डिता भवन्ति' । ततो हृष्टचित्तेन **महापद्मे**नाऽऽदिष्टः स वायुरिवाऽप्रतिहतः **सिंहबल**स्य दुर्गं गत्वा तीक्ष्णोपायस्तद्दुर्गं भङ्क्त्वा **सिंहबलं** च सिंहो मृगमिवाऽऽदाय **महापद्म**मुपाययौ । ततो वरं वृणीष्वेति **महापद्मे**नाऽभिहितः स समये वरमादास्य इत्यवोचत् । एवं कृतार्थः स **महापद्मो नमुचि**ना कृतसाचिव्यं यौवराज्यमपालयत् ।



अथ **महापद्म**मात्रा **ज्वाल**याऽर्हत्प्रतिमारथोऽकारि, मिथ्यादृष्ट्या सपत्नीमात्रा **लक्ष्म्य**भिधानया तद्विरुद्धविधित्सया ब्रह्मरथोऽकार्यत । तथा तयाऽयं ब्रह्मरथः पूर्वं पत्तने भ्रमतु, पश्चादर्हद्रथ इति भूपतिरयाच्यत । ततो **ज्वालो**चे-'यद्यर्हद्रथः प्राक् पत्तने यात्रां न करिष्यति, तदा ममाऽनशनं भावि' । ततश्च संशयापन्नो नृप उभयो रथयोर्यात्रामरुणत् । तथा मातृदुःखेनाऽतिपीडितः स नृपो निशि लोकेषु सुप्तेषु **हस्तिनापुराद्** निर्गत्य स्वैरमुन्मुखो गच्छन्नेकां महाटवीं प्राप्य तत्र पर्यटन्नेकं तापसाश्रममपश्यत् । तापसैः कृतसत्कारः स नृपः स्ववेश्मवत् तत्र तस्थौ ।

इतश्च **चम्पा**पुर्यां नृपो **जनमेजयः काल**नरेन्द्रेण रुद्धो युयुधे मृतश्च । ततस्तस्मिन् पुरे भज्यमानेऽन्तःपुरस्त्रियो नेशुः । **चम्पेश**स्य प्रिया **नागवती** च स्वसुतया **मदनावल्या** सह प्रणष्ट्वा तत्तापसाश्रममगात् । तत्र च **महापद्म-मदनावल्यो**रन्योन्यदर्शनमनुरागश्च जज्ञे । ततो जातानुरागां ज्ञात्वा जनन्यवोचत-'पुत्रि ! चापलं मा कार्षीः, नैमित्तिकवचः स्मर, त्वं चक्रिणः पत्नी भविष्यसीति पुरा नैमित्तिकेनाऽऽख्यातम् । ततो यत्र तत्राऽपि पुरुषेऽनुरागं मा कृथाः । संयता तिष्ठ, त्वां चक्री परिणेष्यति' ।

कुलपतिश्च तद्विप्लवभयात् **पद्म**मूचे-'यत्राऽचालीस्तत्र गच्छ, तुभ्यं स्वस्ति' । ततः **पद्मो** दध्यौ-'युगपद् द्वौ चक्रिणौ च भवतः, अहमेवेह चक्री भावी, तदसौ ममैव पत्नी' । एवं निश्चित्य स तापसाश्रमाद् निर्गत्य पर्यटन् **सिन्धुसदनं** नाम पत्तनमगात् । तदा च पौरनार्यो मधूत्सवे कामवशंवदा उद्याने विविधं चिक्रीडुः । तत्केलितुमुलं श्रुत्वा च क्षुब्धः करी **महासेन**महीपतेः स्तम्भमुन्मूलयामास । तथाऽऽरोहकौ निपात्य प्रतीकारमवगणय्य झगिति पौरनारीर्निकषा समाययौ । ताश्च नार्योऽतिसाध्वसात् पलायितुमशक्तास्तत्रैव तस्थुस्तारतारं चुक्रुशुश्च । ततः स **पद्म**स्ताः प्रेक्ष्य सानुक्रोशंस्तमभिधाव्य गजं ततर्ज । तेन क्रुद्धो गजः **पद्मा**भिमुखं ववले । ततश्च ताः स्त्रियोऽस्मद्रक्षाकृते कोऽपि महात्माऽऽत्मानं करिणः पुरोऽक्षिपदिति चुक्रुशुः । **पद्म**श्च क्षणेन समीपमागतस्य मत्तगजस्य सम्मुखमूर्ध्ववस्त्रमुदक्षिपत् । गजश्च कुमारबुद्ध्या तद्वासो मुहुर्विदारयामास ।

तदानीमेव च नागराः सामन्तादिपरिवृतो नृपश्च **महासेन**स्तत्र तुमुलेनाऽमिलन् । **महासेन**श्चा-'ऽकालमृत्युतुल्येनाऽनेन क्रोधितेन गजेनाऽलमि'ति त्वमपसरैति **पद्म**मुवाच । **पद्म**श्चोवाच-'त्वया युक्तमुक्तं, किन्त्वारब्धस्य त्यागो मे परं व्रीडाकरम् । त्वमिमं मत्तगजं मया बध्यमानं वशीकृतं पश्य, सौजन्यकातरो मा भूः' । एवमुक्त्वा कुमारेण मुष्टिना वस्त्रविदारणायाऽधोमुखो गजस्ताडितो यावत् कुमारग्रहणायोत्तस्थौ, तावद् विद्युद्गत्या स **पद्म**स्तमारुरोह । तथा मण्डूकासनादिभिरग्रतः पार्श्वतश्चाऽपि विचरंस्तमखेदयत् । तथा कुम्भदेशे चपेटाभिः कण्ठेऽङ्गुष्ठतारणैः पृष्ठे पादन्यासेन च स गजः **पद्मे**नाऽऽकुलीकृतः । स **पद्मः** साधु साध्विति वादिभिः पौरैः



सविस्मयं वीक्ष्यमाणो नृपेण बन्धुबुद्ध्या वर्ण्यमानस्तं गजं स्वैरं क्रीडां कारयन् भ्रमयामास । तथाऽपरस्मा आरोहकाय समर्प्य कक्षां गृहीत्वा ततोऽवातरत् । ततो **महासेन**स्तं विक्रम-रूपाभ्यां कुलीन इति वितर्क्य निजवेश्मनि निन्ये । तथा निजं कन्याशतं तेन परिणिन्ये । ताभिश्च समं भोगान् भुञ्जानस्याऽपि तस्य **पद्म**स्य **मदनावल्याः** स्मरणं नित्यमेवाऽभवत् ।

अन्यदा च निशि पर्यङ्के सुप्तः स **पद्मो** विद्याधर्या **वेगवत्या** वायुवेगयाऽपजह्रे । निद्राच्छेदे च 'क्षुद्रे ! किं मां हरसे' ? इति ब्रुवन् मुष्टिमुत्पाटयामास । ततः सोचे-'मा कुपः, श्रृणु, **वैताढ्य**पर्वते **सूरोदय**पुरे **इन्द्रधनु**र्नाम विद्याधरः, **श्रीकान्ता** नाम तत्पत्नी, **जयचन्द्रा** नाम तत्सुता च सन्ति । सा च **जयचन्द्रा**ऽनुरूपवराप्राप्त्या पुरुषद्वेषिणी जाता । तस्यै च नृपाणां रूपाणि पटेष्वालिख्य मया दर्शितानि, परन्तु तस्यै न किमप्यरुचत् । अन्यदा च पटे त्वद्रूपं मया लिखितं दृष्ट्वा सा कामवशंवदा जाता, सेदानीं त्वां प्राणप्रियं मन्यते । सा हि 'मे **पद्मः** पतिर्भवतु, अन्यथा मम मरणं शरणमि'ति प्रतिज्ञामकरोत् । पितृभ्यां च मया कृत्वा तस्यास्त्वय्यनुरागं ज्ञात्वा त्वदानयनहेतवेऽहमादिष्टाऽस्मि । **वेगवती** चाऽहमद्यैव तमानयिष्यामि, वह्निप्रवेशं मा कुर्विति तामाश्वास्य त्वां नयामि । ततो मा कुपः' ।

ततः **पद्मे**नाऽनुज्ञाता सा तं **सूरोदय**पुरेऽनयत् । प्रभाते **चेन्द्रधनु**नृपेण पूजितश्चन्द्रो रोहिणीमिव स **जयचन्द्रा**मुपायंस्त । ततो **जयचन्द्रा**मातुलेयौ **गङ्गाधर-महीधरौ** विद्याधरौ तद्विवाहं समाकर्ण्य कुपितौ सर्वाभिसारेण **सूरोदय**पुरे **पद्मे**न योद्धुं समाययतुः ।

**पद्मो**ऽपि रणदुर्मदो विद्याधरपरिवारैरन्वितो नगराद् निरगात् । तथा कांश्चित् त्रासयन्, कांश्चिद् निघ्नन्, कांश्चित् ताडयंश्च हरिर्द्विपानिव वैरिसैन्यानयोधयत् । ततः स्वसैन्यभङ्गमालोक्य तौ विद्याधरौ **गङ्गाधर-महीधरौ** जीवग्राहं प्रणेशतुः ।

ततश्चोत्पन्नचक्रादिरत्नः **पद्मः** षट्खण्ड**भरतक्षेत्र**विजयं विधाय स्त्रीरत्नं **मदनावलीं** स्मरंस्तदाश्रमपदं ययौ । तापसैः कृतातिथ्यः **पद्मो जनमेजय**राजेन कन्यादानपूर्वकं **मदनावलीं** प्राप्य **हस्तिनापुर**मेत्य पितरौ ननाम । पितरौ च स्वसूनोश्चरितमाकर्ण्य सिक्तौ द्रुमाविव सोच्छ्वासावभूताम् ।

❁ ❁ ❁

तदानीं च **मुनिसुव्रत**दीक्षितः **सुव्रतो** नाम मुनिर्विहरंस्तत्राऽऽगत्य समवासरत् । **पद्मोत्तर**श्च सपरिवारो गत्वा नत्वा देशनां च शुश्राव । जातवैराग्यो गृहमागत्य **विष्णुकुमार**स्य परिव्रज्याजिघृक्षां ज्ञात्वा **पद्मं** राज्ये चक्रित्वाभिषेकेण सहाऽभिषिच्य निष्क्रमणोत्सवपूर्वकं **सुव्रत**मुने**र्विष्णुकुमारे**ण सह दीक्षामाददे । ततः **पद्मो**ऽपि सर्वैर्जनैः पूज्यमानं मातृकमार्हतं रथं पुरेऽभमयत् । **पदमोत्तरा**दिभिः सह **सुव्रत**सूरयोऽपि रथभ्रमणकालं यावत् तत्रैव तस्थुः । तथा **पद्म**चक्रिणा जिनशासनस्योन्नतिश्चक्रे । ग्राम-पुरादिषु कोटिश उच्चकैश्चैत्यानि कारयामास । **पद्मोत्तर**श्च गुरुभिः सार्धं विहृत्य व्रतं पालयित्वोत्पन्नकेवलः परमं पदं प्राप । **विष्णुकुमारो**ऽपि चाऽद्भुतं तपस्तप्यमानोऽनेकलब्धिसम्पन्नो जातः ।

अन्यदा च **सुव्रता**चार्याः साधुभिः परिवारिता वर्षर्त्तुयापनाय **हस्तिनापुरं** समागत्य न्यवसन् । **नमुचि**मन्त्री चाऽऽचार्यागमनं श्रुत्वा प्राग्वैरप्रतियातनां चिकीर्षु**र्महापद्मं** व्यजिज्ञपत्-'नृप ! प्राक्प्रतिपन्नो



मे वरो दीयताम्' । याचस्वेति तेनोक्तश्च 'यज्ञमहं करिष्यामि, तत्समाप्ति यावद् निजं राज्यं देही'त्युक्तवान् । नृपश्च सत्यप्रतिज्ञो **नमुचिं** राज्ये निवेश्याऽन्तःपुरं प्राविशत् । **नमुचि**श्च पुराद् निर्गत्य यज्ञमण्डपे दीक्षितोऽभवत् । तदा तस्याऽभिषेककल्याणं कर्त्तुं सर्वाः प्रजाः श्वेतभिक्षून् विना सर्वे साधवश्च समाययुः । सर्वे समागताः, किन्तु श्वेतभिक्षवो नाऽऽगता इति मात्सर्यात् स तच्छिद्रमग्रे चक्रे ।

तथा स गत्वा **सुव्रता**चार्यमब्रवीत्-'यो यदा नृपस्तदा लिङ्गिनस्तं श्रयन्ति, राजरक्ष्याणि तपोवनानीति तपोधनै राजाभिगम्यः क्रियते, तपः षष्ठांशभाक् च क्रियते, यूयं च मन्निन्दकाः पाखण्डिनो लोकराज्यविरुद्धाचाराः, तद्युष्माभिर्मे राज्ये न स्थातव्यम्। यः स्थास्यति स खलाशयो मे वध्यो भवेत्' । ततः सूरिरूचे-'एष कल्पो नेति त्वय्यभिषिक्ते वयं न प्राप्ताः, त्वां च किञ्चनाऽपि न निन्दामः' । ततः क्रुद्धः स पुनरुवाच-'विस्तरैः कृतं, सप्ताहाधिकमत्र तिष्ठन्तो यूयं दस्युवद् मया निग्राह्याः' । एवमुक्त्वा स स्वं स्थानं जगाम ।

सूरिश्च मुनीनपृच्छत्-'इह किं कर्त्तव्यमिति यथाशक्ति यथामति ब्रूत' । तत्रैकः साधुरूचे-'**विष्णुकुमारः** षष्टिवर्षशतीं तपस्तप्तवान्, स सम्प्रति **मन्दरे**ऽस्ति, स च **पद्मराज**स्याऽग्रज इति तद्वचनादसौ शान्तिं यास्यति, यतः **पद्म**वत् सोऽपि **नमुचेः** स्वामी । ततो यो विद्यालब्धिमान् स साधुस्तमानेतुं प्रयातु । सङ्घकार्ये लब्ध्युपयोगो न दोषाय' । तत एकः साधुरुवाच-'विहायसा तत्र गन्तुं शक्तोऽस्मि, न त्वागन्तुमिति यदत्र कृत्यं तद् ब्रूत' । ततस्त्वां **विष्णु**रेव समानेष्यतीति गुरुणोक्ते स तार्क्ष्यवदुत्पत्य **विष्णुं** प्राप्तवान् ।

**विष्णु**श्च तं दृष्ट्वा दध्यौ-'किमपि सङ्घकार्यं, तद्वेगाद-सावायाति, अन्यथा प्रावृट्काले साधूनां विहारो न भवेत् । ततोऽन्यथा ते लब्धीनामुपयोगं न कुर्युः' । ततः स तं मुनिमभिनन्द्य तदागमकारणं ज्ञात्वा तं मुनिं गृहीत्वा विहायसा **हस्तिनापुर**मेत्य गुरुं वन्दित्वा ससाधुपरिवारो **नमुचि**मुपेत्य धर्मकथापूर्वमवोचत्-'इमे मुनयो यावत् प्रावृषमिहैव तिष्ठन्तु, स्वयमप्येते चिरमेकत्र न तिष्ठन्ति, किन्तु वर्षासु जन्तुबाहुल्याद् विहारो न कल्पते, अस्माभिर्भैक्ष-वृत्तिभिश्च महति पुरे वसद्भिर्न ते काऽपि हानिः' । ततो मन्त्री कुपितः प्राह-'तव वचनैरलम्, इह वो वस्तुं न ददामि' । ततो **विष्णुः** पुनरुवाच-'इमे नगराद् बहिः स्थिता उद्यान एव वसन्तु' । ततश्चाऽतिक्रुद्धः सचिवस्तमब्रवीत्-'अहं वो गन्धमपि न सहे, अलं प्रार्थनैः, पुरस्याऽन्तर्बहिर्वाऽपि दस्यूनामिव मर्यादाहीनानां श्वेतवाससां वासो न भविष्यति । यदि वः प्राणाः प्रियाः तदा द्रुतमपसरत, अन्यथा तार्क्ष्यः सर्पानिव वो हनिष्यामि' ।

एवं तदुक्त्योद्दीपितो **विष्णु**र्वामनो बलिमिव स्थातुं त्रिपदी-मयाचत । ततो **नमुचि**ना 'दत्ता वस्त्रिपदी, यस्ततो बहिः स्यात् तं हनिष्यामी'त्युक्तो **विष्णु**र्देहीत्युक्त्वा वर्धमानः किरीटादिभूषितो, वज्राद्यस्त्रभृत्, खेचरान् भ्रंशयन्, पदाघातैर्महीं कम्पयन्, जलनिधी-नुत्तालयन्, आपगाः कुर्वाणो, ज्योतिश्चक्राणि पर्यस्यन्, पर्वतवरानपि दारयन्, महातेजा, महौजाः, सर्वभयङ्करो, नानारूपो **मेरु**समो-ऽभवत् ।

ततस्त्रिजगत्क्षोभमालोक्य शक्रस्तं प्रसादयितुमप्सरसः समादिशत् । ताश्च तस्य कर्णमूले जगुः-'कोपाज्जना इहाऽपि



दह्यन्तेऽसकृद् मुह्यन्ति च, विपद्य चाऽनन्तदुखं नरकं यान्ति' । एवं कोपं शमयितुं किन्नरादिस्त्रियोऽपि जगुर्ननृतुश्च । ततश्च **विष्णुर्नमुचिं** धरण्यां क्षिप्त्वा मध्येपूर्वापराम्बुधि पादं ददौ । **पद्म**श्चाऽपि ज्ञातवृत्तान्तः ससम्भ्रमः समुपेत्य स्वप्रमादेन तेन मन्त्रिदोषेण च चकितः स्वमग्रजं तं मुनिं नमस्कृत्य रचिताञ्जलिरवदत्-'स्वामिन् ! त्वयि विजयिनि सति चेतसा तातः **पद्मोत्तरो**ऽद्याऽपि तिष्ठति, अमुना मन्त्रिणा क्रियमाणां श्रीसङ्घाशातनां न जानामि, तथा-ऽप्यपराध्यस्मि, स्वामिनो हि भृत्यदोषेण गृह्यन्ते, अहं भृत्यस्त्वं च मम स्वामीति कोपं संहर, त्रैलोक्यं प्राणशंसये समारूढं त्रायस्व' ।

एवमन्येऽपि सुरा-ऽसुरादयः श्रीसङ्घश्च तं मुनिं सान्त्वया-मासुः । किन्तु सोऽतिशब्दपथां वृद्धिं प्राप्तो नाऽशृणोत्, अतः सर्वेऽपि भक्तितस्तस्य पादस्पर्शं व्यधुः । पादस्पर्शेन च सोऽधस्तान् निजं भ्रातरं सङ्घ-सुरादींश्चाऽपि दृष्ट्वा दध्यौ-'अयं श्रीसङ्घोऽयं मे दीनो भ्राता, एते च सुरादयः कोपोपसंहारकृते मां युगपत् सान्त्वयन्ति ततः सङ्घो मान्यः **पद्मा**दयश्चाऽनुकम्प्याः । एवं विमृश्य वपुर्वृद्धिं संहृत्य प्रकृत्यवस्थायां तस्थौ । सङ्घानुरोधाच्च **नमुचिं** मुक्तवान् **पद्म**श्च तं निरवासयत् । तया त्रिपद्या च स मुनिस्तत्प्रभृति जगत्त्रये **त्रिविक्रम** इति ख्यातिमाससाद । ततः स सङ्घकार्यं कृत्वा परं तपस्तप्त्वा **विष्णुकुमार** उत्पन्नकेवलः परमं पदं प्राप ।

**पद्मो**ऽपि भवोद्विग्नो राज्यं त्यक्त्वा सद्गुरोरन्ते प्रव्रज्यामाददे । तस्य च कौमारेऽब्दपञ्चशती, मण्डलित्वे च तावती, दिग्जये त्र्यब्दशती, चक्रित्वे च सप्तशतीयुताऽष्टादशसहस्राब्दी, व्रते च दशसहस्रीत्येवं त्रिंशद्वर्षसहस्राण्यायुः । ततः स नानाविधा-

भिग्रहपूर्वकं तीव्रं तपस्तप्यमानः **पद्मः** उत्पन्नकेवलोऽव्ययं पदं प्राप ॥ ८ ॥

**इति षष्ठे पर्वणि श्रीपद्मचक्रिचरितवर्णनात्मकोऽष्टमः सर्गः ॥ ८ ॥**

इति कलिकालसर्वज्ञश्री**हेमचन्द्राचार्य**विरचित**त्रिषष्टिशलाकापुरुषचरितस्य**
तपोगच्छाधिपति-शासनसम्राट्-बालब्रह्मचारि-कदम्बगिरि-
तालध्वज-राणकपुर-कापरडाद्यनेकतीर्थोद्धारकाचार्यवर्य-
श्रीमद्विजय**नेमिसूरीश्वर**पट्टालङ्कार-
समयज्ञ-शान्तमूर्त्याचार्यवर्यश्रीविजय**विज्ञानसूरीश्वर**पट्टधर-
सिद्धान्तमहोदधि-प्राकृतविशारदाचार्यवर्यश्रीविजय**कस्तूरसूरीश्वर**शिष्यरत्न-
प्रख्यातव्याख्यातृ-कविरत्नश्रीविजय**यशोभद्रसूरीश्वर**शिष्यरत्न-
श्रीविजय**शुभङ्करसूरीश्वर**कृते
**गद्यात्मकसारोद्धारे** षष्ठे पर्वणि

***समाप्तं श्रीकुन्थुनाथादिचतुर्दशशलाकापुरुषचरितप्रतिबद्धं***
***षष्ठं पर्व ॥ ६ ॥***

॥ अर्हम् ॥

॥ श्रीनेमि-विज्ञान-कस्तूर-यशोभद्रसूरिसद्गुरुवरेभ्यो नमः ॥

# त्रिषष्टिशलाकापुरुषचरितम्-

## गद्यात्मकसारोद्धारः

### राम-लक्ष्मण-रावणचरितप्रतिबद्धं

## सप्तमं पर्व

## प्रथमः सर्गः

अथाऽत्र **भरते रक्षोद्वीपे**ऽर्हतोऽ**जित**स्य काले **लङ्का**नगर्यां रक्षोवंश्यो **घनवाहनो** नाम नृपो बभूव । स स्वपुत्राय **महारक्ष**से राज्यं दत्त्वाऽ**जितस्वामि**पादान्ते परिव्रज्य शिवं ययौ । **महारक्षा** अपि चिरं राज्यं भुक्त्वा स्वपुत्राय **देवरक्ष**से राज्यं दत्वा प्रव्रज्य चाऽव्ययं पदं प्राप । एवमसङ्ख्यातेषु **रक्षोद्वीपा**धिपेषु गतेषु **श्रेयांस**जिनतीर्थे **कीर्तिधवलो** नाम राक्षसेश्वरो बभूव ।

तदानीं च **वैताढ्य**गिरौ **मेघपुरे** नगरेऽ**तीन्द्रो** नाम विश्रुतो विद्याधरेन्द्रोऽभूत् । तस्य च **श्रीमत्यां** कान्तायां **श्रीकण्ठो** नाम पुत्रो **देवी**नाम्नी पुत्री चाऽभूत् । चारुनेत्रां तां च **देवीं रत्नपुरे**श्वरः **पुष्पोत्तरो** नाम विद्याधरः स्वपुत्रस्य **पद्मोत्तरस्या**ऽर्थे ययाचे । **अतीन्द्र**श्च दैवनियोगात् गुणिने श्रीमते चाऽस्मा अदत्त्वा तां

**कीर्तिधवला**य ददौ । तां **कीर्तिधवले**नोढां श्रुत्वा **पुष्पोत्तर**नृपोऽ**तीन्द्रे**ण **श्रीकण्ठे**न च सह वैरायते स्म ।

एकदा च **मेरो**र्निवृत्तेन **श्रीकण्ठे**न **पुष्पोत्तर**स्य दुहिता रूपतः पद्मेव **पद्मा** ददृशे । अन्योन्यदर्शनाच्च तयोः सद्य एवाऽन्योन्यमनुरागोऽभूत् । सा **पद्मा** **श्रीकण्ठा**योन्मुखाम्बुजा स्निग्धया दृशा तिष्ठते स्म । **श्रीकण्ठ**श्चाऽपि तदभिप्रायं विज्ञाय कामातुरस्तामादाय व्योममार्गेण द्रुतं गन्तुं प्रववृते । ततश्चेटिकाः 'कोऽपि **पद्मां** हरती'ति पूत्कुर्वन्ति स्म । **पुष्पोत्तर**श्च तज्ज्ञात्वा सन्नह्य सबलोऽन्वधावत् । ततः **श्रीकण्ठो** द्रुतं **कीर्तिधवलं** शरणं गत्वा सर्वं **पद्मा**हरणवृत्तान्तं कथयामास । **पुष्पोत्तर**श्च सैन्यैस्तत्र प्राप्तः **कीर्तिधवले**न दूतेन 'वोऽयमविमृश्य युद्धप्रयासो वृथा, कन्या ह्यवश्यं कस्मैचन दातव्या, तत्र यदि तयाऽसौ **श्रीकण्ठः** स्वयं वृतस्तदाऽसौ नाऽपराध्यति । अतः स्वपुत्रीमनो बुध्वा भवतो वधू-वरयोर्विवाहकृत्यमेव कर्त्तुं साम्प्रतमि'ति निवेदितः । **पद्मा**ऽपि दूतीमुखेन 'मया स्वयमसौ वृतः, तदसौ नाऽपराध्यति, नाऽमुनाऽहं हृते'ति व्यजिज्ञपत् । तच्छ्रुत्वा च क्षणाच्छान्तकोपः **पुष्पोत्तर**स्तत्रैवोत्सवेन महीयसा तयोर्विवाहं सम्पाद्य यथागतं निजपुरं ययौ ।

ततः **कीर्तिधवलः** **श्रीकण्ठम**वोचत्-'अत्रैव तिष्ठ, यद् **वैताढ्ये** युष्माकं भूयांसो विद्विषो वर्त्तन्ते । अस्यैव **राक्षसद्वीप**स्योत्तरदिशि योजनत्रिशतीमानोऽदूरेणैव **वानरद्वीपो**ऽस्ति । अन्येऽपि **बर्बरकूल-सिंहल**प्रमुरवाः स्वर्गखण्डतुल्या मम द्वीपाः सन्ति । तेषामेकत्र कुत्राऽपि राजधानीं निवेश्य मम समीपस्थः सुखमास्स्व । यद्यपि ते शत्रुभ्यो मनागपि भयं नाऽस्ति, तथाऽप्यस्मद्विरहभयाद् गन्तुं नाऽर्हसि' ।



तेन सस्नेहमेवमुक्तः **श्रीकण्ठ**स्तद्वियोगकातरो **वानर**द्वीपं निवासं प्रतिपद्य तत्र **किष्किन्धा**द्रौ **किष्किन्धां** नाम महापुरीं निवेश्य **कीर्तिधवले**न तद्राज्ये निवेशितस्तत्र भ्राम्यतो महादेहान् फलाशिनो रम्यान् भूयसो वानरानपश्यत् । ततश्च स तेषाममारिमाघोष्याऽन्न-पानाद्यदापयत् । यथा राजा तथा प्रजेति तानन्येऽपि सच्चक्रुः । तत्प्रभृति च कौतुकाद् विद्याधराश्चित्रे लेप्ये ध्वज-च्छत्रादिचिन्हेषु च वानरानेव चक्रुः । **वानर**द्वीपराज्येन वानरचिन्हैश्च ते विद्याधरा अपि वानराः कीर्त्यन्ते ।

अथ **श्रीकण्ठ**स्याऽप्रतिहतपराक्रमो **वज्रकण्ठो** नाम सुतो जज्ञे । एकदा च श्री**श्रीकण्ठः** शाश्वतार्हतां यात्रायै **नन्दीश्वरं** गच्छतोऽमरानद्राक्षीत् । ततः सोऽपि च भक्त्या तेषामन्वचालीत् । तस्य च गच्छतो विमानं **मानुषोत्तरे** मार्गस्थपर्वते नदीवेग इव स्खलितम् । ततो 'मया पूर्वजन्मन्यल्पं तपस्तेपे, तेन **नन्दीश्वरा**र्हद्यात्रायां मम मनोरथो नाऽपूर्यते'ति निर्विण्णः सद्य एव प्रव्रज्य तीव्रं तपस्तप्त्वा सिद्धिं प्राप ।

अथ **श्रीकण्ठ**तो **वज्रकण्ठा**दिष्वनेकशोऽतीतेषु **मुनिसुव्रत**तीर्थे **घनोदधि**र्नाम नृपोऽभवत् । **लङ्का**पुर्यामपि तदा **तडित्केशो** राक्षसेश्वरोऽभूत् । तयोर्द्वयोश्च स्नेहो जज्ञे । एकदा च **तडित्केशः** सान्तःपुरवधूजनः क्रीडितुं **नन्दनो**द्यानं ययौ । तस्मिन् क्रीडासक्ते च कोऽपि कपिर्द्रुमादुत्तीर्य तन्महिष्याः **श्रीचन्द्रायाः** कुचौ नखैर्विलिलेख । ततोऽतिक्रुद्ध**स्तडित्केश** एकेन बाणेन तं कपिं जघान । बाणप्रहारपीडितश्च स कपिः किञ्चिद् गत्वैकस्य प्रतिमास्थस्य साधोरग्रे पपात । स साधुश्च तस्मै नमस्कारमन्त्रमदात् । यत्प्रभावेण मृत्वा सोऽ**ब्धिकुमारो**ऽभवत् । अवधेश्च प्राग्जन्मोपकारिणं ज्ञात्वा

सोऽभ्येत्य तं मुनिं ववन्दे । तथा तत्राऽन्यानपि कपीन् **तडित्केश**-भटैर्हन्यमानान् दृष्ट्वा कोपज्वलितो महाकपिरूपाण्यनेकशो विकृत्य तरु-शिलादिकं वर्षन् राक्षसानुपदुद्राव । **तडित्केश**श्च तं दिव्यप्रयोगं ज्ञात्वा पूजयित्वा 'कोऽसि, किमुपद्रवं करोषी'त्यपृच्छत् । ततोऽर्चया शान्तकोपोऽ**ब्धिकुमारः** स्ववधं नमस्कारप्रभावं च शशंस । ततो लङ्केशस्तेन देवेन सहैवोपेत्य तं मुनिमपृच्छत्-स्वामिन् ! मम कपिना सह को वैरहेतुः ?'

ततो मुनिराचख्यौ-'त्वं पुरा **श्रावस्त्यां दत्तो** नाम मन्त्रिपुत्रोऽभूः। एष च **काश्यां** लुब्धकः । त्वं चोपात्तप्रव्रज्यो **वाराणसीं** गतोऽनेन दृष्टश्चाऽपशकुनमित्याहत्य निपातितः । ततस्त्वं **माहेन्द्र**कल्पे देवो भूत्वा ततश्च्युत्वेहाऽभवः । एषोऽपि नरकं भ्रान्त्वा कपिरभवत्, तदेतद् वैरकारणम्' । ततः स देवस्तं मुनिं वन्दित्वा लङ्केशमनुज्ञाप्य च तिरोदधे । **तडित्केश**श्च तनये **सुकेशे** राज्यं न्यस्य प्रव्रज्य परमं पदं प्राप। **घनोद**धिरपि च **किष्किन्धि**नाम्नि पुत्रे राज्यमाधाय प्रव्रज्य शिवमाप।

❀ ❀ ❀

इतश्च **वैताढ्य**गिरौ **रथनूपुरे** पुरे तदानी**मशनिवेगो** नाम विद्याधरेन्द्रोऽभवत् । तस्य च **विजयसिंह-विद्युद्वेगौ** पुत्रावभूताम्। तत्रैव गिरौ चाऽऽ**दित्य**पुरे **मन्दिरमाली** विद्याधरनृप आसीत् । तस्य कन्या **श्रीमाला**ऽभूत् । तस्याः स्वयंवरे समाहूता विद्याधरेन्द्रा मञ्चेषूपाविशन् । **श्रीमाली** चाऽन्यविद्याधरान् विहाय **किष्किन्धि**-कण्ठे वरमालां निचिक्षेप ।

ततः क्रुद्धो **विजयसिंहो**ऽवोचत्-'एते दुर्नयकारिणो दस्यव इव पुरा निर्वासिताः, तत्केनाऽद्येहाऽऽनीताः?' तदद्याऽपुनरावृत्त्यै पशूनिवैतान् निहन्मि' । एवमुक्त्वा महावीर्यः स उत्थाय **किष्किन्धि**वधायाऽऽयुधमुदक्षिपत् । ततः **किष्किन्धितः सुकेशा**द्या **विजयसिंह**तश्चाऽन्ये विद्याधरा युद्धायोदतिष्ठन्त । ततश्च दारुणे युद्धे प्रवृत्ते **किष्किन्ध्य**नुजोऽ**न्धको** बाणेन तरोः फलवद् **विजयसिंह**स्य शिरोऽपातयत् । ततः **किष्किन्धिः श्रीमालां** जयश्रियमिवाऽऽदायोत्पत्य **किष्किन्धां** ययौ ।



**अशनिवेग**श्च पुत्रवधोदन्तं श्रुत्वा वेगेन **किष्किन्धि**पर्वतं गत्वा **किष्किन्धां** नगरीं सैन्यैरवेष्टयत् । ततो गुहायाः सिंहौ इवाऽ**न्धके**न सहितौ **सुकेश-किष्किन्धी** अपि निरीयतुः । तयोश्च तुमुले युद्धे प्रवृत्तेऽ**शनिवेगो** रोषान्धोऽ**न्धक**स्य **विजयसिंह**स्येव शिरोऽच्छिदत् । ततो वानरसैन्यानि सदैत्यानि दिशोदिशे दुद्रुवुः । **लङ्का-किष्किन्धि**नायकौ च सान्तःपुरपरिवारौ **पाताललङ्का**-मीयतुः । **अशनिवेग**श्च सुतहन्तारं निहत्य शान्तकोपो **निर्घातं** नाम खेचरं **लङ्का**राज्ये निवेश्य निवृत्त्य स्वपुरं **रथनूपुर**मगात् । अन्यदा च जातवैराग्योऽ**शनिवेगः** पुत्रे **सहस्रारे** राज्यं निवेश्य दीक्षा-मुपाददे ।

**पाताललङ्का**यां पुर्यां च **सुकेशस्येन्द्राण्यां माली सुमाली मालवां**श्च पुत्रा अभवन् । **किष्किन्धे**श्च **श्रीमाला**या**मादित्यरजा-रुक्षरजा**श्च पुत्रावभूताम् । अपरेद्युश्च **किष्किन्धिः सुमेरौ** शाश्वतार्हतां यात्रां कृत्वा निवृत्तो **मधुपर्वत**मद्राक्षीत् । तत्र च मनोरमे उद्याने रन्तुमनसा स तस्योपरि **किष्किन्धपुरं** विधाय सपरिवारो न्यवात्सीत् । **सुकेश**स्य पुत्राश्च राज्यमरिभिर्हृतं श्रुत्वा क्रुधाऽग्नय इव प्रज्वलितास्त्रयोऽपि समागत्य **लङ्का**यां **निर्घातं**

खेचरं निगृहीतवन्तः । ततश्च **लङ्कायां माली किष्किन्धायां** च **किष्किन्धि**गिराऽऽ**दित्यरजा** नृपो बभूव ।

इतश्च **वैताढ्ये रथनूपुरे** पुरेऽ**शनिवेग**पुत्रस्य **सहस्रार**स्य **चित्रसुन्दर्या** भार्याया गर्भे प्रच्युत्य कश्चित् सुरोत्तमोऽवातरत् । तया च सुस्वप्नमङ्गले दृष्टे । काले च तस्याः शक्रसम्भोगरूपो दुष्पूरो दुर्वचश्च देहदौर्बल्यकारणं दोहदो जज्ञे । आग्रहेण च पृष्टा सा लज्जानम्रमुखी पत्ये कथञ्चित् तं दोहदं कथयामास । **सहस्रार**श्च विद्यया सहस्राक्षरूपं निर्माय तया शक्र इति ज्ञातो दोहदं पूरयामास। पूर्णे स समये सा पराक्रमिणमिन्द्रसम्भोगदोहदा**दिन्द्र**नामानं सुतं सुखमसूत । **सहस्रार**श्च सम्प्राप्तयौवनाय तस्मै राज्यं दत्वा स्वयं धर्मरतोऽभवत् । स **चेन्द्र** इन्द्रम्मन्यः सर्वान् विद्याधरनृपान् साधयामास । स चतुरो दिक्पालान्, सप्ताऽनीकानि, सप्तानीकपान्, तिस्रः परिषदो, वज्रम**स्त्रमैरावणं** द्विपं, **रम्भादिका** वारवधूर्बृहस्पतिं मन्त्रिणं **नैगमेषि**नामानां पत्त्यनीकनायकं च चक्रे । एवं विद्याधरैरिन्द्रपरिवारनामधेयै**रिन्द्रो**ऽहमेवेति धिया सोऽखण्डं राज्यमन्वशात् ।

**मकरध्वज**स्य पुत्र **आदित्यकीर्ति**कुक्षिजन्मा **ज्योतिःपुरेश्वरः सोमः** प्राच्यां, **वरुणा-मेघरथ**योः पुत्रो **मेघपुरे**श्वरो विद्याधरो **वारुणः** पश्चिमदिशि, **सूर-कनकावल्यो**स्तनयः **काञ्चनपुरेश्वरः कुबेर** उत्तरस्यां, **कालाग्नि-श्रीप्रभा**पुत्रः **किष्किन्ध**नगराधिपो **यम**नामा दक्षिणस्यां दिक्पालोऽभवत् । तमिन्द्राभिमानिन**मिन्द्रं** गन्धगजोऽन्यगजमिव **मालि**भूपतिर्न सेहे । ततः स भ्रातृभिर्मन्त्रिभिश्च मित्रैश्च स**हेन्द्र**युद्धाय चचाल । सिंहादियानैरन्येऽपि सवानरा रक्षोवीराः



प्रचेलुः । तदानीं च **खरा**दयो दक्षिणस्था ववाशिरे । अन्यान्यपशकुनानि दुर्निमित्तानि चाऽभवन् ।

ततः **सुमाली** तं **मालिनं** प्रयाणादवारयत् । **माली** च तद्वचो दोर्बलगर्वितोऽवज्ञाय **वैताढ्यमप्येन्द्रं** युद्धायाऽऽह्वास्त । **इन्द्रो**ऽपि चै**रावणा**रूढो वज्रं पाणिनोल्लालयन्, **नैगमेषि**प्रभृतैश्चमूपतिभिः परिवारितः, **सोमा**द्यैर्लोकपालैरन्यैश्च विद्याधरभटैः सहितो रणक्षेत्रमुपाययौ। तयोः सैन्यानां तुमुले दारुणे युद्धे प्रवृत्ते **चेन्द्र**सैन्येन **मालि**सैन्यमभज्यत । ततो **माली सुमालि**प्रमुखैर्वृतः ससंरम्भोऽभ्यधावत । **इन्द्रो**ऽपि लोकपालादिसहित **ऐरावणा**रूढो रणाय डुढौके। ततश्चिरं युद्धे प्रवृत्ते **मालीन्द्रे**ण वज्रेण हतः । **मालिनि** हते च राक्षसा वानराश्च वित्रस्य **सुमाल्य**धिष्ठिताः **पातालल**ङ्कामीयुः । **इन्द्र**श्च **कौशिका**कुक्षिजन्मने **विश्रवः**पुत्राय **वैश्रमणा**य **लङ्कां** दत्वा निजं पुरं ययौ ।

**पातालल**ङ्कायां पुर्यां तिष्ठतः **सुमालिन**श्च **प्रीतिमत्यां** पत्न्यां **रत्नश्रवा** नाम पुत्रो जज्ञे । सम्प्राप्तयौवनश्च **रत्नश्रवा** विद्यासाधनाय रम्यं **कुसुमो**द्यानं ययौ । तत्रैकत्र विजने स्थाने सोऽक्षमालाधरो नासाग्रन्यस्तदृग् जपन्नालेखित इव स्थिरस्तस्थौ । तत्समीपे च कुमारी रूपवती काऽपि विद्याधरी पित्राज्ञया तस्थौ । तदानीं च नाम्ना **मानवसुन्दरी** महाविद्या 'तव सिद्धाऽस्मी'ति **रत्नश्रवस**मुच्चैरभ्यधात् । **रत्नश्रवा**श्च सिद्धविद्यो जपमालां मुक्त्वा तां पुरःस्थां विद्याधरकुमारिकां दृष्ट्वा 'काऽसि, कस्य सुताऽसि, केन हेतुनेहाऽऽगा' इति पप्रच्छ । ततः साऽप्यूचे-**कौतुकमङ्गले** पुरे **व्योमबिन्दु**र्नाम विश्रुतो विद्याधरपतिरस्ति, तस्य ज्यायसी पुत्री मम स्वसा **कौशिका यक्षपुरे**शेन **विश्रवसो**ढा । तस्या **वैश्रवणो**

नाम तनयोऽधुना **लङ्कायां** शक्राज्ञया राज्यं करोति। **कौशिकायाः** कनीयसी **कैकसी** चाऽहं नैमित्तिकगिरा तुभ्यं दत्तेहाऽऽगमम् । ततः **सुमालि**पुत्रो बन्धुमाहूय तत्रैव तां परिणीय **पुष्पान्तकं** पुरं स्थापयित्वा तया सह क्रीडन्नस्थात् ।

अन्यदा च **कैकसी** निशि स्वप्ने स्वमुखे विशन्तं गजकुम्भ-विदारणप्रसक्तं सिंहमैक्षत । प्रभाते तज्ज्ञात्वा च 'विश्वपराक्रमी ते पुत्रो भविष्यती'ति **रत्नश्रवा** उवाच । ततः सा स्वप्नादनन्तरं चैत्यपूजां च चकार । महासारं गर्भं च बभार । तद्गर्भसम्भवादारभ्य च **कैकस्या** वाणी नितान्तनिष्ठुराऽङ्गं च श्रमाश्रान्तं बभूव । दर्पणे विद्यमानेऽपि च सा खड्गे स्वमुखमपश्यत् । सुरराज्येऽप्याज्ञां दातुमैच्छत् । विनाऽपि हेतुं तस्या मुखं हुङ्कारमुखरमभूत् । गुरुष्वपि मूर्धानं न नमयति स्म । शत्रुमूर्धसु पादं दातुमियेष । एवं प्रभृति दारुणान् भावान् सा गर्भप्रभावतो दधे । पूर्णे च समये सा साधिकद्वादशवर्षसहस्रायुष्कं सुतमसूत ।

स जातकश्च सूतिकातल्पेऽनल्पौजा उद्दामपादकमलो **भीमेन्द्रे**ण पुरा दत्तं नवभिर्माणिक्यैर्निर्मितहारं पार्श्वस्थकरण्डकात् पाणिना चकर्ष । सहजचापलाच्च तं हारं स्वकण्ठे चिक्षेप । तेन **कैकसी** सपरिच्छदा विस्मयं प्राप्ता । **रत्नश्रवसे** च साऽऽचख्यौ-'पुरा राक्षसेन्द्रेण तव पूर्वजाय **मेघवाहन**राजाय यो दत्तः, योऽद्य यावद् देवतावदपूजि, योऽन्यैर्वोढुमशक्यः, यश्च नागसहस्रेण निधानमिवं रक्ष्यते, स हारस्तव शिशुनाऽऽकृष्य कण्ठेऽक्षेपि । **रत्नश्रवा**श्च नवमाणिक्यसङ्क्रान्तमुखत्वात् तस्य तत्क्षणं **दशमुख** इति नामाऽकरोत् । तथा जगाद च-'**मेरौ** चैत्यवन्दनार्थं गतेन



तातेन **सुमालि**ना कोऽपि मुनिः पृष्ट उवाच-'त्वद्वंशे यो नवमाणिक्यहारं वोढा सोऽर्धचक्री भविष्यति' ।

एवं **कैकसी** भानुस्वप्नेन सूचितं **कुम्भकर्णा**पराभिधं सुतमपि सुषुवे । कियत्यपि काले गते च पुनः सा **कैकसी** चन्द्रस्वप्नसूचितं **विभीषणं** नाम सुतमसूत । ते त्रयोऽपि सहोदराः सार्धषोडशधनुःसमुन्नता निर्भयाः शिशवोऽनुरूपया क्रीडया यथासुखं रेमिरे ॥ १ ॥

*इति रक्षसवंश-वानरवंशोत्पत्ति-रावणजन्मवर्णनात्मकः*
*प्रथमः सर्गः ॥१॥*

## द्वितीयः सर्गः

अथैकदा **दशमुखः** सानुजो गगने विमानारूढमायान्तं **वैश्रवणं** नृपमपश्यत् । ततः कोऽयमिति तेन पृष्टा माताऽब्रवीत्–'मम ज्येष्ठभगिन्यां **कौशिका**यां जातो **विश्रवो**नाम्नो विद्याधरेन्द्रस्य पुत्रः सर्वविद्याधरेन्द्र**स्येन्द्र**स्याऽग्रसुभटोऽयं **वैश्रवणः** । **इन्द्रो** भवत्पितामहज्येष्ठं **मालिनं** रणे हत्वा **सराक्षस**द्वीपां **लङ्कां** पुरीमस्मै ददौ । ततः प्रभृति **लङ्का**याः प्राप्तौ कृतमनोरथस्ते पितेहाऽस्ति । शक्ते द्विष्ये तदेव युक्तम् । राक्षसेन्द्रो **भीमो** विद्विषां प्रतीकाराय पूर्वजन्मपुत्राय रक्षोवंशस्थापकाय **मेघवाहन**नृपाय **पाताललङ्क**या सह **सराक्षस**द्वीपां **लङ्कां** राक्षसीं विद्यां च ददौ । तस्यां पुर्यां शत्रुभिर्हृतायां परम्परायातायामेतस्यां राजधान्यां ते पितामहः पिताऽपि च मृतवत् तिष्ठति । अरक्षके क्षेत्रे वृषभा इव तस्यां शत्रवः स्वच्छन्दाश्चरन्ति । वत्स ! मया मन्दभाग्यया सानुजस्तत्र गत्वा पैतामहासनं समासीनो द्रक्ष्यसे ? **लङ्का**लुण्टाकांस्त्वत्कारागारे बद्धान् दृष्ट्वा कदा पुत्रवतीषु शिरोमणिर्भविष्यामि ? एतैर्मनोरथैर्मरौ मरालीवाऽहरहः क्षामीभवामि' ।

तच्छ्रुत्वा **विभीषणो**ऽवदत्–'मातः! विषादेनाऽलं, सुतविक्रमं न वेत्सि, आर्यस्य **दशकण्ठ**स्य पुरत **इन्द्रो वैश्रवणो**ऽन्ये विद्याधरा



वा के ? अज्ञानादद्य यावदिदं सोढम् । आस्तामार्यो **दशमुखः**, **कुम्भकर्ण** एव शत्रून् निःशेषीकर्त्तुमीश्वरः । **रावणो**ऽप्यूचे–'मातः ! त्वं वज्रकठिनाऽसि, यद् दुःशल्यं चिरमधाः । एकबाहुबलेनै-**वेन्द्रा**दिकान् द्विषो हन्याम् । तथाऽप्यत्र क्रमागता विद्याशक्तिरेव प्रयोज्या । तत्ता विद्याः साधयिष्यामि, अनुजानीहि, सानु-जस्तत्सिद्ध्यै यास्यामि' । एवमुक्त्वा पितरौ नमस्कृत्य सानुजः स **भीमा**रण्यमुपाययौ ।

अथ भ्रातृभ्यां सहितश्च तदरण्यं प्रविश्य तपस्विवेषधरास्ते त्रयोऽपि यामद्वितयेन सर्वकामप्रदा**मष्टाक्षरीं** विद्यामसाधयन् । तथा यस्य दशकोटीसहस्राणि जपः फलप्रदस्तं षोडशाक्षरं मन्त्रं जपितुमारेभिरे । तदानीं चाऽ**नादृतो** नाम **जम्बूद्वीप**पतिः सुरस्तत्र सान्तःपुरः क्रीडितुं समायातस्तान् ददर्श । स यक्षाधिपस्तेषां विघ्ना-योपसर्गाय च स्वयोषितः प्रेषयामास । किन्तु तेषां क्षोभार्थ-मायातास्तास्तेषामतिसुन्दरै रूपैः स्वयमेव स्वामिशासनं विस्मृत्य क्षोभमायाताः । तान् निर्विकारानालोक्य स्मरातुरास्ता बभाषिरे–'भो भो ध्यानजडाः ! अग्रतः पश्यत, देव्योऽपि वो वशीभूताः, अतः परा का सिद्धिः ? किं विद्यासिद्धये क्लेशः? अमुना यत्नेनाऽलं, विद्याभिः किं करिष्यथ ? यतो वयं देव्यो वः सिद्धाः । अस्माभिस्त्रयाणां जगतां रम्यप्रदेशेषु स्वैरं रमध्वम्' । सकाममेवं जल्पन्त्यस्तानविचलितधैर्यानालोक्य ता विलक्षा जज्ञिरे ।

ततो **जम्बूद्वीप**पतिस्तानब्रवीत्–'मुग्धैर्युष्माभिः किमेतत् कष्ट-चेष्टितमारब्धम्? मन्ये केनाऽपि दुरात्मना पाखण्डिना मृत्युहेतवे यूयं शिक्षिताः । अधुनाऽप्येतं दुराग्रहं मुक्त्वा यात, ब्रूत, अहमपि कृपापरो वो वाञ्छितं यच्छामि' । एवमपि तांस्तूष्णीकान् दृष्ट्वा

क्रुद्धः सोऽब्रवीत्-'मां प्रत्यक्षदेवं मुक्त्वा किमन्यं ध्यायथ ?' एवं प्रोक्त्वा स यक्षस्तत्परिक्षोभाय भ्रूसंज्ञया किङ्करान् व्यन्तरान् समादिशत् । ते च किलकिलारावकारिणो बहुरूपिणो गिरिशृङ्गाण्युत्पाट्य तेषां पुरतश्चिक्षिपुः । केऽपि सर्पीभूय तानवेष्टयन्, केऽपि सिंहीभूय दारुणं पूच्चक्रुः । एवं नानारूपैस्ते तत्र बिभीषिकां चक्रुः। तथाऽपि ते मनागपि नाऽक्षुभ्यन् ।

ततस्ते **कैकसीं रत्नश्रवसं चन्द्रणखां** च विकृत्य बद्धवा तेषां पुरश्चिक्षिपुः । विकृताश्च **रत्नश्रवः**प्रभृतयः उदश्रुनयनाः करुणस्वरमेवं चक्रन्दुः-'लुब्धकैस्तिर्यञ्च इव युष्माकं पश्यतामपि वयं गतघृणैरेभिर्बद्ध्वा हन्यामहे । वत्स ! **दशमुख** ! उत्तिष्ठोत्तिष्ठ, त्रायस्व । त्वमेकान्तभक्तः कथमस्मानुपेक्षसे ?' यस्त्वं जात एव महाहारं कण्ठे न्यधाः, तस्य बाहुबलमहङ्कारश्च क्व गतः ? **कुम्भकर्ण** ! किं त्वमपि मद्वचो नाऽऽकर्णयसि ? यदेवमस्मानुदासीनानिवोपेक्षसे ? **विभीषण** ! त्वं क्षणमपि भक्तिविमुखो नाऽभः, किमद्य परावर्त्तित इव लक्षसे ? एवं विलपत्स्वपि तेषु ते समाधितो न चेलुः । ततस्ते यक्षकिङ्करास्तदग्रे तेषां मौलींश्चिच्छिदुः। तद्दारुणं कर्माऽपश्यन्त इव ते समाधिस्था मनागपि न चुक्षुभुः । ततस्ते **रावणा**ग्रे तदनुजयोस्तयोरग्रे च **रावण**स्य मूर्धानं मायया पातयामासुः ।

ततो गुरुभक्त्या **कुम्भकर्ण-विभीषणौ** किञ्चिच्चुक्षुभतुः । किन्तु परमार्थज्ञो **रावण**स्तमर्थमचिन्तयन् गिरिरिव निश्चलो विशेषेण ध्याननिष्ठोऽभूत् । ततोऽम्बरे देवानां साधु साध्विति वाणी समुद्भूता । यक्षकिङ्कराश्च चकिता द्रुतमपासर्पन् । सहस्रं विद्याश्च 'तव वशवर्त्तिन्यः स्म' इत्युच्चैर्भाषमाणा **दशमुख**मभ्येयुः । एवं



**प्रज्ञप्त्या**दयो महाविद्याः पूर्वसुकृतकर्मणा **दशमुख**स्य स्वल्पैरेव दिनैः सिद्धा अभूवन् । **संवृद्ध्या**दयः पञ्चविद्याः **कुम्भकर्ण**स्य **सिद्धार्था**दयश्चतस्रश्च विद्या **विभीषण**स्याऽसिधन् ।

अथ **जम्बूद्वीप**पतिः स देवो **रावणं** क्षमयामास । तथा तत्रैव **रावण**स्य कृते स देवः **स्वयंप्रभं** पुरं चकार । तेषां विद्यासिद्धिं श्रुत्वा च तेषां पितरौ स्वसा च तत्राऽऽयातास्तैः सत्कृताश्च । ते त्रयोऽपि च पित्रोर्दृक्प्रीणकाः बन्धूनामुत्सवप्रदास्तत्रैव तस्थुः । ततो **रावणः** षड्भिरुपवासैर्दिशां जये उपयोगिनं **चन्द्रहास**मसिं साधयामास ।

❀ ❀ ❀

इतश्च **वैताढ्ये** दक्षिणश्रेण्यां **सुरसङ्गीते** पुरे **मयो** नाम विद्याधरेश्वरोऽभूत् । तस्य च गुणनिधिभूतायां **हैमवती**नाम्न्यां पत्न्यां **मन्दोदरी** नाम दुहिता बभूव । तां पुत्रीं प्राप्तयौवनां प्रेक्ष्य तद्वरार्थी तदनुरूपं वरमपश्यंश्चिन्तितो '**रावण** अचिन्तो वर' इति मन्त्रिणा प्रोक्तः सृष्टश्च **मयो मन्दोदरी**मुपादाय बान्धवादिभिः सह **स्वयंप्रभ**पुरं ययौ। **सुमालि**प्रमुखाश्च गोत्रवृद्धा **दशमुखाय मन्दोदरीं** ग्रहीतुं प्रपेदिरे । ततो **मया**द्याः **सुमाल्या**द्याश्च शुभे दिने तयोर्विवाहं कारयामासुः । **मया**द्याश्च ततः स्वपुरं ययुः । **रावणो**ऽपि तया रमणीश्रेष्ठया चिरं रेमे ।

अन्येद्युश्च **रावणः** क्रीडया **मेघरथ**गिरिं गतस्तत्र सरसि षट् सहस्राणि खेचरकन्यका मज्जन्तीरपश्यत् । ता अपि च तं पद्मिन्य इव विकसितलोचनपङ्कजाः सानुरागाः प्रेक्ष्य स्मरार्त्ता लज्जां विहाय त्वं नो भर्त्ता भवेति स्वयं प्रार्थयाञ्चक्रिरे । ततो **रावणे**न **सर्वश्री-सुरसुन्दर**पुत्री **पद्मावती मनोवेगा-बुध**सुता-**ऽशोकलता कनक-**

**सन्ध्ययोः** सुता **विद्युत्प्रभा** प्रख्यातकुलप्रसूता अन्याश्च सरागास्ताः सर्वा गान्धर्वेण विवाहेन परिणिताः । ततस्तासां सौविदास्तासां पितॄणामेत्य 'युष्माकं कन्याः परिणीयाऽद्य कोऽप्येष गच्छती'ति व्यजिज्ञपन् । ततः क्रुद्धोऽ**मरसुन्दरो**ऽन्यैरपि विद्याधरैः सह **रावणं** जिघांसुरन्वधावत् । ततो नवोढास्ता **रावणः** 'त्वरितं विमानं प्रेरय, मा विलम्बय, एकोऽपि **सुरसुन्दरो**ऽजय्यः, किं पुनः **कनक-बुधा-**दिभिः परिवारित' इति प्रोचुः ।

ततो **रावणः** स्मित्वा ता व्याजहार- मा भैषीष्ट, गरुडस्य सर्पैरिव ममैभिर्युद्धं पश्यत' । एवं ब्रुबाणमेव **रावणं** विद्याधराः शस्त्रैर्दुर्दिनं कुर्वाणाः संवेष्टयामासुः । ततो **रावणो**ऽस्त्रैरस्त्राणि खण्डयित्वा **प्रस्वापनास्त्रे**ण तानमोहयत् । नागपाशैः पशूनिव तान् बबन्ध च । प्रेयसीभिः पितृभिक्षां याचितस्तान् मुमोच च । ततस्ते स्वपुरं ययुः । **रावणो**ऽपि च ताभिः सह **स्वयंप्रभ**पुरं प्राप । मुदितैर्जनैः पूजितश्च ।

अथ **कुम्भकर्णः कुम्भपुरे**शस्य **महोदर**महीपतेः **सुरूप-नयना**देवीकुक्षिजां नवयौवनां नाम्ना **तडिन्मालां** सुतामुपायत । **विभीषणश्च वैताढ्ये** दक्षिणश्रेण्यां **ज्योतिष्पुर**पुरेशितु**र्वीर**स्य **नन्दवती**कुक्षिसमुद्भवां **पङ्कजश्रियं** नाम कन्यां पर्यणैषीत् ।

अथ **मन्दोदरी** देवी देवेन्द्रतेजसमद्भुतविक्रम**मिन्द्रजितं** नाम सुतं सुषुवे । कियत्यपि काले गते च मेघवद् नयनानन्दं द्वितीयमपि **मेघवाहनं** नाम तनयं सुषुवे ।

**कुम्भकर्ण-विभीषणौ** च पितृवैरमाकर्ण्य **वैश्रवणा**श्रितां **लङ्कां** सदैवोपदुद्रुवतुः । ततो **वैश्रवणो** दूतेन **सुमालि**नमवोचत्- 'इमौ **रावणा**वरजौ सुतौ शाधि, वीरमानिनौ दुर्मदौ **पाताल-**



**लङ्का**स्थौ कूपमण्डूककल्पानविवेकिनावस्मत्पुर्यां छलकर्मणाऽवस्कन्दं ददाते, मया जेतुमिच्छया मत्ताविति चिरमुपेक्षितौ । त्वं चेदिमौ न शिक्षयसि, तर्हि त्वया सहैवेमावपि **मालि**वर्त्मना नेष्यामि, त्वमस्मद्बलं न वेत्सि ?' तज्ज्ञात्वा च क्रुद्धो **रावणो**ऽभ्यधात्-'क एष परस्य करदो **वैश्रवणः** ? अन्यस्य शासनाल्**लङ्कां** शासन्न लज्जते वदन् ? दूतोऽसीति त्वां न हन्मि, याहि' । एवं **रावणे-**नोक्तो निवृत्य स दूतो **वैश्रवणं** गत्वा यथातथमशंसत् । दूतस्या-ऽनुपदमेव च **रावणः** ससहोदरो ससैन्यो गरीयसाऽमर्षेण **लङ्कां** ययौ । **वैश्रवणश्च** दूताख्यातवृत्तान्तः ससैन्यः पुर्या युद्धाय निर्ययौ ।

ततो **रावणो** महावातो वन्यामिव क्षणात् तदक्षौहिणीं सेनामभाङ्क्षीत् । बले भग्ने च भग्नम्मन्यो **वैश्रवणः** उपशान्तकोपो दध्यौ-'परैश्च भग्नमानस्य मानिनो नृपस्य गतचन्द्रिकस्य चन्द्रस्येवा-ऽवस्थितं धिक् । मुक्तये एव यतनीयम् । स्तोकं विहाय बह्विच्छोर्न किमपि लज्जास्पदम् । तन्मम राज्येनाऽलं, मुक्तिवेश्मनो द्वारं परिव्रज्यामुपादास्ये । अपकर्त्तारावप्येतौ **कुम्भकर्ण-विभीषणौ** ममोपकर्त्तारावेवेदृक्पथनिदर्शनाज्जातौ । **रावणश्चा**ऽग्रेऽपि मम बन्धुः, सम्प्रति कर्मतोऽपि बन्धुः । यतोऽस्येममुपक्रमं विना ममेयं धीर्न स्यात्' । एवं विचिन्त्य शस्त्रादिकं त्यक्त्वा तत्त्वनिष्ठो **वैश्रवणः** स्वयमेव परिव्रज्यां समाददे । **रावणो**ऽपि तं नत्वा रचिता-ञ्जलिरुवाच-'त्वं मम ज्येष्ठो भ्राताऽसि, अनुजन्मनो मेऽपराधं सहस्व, निःशङ्कां **लङ्का**यां राज्यं कुरुष्व, वयमन्यत्र यास्यामः, मेदिनी न हीयते' । **रावणे** एवं ब्रुवाणेऽपि स प्रतिमास्थितो महात्मा तद्भव एव शिवंगमी न किञ्चिदूचे । ततो **रावणस्**तमनीहं ज्ञात्वा **वैश्रवणं** क्षमयित्वा प्रणम्य च **लङ्क**या सह तस्य **पुष्पकं** विमानमग्रहीत् ।

अथ स **रावणो** विमानं **पुष्पक**मधिरुह्य **सम्मेता**-द्रावर्हत्प्रतिमा वन्दितुं गतवान् । प्रतिमा वन्दित्वा शैलादवरोहतश्च तस्यैको वनकुञ्जरो जगर्ज । ततो हस्तिरत्नमसौ देवस्य यातनामर्हतीति प्रतिहारेण **प्रहस्ते**नोक्तो **दशमुखः** पिङ्गोत्तुङ्गदन्तं मधुपिङ्गललोचनं मदस्राविणं सप्तहस्तसमुच्छ्रायं नवहस्तायतं तं गजं क्रीडया वशीकृत्याऽध्यारुरोह ! **भुवनालङ्कार** इति च तस्य नाम विदधे । ततो गजं मालान्वितं कृत्वा तां निशां तत्रैवोषित्वा प्रातः सपरिच्छदः आस्थानीमधिष्ठितो रावणः ।

अथ प्रतीहारविज्ञप्तेन प्रविष्टेन घातजर्जरेण **पवनवेगे**न विद्याधरेण नत्वा विज्ञप्तः-'देव ! **किष्किन्ध**नृपनन्दनौ **सूर्यरजा ऋक्षरजा** अपि च **पातालल‌ङ्का**याः **किष्किन्धा**यां गतौ तत्र च तयो**र्यम**नृपेण युद्धमभूत् । चिरं युद्ध्वा **यमे**न बद्ध्वा तौ द्वावपि दस्युवत् कारागृहे क्षिप्तौ । तथा तेन **वैतरणी**युतान् नरकावासान् विधाय तौ सपरिच्छदं छेद-भेदादिदुःखं प्राप्येते । तौ च क्रमायातौ तव सेवकौ, तत्तौ मोचय, भृत्यपराभवो हि स्वामिपराभव एव' ।

ततो **रावणो** जगाद-'एवमेतत्, यदनेन दुर्धियाऽसदृशमाचरितम्, एष तत्फलं यच्छामि' । एवमुक्त्वा स ससैन्यः **किष्किन्धां** गत्वा सप्ताऽपि नरकांस्तत्र क्लिश्यमानान् निजान् पत्तींश्च दृष्ट्वा क्रुद्धः परमाधार्मिकां त्रासयित्वा निजपत्तीनपरांश्च तत्र स्थितानमोचयत् । नरकारक्षैर्ज्ञातवृत्तान्तश्चाऽपरो यमो **यम**नृपोऽतिक्रुद्धो योद्धुं नगराद् निर्ययौ । तयोश्च ससैन्ययोश्चिरं युद्धे प्रवृत्ते **रावणो** बाणवर्षै**र्यमं** जर्जरयाञ्चक्रे। ततो **यमः** सङ्ग्रामात् प्रणश्य **रथनूपुर**नेतार**मिन्द्र**-मुपगम्य प्रणम्य कृताञ्जलिरुवाच-'प्रभो ! मयाऽधुना यमत्वाय



जलाञ्जलिर्दत्तः, रुष्य वा तुष्य वा, अहं यमतां न करिष्ये । अधुना हि **दशमुखो** यमस्याऽपि यम उत्थितः । तेन हि नरकारक्षान् विद्राव्य नारका मोचिताः, आहवाच्च कथञ्चिज्जीवन्मुक्तोऽस्मि । तेन हि **वैश्रवणं** जित्वा **लङ्कां पुष्पकं** च गृहीते । **सुरसुन्दरो**ऽपि च तेन जितः' ।

ततः क्रुद्धः शक्रो युद्धेच्छु**र्यमाय सुरसङ्गीत**पुरं प्रदाय स्वयं **रथनूपुर** एव तस्थौ । इतश्च **दशमुख आदित्यरज**से **किष्किन्धामृक्षरज**से च **ऋक्षपुरं** पुरं प्रदाय **लङ्कां** गत्वा बन्धु-भिर्नागरैश्च स्तूयमानस्तत्राऽवस्थितः पैतामहं महद्राज्यं प्रशशास । यथेच्छं **मन्दोदर्या** सह विषयसुखमन्वभूच्च ।

अथाऽऽ**दित्यरज**सः कपिराजस्ये**न्दुमालिन्यां** महिष्यां **वाली** नाम बली सुतो जातः । स हि समुद्रान्तं **जम्बूद्वीपं** नित्यं प्रदक्षिणी-कुर्वन् सर्वचैत्यान्यवन्दत । तथाऽऽ**दित्यरज**सोऽपरः पुत्रः **सुग्रीवः** कन्या च **सुप्रभा** नाम्न्यभूताम् । तथाऽ**मृतरज**सो **हरिकान्ता**यां पत्न्यां भुवनविश्रुतौ **नल-नीला**भिधौ द्वौ पुत्रौ जातौ । **आदित्यरजा**श्च **वालि**ने राज्यं दत्त्वा प्रव्रज्य तपस्तप्त्वा च शिवं ययौ । **वाली** च दया-दाक्षिण्यादिगुणसमन्वितं स्वानुरूपं **सुग्रीवं** राज्ये न्यधात् ।

अथाऽन्यदा **दशमुख**श्चैत्यवन्दनार्थं गजारूढो **मेरु**पर्वतं गतः । तस्मिन्नेव समये च **मेघप्रभा**त्मजः **खर**नामा खेचर**श्चन्द्रणखां** सानुरागां विलोक्य जातरागोऽपजहार । तामादाय **पातालल‌ङ्कां** गत्वा च तत्रत्य**मादित्यरज**सः सूनुं **चन्द्रोदरं** नृपं निर्वास्य तां नगरीं स्वयमादत्त । **दशमुख**श्च क्षणेन **मेरोर्लङ्का**मागत**श्चन्द्रणखा**हरण-माकर्ण्य कुपितः **खरघाता**य चलितो **मन्दोदर्या** निवेदितः-कोऽयमस्थाने संरम्भः ? मनाग् विमृश, कन्या ह्यवश्यं कस्मैचिद्

दातव्या, स चेत् स्वयं वरं वृणीते, तत् साधु । **दूषणा**ग्रजः **खरश्चन्द्रणखा**या अनुरूपो वरः, स हि विक्रमी तव पत्तिभिरदूषणो भविष्यति। तत्प्रधानपुरुषान् प्रेष्य तया सह तमुद्वाह्य तस्मै **पाताललङ्कां** देहि, प्रसन्नतां धेहि' । एवमवरजाभ्यामप्युक्तो युक्तविचारकृत् स **मय-मारीचौ** प्रेषयित्वा तेन तां पर्यणाययत् ।

ततः स **खरो रावण**शासनं दधत् **पाताललङ्का**यां **चन्द्रणख**या समं निर्विघ्नं भोगान् बुभुजे । **खरे**ण निर्वासिते **चन्द्रोदरे** कालाद् मृते चाऽ**नुराधा** नाम तत्पत्नी नंष्ट्वा गर्भिणी वनमगात् । वने च सा सिंही सिंहमिव नयादिगुणयुतं **विराधं** नाम सुतमसूत । सर्वकलाकुशलः सम्प्राप्तयौवनः सोऽप्रतिहतगतिः पृथिवीं विजहार ।

❀ ❀ ❀

इतश्च सभायां कथाप्रसङ्गेन वानरेश्वरं प्रौढप्रतापं **वालिनं** श्रुत्वाऽन्यप्रतापासहनो **रावण** एकं दूतमनुशिष्य तस्मै प्रेषयामास। दूतश्च गत्वा **वालिनं** नत्वाऽऽह-'अहं **दशमुख**स्य दूतोऽस्मि, तद्वाचिकं श्रृणु-अस्मत्पूर्वजं **कीर्तिधवलं** तव पूर्वजः **श्रीकण्ठः** शरणायाऽऽयात्, तं श्वशुर्यं शत्रुभ्यस्त्रात्वा **कीर्तिधवल** इह **वानर-द्वीपे** न्यधात् । तत्प्रभृति चाऽऽवयोः स्वामि-भृत्यभावेनोभयोरपि पक्षयोर्बहवो नृपा गताः । तव पितामहः **किष्किन्धो** मम प्रपितामहः **सुकेश**श्च परस्परं तं सम्बन्धं तथैव निर्व्यूढवान् । ततस्तव पिता **सूर्यरजा** अभवत्, तं च यमात् त्रात्वा यथाऽहं **किष्किन्धा**राज्ये न्यधां, तज्जनो वेत्ति । अधुना च तत्तनयो नयवांस्त्वं प्राग्वत् स्वस्वामिसम्बन्धादस्मत्सेवां कुरुष्व' ।



तच्छ्रुत्वा क्रुद्धोऽपि महामना **वाली** स्वस्थो गम्भीरगिरा व्याजहार-'अद्य यावद् रक्षो-वानरकुलयोरखण्डितं स्नेहसम्बन्धं जानामि । यच्च पूर्वे सम्पद्यापदि चाऽन्योन्यं साहायकं व्यधुस्तत्र स्नेहो निमित्तं, न तु सेव्य-सेवकभावः । अहं च देवं सर्वज्ञम र्हन्तं सुगुरुं साधुं च विना नाऽन्यं सेव्यं जानामि । ततः त्वत्स्वामिन एष मोह एव । अद्य हि तेन स्वं सेव्यमस्मांश्च सेवकान् मन्यमानेन कुलक्रमागतः स्नेहसम्बन्धः खण्डितः । तस्य मित्रकुलोत्पन्नत्वाद् न किमपि करोमि । यदि स किमपि विप्रियं करिष्यति तदा तत्प्रतिक्रियां करिष्यामि । किन्तु पूर्वस्नेहद्रुमखण्डनेऽग्रेगूर्न भविष्यामि । यथाशक्ति तव स्वामी करोतु, व्रज' ।

ततो दूतः स गत्वा **दशमुखा**य सर्वमाख्यत् । ततश्चाऽतिक्रुद्धो **दशमुखः** ससैन्यः **किष्किन्धां** द्रुतमाययौ । **वाल्य**पि च सन्नह्य तमभ्यगात् । ततश्च द्वयोः सैन्ययोर्दारुणे युद्धे प्राणिसंहारं प्रेक्ष्य सदयो **वाली** सत्वरं **दशमुख**मभ्येत्य जगाद-'प्राणिमात्रस्यैव वधोऽनुचितः । पञ्चेन्द्रियाणां तु कथैव का । शत्रुजयाय यद्यप्येतद्युक्तम् । तथाऽपि स्वबाहुबलैर्विजिगीषोर्नैतद् युक्तम् । ततः सैन्ययुद्धं विमुञ्च । यतस्तदनेकप्राणिसंहाराच्चिराय नरकाय भवेत् । ततो **दशमुखो**ऽपि सर्वयुद्धविशारदस्तेन स्वत एव योद्धुमारेभे । तदा च यद् यदस्त्रं **दशमुखो**ऽक्षिपत् तत्तत् कपीश्वरो निजास्त्रैश्छिच्छेद । ततो विफल-पराक्रमोऽतिक्रुद्धो **रावणश्चन्द्रहासा**सिमाकृष्य **वालि**नेऽधाविष्ट । स **वाली चन्द्रहासं रावणं** च लीलयैव वामेन बाहुनाऽऽदाय कन्दुकमिव च कक्षायां निक्षिप्याऽव्याकुलः क्षणेनाऽपि चतुःसमुद्रीं बभ्राम ।

तदानीमेव च तत्रैत्य लज्जावनतं **रावणं** मुक्त्वाऽब्रवीत्- 'वीतरागमर्हन्तं विना न मे कश्चिद् नमस्योऽस्ति, मानं धिक्, येन मोहित इमामवस्थां प्राप्तोऽसि । पूर्वोपकारान् स्मरता मया सम्प्रति मुक्तोऽसि, पृथिवीराज्यं च ते दत्तम् । अखण्डाज्ञस्तच्छाधि । मयि विजिगीषौ सति तवेयं पृथिवी नैव । तन्मुक्तये परिव्रज्यामादास्ये । **किष्किन्धा**यां तवाऽऽज्ञाधरः **सुग्रीवो** राजाऽस्तु' । एवमुक्त्वा निजे राज्ये **सुग्रीवं** न्यस्य स **वाली गगनचन्द्र**मुनिपार्श्वे दीक्षामग्रहीत् । विविधाभिग्रहधरस्तपस्तत्परः प्रतिमास्थो निर्ममश्च **वाली** मुनिरवनिं विजहार । विहरतश्च तस्य क्रमाल्लब्धय उत्पेदिरे । तथा सोऽ**ष्टापदा**द्रौ गत्वा कायोत्सर्गं गृहीत्वा मासान्ते तदुत्सृज्य पारणं विधायैवमेव भूयो भूयश्चकार ।

इतश्च **दशमुखाय सुग्रीवः** स्नेहदाढ्र्याय **श्रीप्रभां** ददौ । तथा यौवराज्ये **वालि**पुत्रं महौजसं **चन्द्ररश्मिं** न्यवीविशत् । **दशमुखश्च सुग्रीव**गृहीताज्ञस्तत्सहोदरां **श्रीप्रभां** परिणीय तां गृहीत्वा च **लङ्कां** ययौ । तथा स **रावणो**ऽन्येषामपि विद्याधरेन्द्राणां रूपवतीः कन्यका बलादपि परिणिनाय ।

अन्यदा च स **नित्यालोक**पुरे तदीशितुः कन्यां **रत्नावली**-मुद्वोढुं चचाल । गच्छतश्च तस्य विमान**मष्टापदा**द्रेरुपरि स्खलितम् । रुद्धगतिकं विमानं प्रेक्ष्य कुपितश्च **रावणः** को मम विमानप्रतिरोधाद् यममुखं विविक्षतीति वदन् समुत्तीर्य विमानस्याऽधः प्रतिमाधरं **वालिनं** प्रेक्ष्योवाच-'अद्याऽपि मयि विरुद्धोऽसि, दम्भेन व्रतं वहसि, कयाऽपि मायया मां विजित्य मत्प्रतीकारं विशङ्कमानः प्राव्राजीः खलु । अद्याऽप्यहं स एवाऽस्मि । तत्ते प्राप्तकालं कृतप्रतिकृतं करोमि । यथा त्वं सचन्द्रहासं गृहीत्वाऽब्धिष्वभ्राम्यस्तथा त्वां



साद्रिमुत्पाट्य **लवणा**र्णवे क्षिपामि' । एवमुक्त्वा पृथिवीं विदार्य तद्गिरेस्तले प्रविश्य विद्यासहस्रं स्मृत्वा दुर्धरं तं पर्वतमुद्दध्रे ।

स महामुनि**र्वाली** चाऽवधिना तं पर्वतं तेनोद्धृतं ज्ञात्वा दध्यौ-'आः अद्याऽप्ययं दुर्मतिर्मयि मात्सर्यादकाण्डेऽनेकप्राणिसंहारं तनुतेतराम् ? सम्प्रत्येष **भरते**श्वरचैत्यं भ्रंशयित्वा तीर्थमुच्छेत्तुं यतते । राग-द्वेषरहितोऽप्यहं चैत्यरक्षणाय प्राणित्राणाय चैनं राग-द्वेषौ विनैव शिक्षयामि' । एवं विमृश्य स मुनिर्लीलया पादाङ्गुष्ठेन तत्पर्वतशिखरं किञ्चिदपीडयत् । ततश्च तत्क्षणादेव **रावणः** सङ्कुचद्गात्रो भङ्गुरदोर्दण्डो मुखेन रुधिरं वमन् तारमरावीत् । तेन **रावणे**ति नाम्ना प्रसिद्धोऽभूत् । तस्य च दीनमारटनं श्रुत्वा दयापरो **वाली** तमाशु मुमोच ।

ततो **रावणो** निःसृत्योपेत्य नत्वा **वालिनं** कृताञ्जलिरुवाच- 'निस्त्रपोऽहं भूयो भूयस्तवाऽपराध्यामि, त्वं शक्तिमांश्च कृपया सोढाऽसि । मन्ये, मयि कृपां कृत्वा प्रागुर्वीमत्यजो न त्वसामर्थ्यात्, तदहं न प्रागज्ञासिषम् । नाथ! तेनाऽज्ञानादद्रिक्षेपे यत्नं कुर्वता मया स्वशक्तिस्तोलिता । अद्य भवत आत्मनश्चाऽन्तरं ज्ञातम् । मृत्युकोटिं यातस्य मे त्वया प्राणा दत्ताः । यस्याऽपकारिण्यपीयं मतिस्तस्मै ते नमोऽस्तु' । एवं दृढभक्त्या भाषित्वा **वालिनं** क्षमयित्वा त्रिःप्रदक्षिणीकृत्य नमोऽकरोत् । तादृङ्माहात्म्यमुदिता देवाश्च साधु साध्विति वादिनो **वालि**मुनेरुपरिष्टात् पुष्पवृष्टिं व्यधुः ।

**रावणश्च भरते**श्वरनिर्मिते चैत्ये जगाम । तत्र च शस्त्रादीनि मुक्त्वा सान्तःपुरः स्वय**मृषभा**दीनामर्हतामष्टविधां पूजां व्यधात् । तथा महासाहसिकः स भक्त्या स्नायुमाकृष्य प्रमृज्य च

भुजवीणामवादयत् । तस्मिन् ग्रामरागरम्यमुपवीणयति सप्तस्वर-मनोरममन्तःपुरे गायति च चैत्यवन्दनयात्रायै समागतो **धरणेन्द्रो**-ऽर्हतां पूजां विधायाऽवन्दत । तं च **रावणं** वीणया श्रुतिमधुरं गायन्तं वीक्ष्याऽवदत्-'नन्वर्हद्गुणस्तुतिमयमिदं गीतं साधु निज-भावानुरूपं च, तेन ते तुष्टोऽस्मि, यद्यप्यर्हद्गुणस्तुतेर्मुख्यं फलं मोक्षस्तथाऽप्यहमजीर्णवासनस्तुभ्यं किं यच्छामि ? वृणीष्व ।

ततो **रावण** उवाच-'यदि जिनस्तवैस्तुष्टोऽसि, सा तव-स्वामिभक्तिः । यथा च ददानस्य तव सा प्रकृष्यते तथा ममा-ऽऽददानस्य साऽपकृष्यते' । ततो **नागेन्द्रः** पुनरुवाच-'तवाऽनया निराकाङ्क्षतया विशेषतस्तुष्टोऽस्मि' । एवमुक्त्वा **रावणाय** सो-ऽ**मोघविजयां रूपविकारिणीं** विद्याशक्तिं दत्त्वा निजाश्रयमगात् । **रावणो**ऽपि तीर्थनाथान् नमस्कृत्य **नित्यालोक**पुरं गत्वा **रत्नावलीं** परिणीय **लङ्का**माययौ ।

अथ तदानीमेव **वालिनो**ऽपि केवलज्ञानमुत्पेदे । सुरा-ऽसुरैश्च केवलज्ञानमहिमा विदधे । क्रमेण च भवोपग्राहिणां कर्मणां क्षयात् सिद्धानन्तचतुष्टयः सोऽपुनर्भवमगात् ।

इतश्च **वैताढ्ये ज्योतिष्पुर**पुरे **ज्वलनशिखो** नाम विद्याधरेश्वरो बभूव । तस्य **श्रीमत्यां** देव्यां **तारा** नाम दुहिता जज्ञे । तां चैकदा **चक्राङ्क**विद्याधरनृपात्मजः **साहसगति**र्दृष्ट्वा कामार्त्तो दूतैर्**ज्वलनं** तां याचयाञ्चके । वानरेन्द्रः **सुग्रीव**श्चाऽपि तां तं याचयाञ्चक्रे । स **ज्वलनशिख**श्च कस्मै कन्या दीयते इति संशयापन्नः पृष्टेन नैमित्तिकेन-'अल्पायुः **साहसगति**र्दीर्घायुश्च **सुग्रीव**' इति ज्ञात्वा **सुग्रीवाय** तां ददौ । ततः **साहसो** मनोरथच्छेदात् क्वाऽपि निर्वृत्तिं



नाऽऽप । **तारा**यां रममाणस्य **सुग्रीव**स्य चाऽ**ङ्गद**-**जयानन्दौ** द्वौ पुत्रौ बभूवतुः । **तारा**यामनुरागवान् **साहसगति**श्च कामार्त्तश्चिन्तया-मास-'बलेनाऽपि च्छलेनाऽपि च तां हर्त्ताऽस्मि' । एवं विचिन्त्य रूपपरिवर्त्तिनीं **शेमुषीं** विद्यां साधयितुं **क्षुद्रहिमवद्**गिरिगुहान्तरं गत्वा तां साधयितुमारेभे ।

* * *

इतश्च **लङ्का**याः पुर्या दिग्यात्रायै निर्गतो **दशमुखो** विद्या-धरेन्द्रान् नरेन्द्रांश्च वशीकृत्य **पाताललङ्कां** प्राप्य **चन्द्रणखा**भर्त्रा **खरे**णोपायनादिभिः पूजितस्तेनैव सह **चेन्द्र**जिगीषया चतुर्दश-भिर्विद्याधरसहस्रैः परिवारितश्चचाल । **सुग्रीवो**ऽपि च ससैन्यो वायोरग्निरिव **रावण**स्याऽनुचचाल । अस्खलद्गतिः प्रयाणं कुर्वंश्च **रेवां** नाम नदीं दृष्ट्वा तस्यास्तटे ससैन्य उवास । तथा तस्यां नद्यां स्नात्वा वस्त्रादि परिधायाऽर्हद्बिम्बं मणिमये पट्टे न्यस्य **रेवा**जलैः स्नपयित्वा कमलैः पूजयितुमारेभे । पूजातत्परस्य स्थितवतस्तस्या-ऽकस्मादब्धिवेलेव महापूरः समाययौ । वेगादागतं सपङ्कं फेनिलं च तत्पूरवारि **रावण**स्याऽर्हत्पूजामपानैषीत् । तेन जातकोपः 'केन पूजान्तरायकारीदं वार्यमुच्यते'ति जगाद ।

ततः कश्चिद् विद्याधरः समाचख्यौ-'इतः पुरस्ताद् **माहिष्मती** पूर्यस्ति । तस्यां **सहस्रांशु**नामा नृपोऽस्ति । स **रेवा**यां सेतुबन्धेन जलक्रीडोत्सवकृते वारिबन्धं व्यधात् । स करेणुभिः करीव राज्ञीसहस्रेण समं वारिभिः क्रीडति । तस्याऽऽत्मरक्षाश्च लक्षसङ्ख्या द्वयोस्तीरयोः सर्वमिता उदस्त्राश्च तिष्ठन्ति । तस्योर्जितैर्जल-क्रीडाकराघातैर्जलदेवीभिर्जलजन्तुभिश्च क्षुभितं पलायितम् । इदं च

पयस्तेन स्त्रीसहस्रयुतेन मुच्यमानत्वादुल्लुठितं वेगात् तटद्वयं प्लावयित्वा ते देवपूजामिह प्लावयामास । तत्स्त्रीणामेतानि निर्माल्यानि **रेवा**तीरे तरन्ति, पश्य' ।

एवं तद्गिरमाकर्ण्याऽधिकमुद्दीप्तो **दशाननो**ऽवोचत्-'अरे ! तेन मुमूर्षुणा स्वाङ्गदूषितैर्वारिभिरङ्गनैर्देवदूष्यमिवेयं देवपूजा दूषिता । राक्षसभटाः ! तद्यात, भटमानिनं तं पापं मत्स्यं धीवरा इव बद्ध्वा समानयत' । एवमुच्चैस्तेनाऽऽदिष्टा अनुचरा लक्षशो राक्षसभटा दधाविरे । तीरस्थितैः **सहस्रांशु**सैनिकैश्च ते युद्धं चक्रुः । तैर्नभःस्थितैः स्वान् सैनिकानुपद्रुतान् ज्ञात्वा क्रोधातुरः स्वाः प्रेयसीराश्वास्याऽधिज्यधन्वा **सहस्रांशु**र्जलाद् निर्गत्य बाणैस्तृण-पूलाननल इव तान् विद्रावयामास । तांश्च निशाचरान् रणाद् व्यावृत्तान् निरीक्ष्याऽतिक्रुद्धो **रावणः** स्वयमुपस्थाय **सहस्रांशु**मभि बाणानवर्षत् । चिरं च विविधैरायुधैर्द्वयोर्युद्धे प्रवृत्ते **रावणो**ऽजय्यं तं ज्ञात्वा विद्यया मोहयित्वा जग्राह । जित्वाऽपि च तं महावीर्यं प्रशंसन् स्वस्कन्धावारे समानयत् ।

यावच्च हृष्टः सभायां तस्थौ तावच्चारणश्रमणः **शतबाहुः** समाययौ । **रावण**श्च सिंहासनादुत्थाय तमभ्युत्थाय नत्वा स्वसमर्पिते आसने आसयित्वा पुनः प्रणम्य स्वयमूर्व्यामुपाविशत् । मुनिश्च तस्मै धर्मलाभाशिषं प्रदाय **रावणे**न समागमनकारणं पृष्टोऽवोचत्-'अहं **शतबाहुः** पुरा **माहिष्मत्यां** नृपोऽभवं, पावकाद् व्याघ्र इव भववासाद् भीतः **सहस्रांशुं** राज्ये निवेश्य व्रतमाशिश्रियम्' । एवमर्धोक्त एव **रावणो** नम्रमुखोऽब्रवीत्-'किमसौ महाभुजः पूज्यपादानामङ्गजः' । मुनीन्द्रेण 'ओम्' इत्युक्ते च स पुनराह-'अहं दिग्जयाय क्रमेणाऽत्राऽऽगतो **रेवा**तटे दत्तवासः **सहस्रांशु**मुक्त-



निजाङ्ग कलुषाविलजलैर्जातजिनपूजाभङ्गः 'क्रुधाऽज्ञानादेवमकार्षं, त्वत्सूनुरप्यज्ञानादेतत् कृतवानिति मन्ये' । एवमुक्त्वा **सहस्रांशुं** नत्वाऽनैषीत् । सोऽपि लज्जानम्रमुखो निजं पितरं ननाम।

ततो **रावण**स्तमुवाच-'त्वमतः परं मम भ्राताऽसि, तवेवाऽयं **शतबाहु**मुनिर्ममाऽपि पिता। गच्छ, निजं राज्यं शाधि, अन्यामपि भुवं गृहाण, अस्माकं त्रयाणां त्वं चतुर्थः श्रियोंऽशभागसि' । तेनैवमुक्तो मुक्तश्च **सहस्रांशु**रवदत्-'अतः परं मम राज्येन वपुषा वा न प्रयोजनं, संसारनाशनं व्रतमेव श्रयिष्यामि' । एवमुक्त्वा **रावणा**य निजं तनयं समर्प्य चरमदेहः स स्वपितुरन्तिके दीक्षामग्रहीत् । तथा स तदैव वाचिकेनाऽ**नरण्य**नृपाय स्वयमात्तां परिव्रज्यां कथयामास । तज्ज्ञात्वा च सोऽ**योध्या**धिपो दध्यौ-'मम तेन प्रियमित्रेणैवं सङ्केतोऽभवद् यद् युगपद् व्रतं ग्राह्यम्' । तां स्वप्रतिज्ञां स्मृत्वा च स स्वपुत्राय **दशरथा**य राज्यं दत्वा व्रतमुपाददे । **रावण**श्च **शतबाहु-सहस्रांशु**मुनी वन्दित्वा **सहस्रांशोः** सुतं राज्ये निवेश्याऽम्बरेणाऽचालीत् ।

अथ तदानीं यष्टिघातादिजर्जरो **नारद**मुनिरन्याय इत्येवं पूत्कुर्वन् **रावण**मभाषिष्ट-'राजन् **राजपुरे** मिथ्यादृग् **मरुत्तो** नाम नृपः क्रतुं कुर्वन्नास्ते । तत्र यज्ञे वधायाऽऽनीतान् पशून् पाशबद्धाननागस आरटतो दृष्ट्वा व्योम्नोऽवतीर्य कृपापरो ब्राह्मणाऽऽवृत्तं **मरुत्त**'महो किमिदमारब्धमि'त्यपृच्छम् । ततो **मरुत्त** उवाच-'अयं ब्राह्मणो-दितो यज्ञः, अमी पशवो देवतृप्तयेऽत्र होतव्याः, अयं च महाधर्मः स्वर्गहेतुः' ।

ततोऽहमाख्यं-'वपुरेव वेदिः, आत्मा यष्टा, तपो वह्निः, ज्ञानं सर्पिः, कर्माणि समिधः, क्रोधादयः पशवः, सत्यं यूपः,

सर्वप्राणिरक्षणं दक्षिणा, त्रिरत्नी त्रिवेदिरि'ति वेदोदितः क्रतुः कृतो योगविशेषेण मुक्तिसाधनं भवति । ये क्रव्यादतुल्याश्छागवधादिना यज्ञं कुर्युस्ते घोरे नरके तिष्ठेयुः । त्वमुत्तमे वंशे समुत्पन्नोऽसि, बुद्धिमानृद्धिमांश्चाऽसि । तस्माद् व्याधोचितादस्मात् पापाद् निवर्त्तस्व। यदि प्राणिवधैः स्वर्गो लभ्यते, तर्ह्यल्पैरेव दिनैरयं लोकः शून्यो भवेत्' । एवं मम वचः श्रुत्वा क्रुद्धा द्विजा दण्डपाणय उत्तस्थुः । तैस्ताड्यमानेन मया नश्यता प्राप्तोऽसि, त्वदवलोकनादहं त्रात एव, तान् निरागसः पश्यन् वध्यमानांस्त्रायस्व' ।

तच्छ्रुत्वा विमानादवतीर्णो **रावण**स्तेन नृपेण पूजितः क्रुद्धो **मरुत्त**नृपमुवाच-'अरे ! नरकाभिमुखैः किमेष क्रतुः क्रियते ? अहिंसातो धर्मः प्रोक्तः । तस्माल्लोकद्वयारिं यज्ञं मा कार्षीः, यदि करिष्यसि, तर्हीह ते वासो मम कारागारे परत्र च नरके' । ततो **मरुत्तः** सद्यो मखं विससर्ज।

ततोऽमी ह्यध्वर्यवः कुतो जज्ञिरे इति **रावणे**न पृष्टश्च **नारदो**ऽब्रवीत्-'**शुक्तिमत्या**ख्यया नद्या शोभिता दिक्षु प्रसिद्धा **शुक्तिमती** पूरस्ति । **मुनिसुव्रता**दनेकेषु भूपेषु गतेषु तस्यामभि-**चन्द्रो** नाम नृपोऽभवत् । तस्य चा**ऽभिचन्द्र**स्य पुत्रो **वसु**नामा सत्यवादी **क्षीरकदम्बक**स्य गुरोः पार्श्वे तत्सुतः **पर्वतको**ऽहं च त्रयोऽपठाम । पाठश्रमाद् निश्यस्मासु सुप्तेषु चारणश्रमणौ व्योम्नि यान्तावूचतुः-'एषामेकतमः स्वर्गमपरौ च नरकं यास्यन्ति' । **क्षीरकदम्बक**स्तच्छ्रुत्वा दध्यौ-'मय्यप्यध्यापके सति शिष्यौ नरकं यास्यतः ? महाखेदकरमेतत् । एभ्यश्च को दिवं कौ च नरकं यास्यन्ति ?'



एवं जिज्ञासुः सोऽस्मांस्त्रीन् युगपदाह्वयत् । तथा-ऽस्माकमेकैकं पिष्टकुक्कुटं समर्प्योवाच-'यत्र कोऽपि न पश्यति तत्राऽमी वध्याः" । ततो **वसु-पर्वतकौ** शून्यप्रदेशयोर्गत्वा स्वहितां गतिमिव पिष्टकुक्कुटो जघ्नतुः । अहं तु नगराद् बहिर्दूरतरं प्रदेशं गत्वा विजने देशे स्थित्वा दिशः प्रेक्ष्याऽतर्कयम्-'यथा कोऽपि न पश्यति तथा वध्य इति गुरुणोपदिष्टः, किन्त्वहं पश्यामि, तथाऽमी खेचरा पश्यन्ति, लोकपाला ज्ञानिनश्च पश्यन्ति । नास्त्येव तादृशं स्थानं यत्र कोऽपि न पश्यति । तद्गुरुगिरामेतत्तात्पर्यं यत् कुक्कुटो न वध्य इति। यतो गुरुपादा दयावन्तः सदा हिंसापराङ्मुखाश्च । तदस्मत्प्रज्ञां प्रज्ञातुमेवेत्थमुपादिशन्' । एवं विमृश्य कुक्कुटमादाया-ऽहमागमम् । कुक्कुटाहनने हेतुं च गुरोर्व्यज्ञपयम् । ततोऽयं स्वर्गं यास्यतीति निश्चित्य गौरवाद् गुरुभिरहमालिङ्गितः ।

**वसु-पर्वतकौ** च पश्चादागत्योचतुः-'यत्र कोऽपि न पश्यति, तत्र कुक्कुटौ निहतौ । ततो गुरू 'रे पापौ ! युवामपश्यतं खेचरादयोऽपश्यन्, तत्कथं कुक्कुटौ निहतावित्यशपत् । ततश्च खेदादुपाध्यायो दध्यौ-'**वसु-पर्वत**योर्मेऽध्यापनक्लेशो मुधाऽभूत् । गुरूपदेशो हि यथापात्रं परिणमेत् । प्रियः **पर्वतकः** पुत्रस्ततो-ऽप्यधिको **वसु**श्च नरकं यास्यतः । ततो मम गृहवासेनाऽलम्' । एवं निर्वेदादुपाध्यायः प्रव्रज्यामग्रहीत् । व्याख्याविचक्षणः **पर्वतक**श्च तत्पदमध्यास्त । अहं च गुरुप्रसादेन सर्वशास्त्रविशारदो भूत्वा निजं स्थानमगमम् । **अभिचन्द्रो** नृपश्च समये व्रतमग्रहीत् । तत्पुत्रो **वसु**श्च राजाऽभवत् । स च पृथिव्यां सत्यवादीति प्रसिद्धिं प्राप । स तां प्रसिद्धिं रक्षितुं सत्यमेव जगाद।

एकदा च व्याधेन मृगाय क्षिप्तो बाणोऽन्तरैव **विन्ध्य**नितम्बेऽस्खलत् । बाणस्खलनहेतुं ज्ञातुं च तत्र गतः पाणिना स्पृशन् स आकाशस्फटिकशिलामज्ञासीत् । ततः स दध्यौ-'मन्ये, अस्यां भूमिच्छायेवाऽन्यतश्चरन् हरिणः सङ्क्रान्तो मया ददृशे । पाणिस्पर्शं विना नेयं कथमप्युपलक्ष्यते । तदियं शिलाऽवश्यं **वसो**र्नृपस्य योग्या' । ततः स व्याधो रहसि तां शिलां राज्ञे व्यज्ञपयत् । राजाऽपि च हृष्टस्तज्जग्राह । तस्मै व्याधाय महद्धनं च ददौ । तथा स गुप्तरीत्या तया शिलया स्वासनवेदिकां घटयामास । तथा तच्छिल्पिनोऽघातयत् । तस्य सिंहासनं च तस्यां वेदौ निवेशितं जनः सत्यप्रभावादाकाशस्थितमबुधत् । तथाऽस्य नृपस्य सत्येन तुष्टा देवताः सान्निध्यं कुर्वन्तीति तस्य प्रसिद्धिर्दिगन्तरं व्याप्ता । तया प्रसिद्ध्या भीताश्च राजानस्तस्य वशं ययुः ।

अन्यदा चाऽहं तत्र गतः **पर्वतं** शिष्याणामृग्वेदं व्याख्यानयन्तमपश्यम् । अजैर्यष्टव्यमित्यत्र मेषैरित्युपदिशन्तं तमहमवोचम्-'भ्रातः ! भ्रान्त्या किमिदमुच्यते ? त्रिवार्षिकाणि धान्यानि न जायन्ते इति तान्यजपदेन व्याख्यातानीति गुरुणोपदिष्टं केन हेतुना व्यस्मार्षीः' । ततः **पर्वतको**ऽवादीत्-'तातेन तथा नोदितं, किन्त्वजा मेषा इत्येवोदितं, **निघण्टु**षु च तथैवोक्तम्' । ततोऽहमवोचम्-'शब्दानां मुख्या गौणी चाऽर्थकल्पना, तत्रेह गुरुर्गौणीमचकथत् । ततो गुरुर्धर्मोपदेष्टा त्वमन्यथा कुर्वन् पापं नाऽर्जय' । ततः **पर्वतः** साक्षेपमुवाच-'गुरुर्मेषानजान् जगाद, त्वं गुरूपदिष्टशब्दार्थोल्लङ्घनात् साधु धर्ममर्जयसि ? नृणां दण्डभयाद् मिथ्याभिमानवचो न स्युरिति स्वपक्षस्थापने नो जिह्वाच्छेदपणोऽस्तु । अत्र चोभयोः सहाध्यायी **वसु**र्नृपः प्रमाणम्' । अहमपि च तत् प्रत्यश्रौषम् ।



अथ जननी रहसि **पर्वतक**मूचे-'अहं गृहकर्मरताऽपि त्वत्पितुरजास्त्रिवार्षिकं धान्यमित्यश्रौषम् । तत्पणे जिह्वाच्छेदं यदकार्षीस्तदसाम्प्रतम् । अविवेकः परमापदां पदं भवति' । ततः **पर्वतो**ऽवदत्-'मया तावदिदं कृतं, कृतस्य च पुनःकरणं भवितुं नाऽर्हति' । ततः सा **पर्वतका**पायशङ्क्योद्विग्ना **वसु**मुपेयाय '**वसु**ना च-'अम्ब ! यत् त्वमीक्षिताऽसि तत् **क्षीरकदम्बो**ऽद्य दृष्टः । किं करोमि ? किं वा प्रयच्छामी'त्यभिदधे ।

साऽवोचत-'महीपते ! पुत्रभिक्षां मह्यं दीयतां, पुत्रेण विनाऽन्यैर्धन-धान्यैः किम्' । ततो **वसु**रुवाच-'मम **पर्वतः** पाल्यः पूज्यश्च, यतो गुरुवद् गुरुपुत्रे वर्त्तितव्यमिति श्रुतिरिति । कस्मै यमोऽद्य कुपितः, को मे भ्रातरं जिघांसुः, त्वं किमातुराऽसि, ब्रूहि' । ततः साऽजव्याख्यानवृत्तान्तं स्वपुत्रस्य तं पणं च तत् प्रामाण्यं चाऽऽख्यायाऽर्थयते स्म । त्वं भ्रातू रक्षणं कुर्वाणोऽजान् मेषान् कथय, महान्तो हि प्राणैरप्युपकुर्वन्ति किं पुनर्गिरा ?'

ततो **वसु**रवोचत्-'मातर्मिथ्या कथं वच्मि ? सत्यभाषिणो हि प्राणसंशयेऽप्यसत्यं न भाषन्ते । पापभीरुणा चाऽन्यदप्यसत्यं न वाच्यम् । गुरुवाचोऽन्यथाकरणे कूटसाक्ष्ये च कथैव का ?' ततस्तया सरोषं गुरुपुत्रं रक्ष सत्यव्रताग्रहं वेत्युक्तः स तद्वचोऽमंस्त । ततो मुदिता सा **पर्वत**माता गृहं ययौ । **पर्वतो**ऽपि **वसु**राजस्य पर्षद्याजगाम । ततो **वसुराजे** सभासदेषु च यथास्थानमुपविष्टेषु सत्स्वहं **पर्वत**श्च निजं निजं पक्षमवोचाव । ततो विप्रवृद्धैरूचे-'राजन् ! त्वयि विवादस्तिष्ठते, त्वमनयोः प्रमाणम् । सत्यत एव घटप्रभृतिदिव्यानि वर्त्तन्ते । सत्यादेव पर्जन्यो वर्षति सत्यादेव च देवताः सिद्ध्यन्ति, त्वयैव चाऽयं लोकः सत्ये स्थाप्यते । अतः सत्यव्रतोचितं ब्रूहीति त्वां ब्रूमहे' । तद्वचः श्रुत्वा

स्वां सत्यप्रसिद्धिमुपेक्ष्य स **वसु**रजान् मेषान् गुरुराख्यदिति साक्ष्यं व्यधात् । तस्याऽसत्यवचसा क्रुद्धाश्च देवतास्तदैव तस्याऽऽकाश-स्फटिकवेदिकां चूर्णयामासुः । **वसु**श्च ततः सद्यः पृथिव्यां पपात । घोरं नरकं च जगाम ।

**वसोः** सुताश्च **पृथुवसुश्चित्रवसुर्वासवः शक्रो विभावसु-र्विश्वावसुः सूरो महाशूर**श्चाऽष्टौ पैतृके पदे निषण्णाः देवताभिः कोपतस्तत्कालमहन्यन्त । ततो नवमः **सुवसु**र्नंष्ट्वा **नागपुरं** ययौ । दशमश्च **वसु**पुत्रो **बृहद्ध्वजो मथुरां** ययौ । पौरैश्च बहुधा हसित्वा निर्वासितः स **महाकाला**सुरेण सञ्जगृहे ।

ततः कोऽयं **महाकाल** इति **रावणे**न पृष्टो **नारदो**ऽब्रवीत्–'अत्र **चारणयुगलं** पुरमस्ति । तत्राऽ**योधनो** नृपस्तत्पत्नी **दिति**-स्तयोश्च सुता **सुलसा** बभूवुः । पित्रा च तस्याः स्वयंवरे समाहूताः सर्वे पार्थिवाः समाययुः । तेषु **सगरो**ऽधिको बभूव । **सगर**स्या-ऽऽज्ञया च द्वारपालिका **मन्दोदरी** प्रतिदिन**मयोधन**नृपावासं जगाम।

एकदा च **सुलस**या समं **दिति**र्गृहोद्याने कदलीगृहमविशत् । तदैव तत्र **मन्दोदरी** चाऽपि समाययौ । तयोश्च वचः श्रोतुकामा सा लतान्तरिता तस्थौ । तदानीं च **दितिः सुलसां** जगौ–'वत्से ! अस्मिन् स्वयंवरे मम मनःशल्यमस्ति, तदुद्धारश्च त्वदधीनः, तन्मूलतः श्रृणु–**ऋषभ**स्वामिनो **भरत–बाहुबली** पुत्रावभूताम् । तयोश्च **सूर्य–सोमौ** पुत्रौ । तत्र **सोम**वंशे मम भ्राता **तृणबिन्दु**र-जायत । **सूर्य**वंशे च तव पिताऽ**योधनो** नृपः । **अयोधन**स्वसा च **सत्ययशा तृणबिन्दो**र्भार्याऽभूत् । तयोः सुतश्च **मधुपिङ्गः** । तस्मै प्रदीयमानां त्वामिच्छामि, तव पिता च त्वां स्वयंवरवराय प्रदित्सते, न जाने त्वं कं वृणोषि ? तदेतद् मम मनःशल्यम् ।



त्वया राजमध्ये मद्भ्रातृज एव वरणीयः' । **सुलसा**ऽपि च तत् प्रत्यपद्यत ।

**मन्दोदरी** च तच्छ्रुत्वा **सगर**भूपतेराख्यत् । **सगरे**ण समादिष्ट-स्तत्पुरोधा **विश्वभूतिः** सद्यः कविर्नृपलक्षणसंहितां चक्रे । तत्र च स तथोचे–येन समस्तै राजलक्षणैर्युक्तः **सगरो** हीनस्तु **मधुपिङ्गलो** जायते । तत्पुस्तकं च पुराणवत् पेटायां प्रक्षिप्य राजपर्षदि नीतम् । तत्राऽऽदौ **सगर**स्तत्पुस्तके वाच्यमानेऽवोचत्–'यो लक्षणहीनो भवेत् सोऽखिलैर्जनैस्त्याज्यो वध्यश्च' । ततो यथा यथा पुरोहित-स्तत्पुस्तकमवाचयत तथा तथाऽपलक्षणः स **मधुपिङ्गलो**ऽलज्जत । लज्जामसहिष्णुश्च स ततो निर्ययौ । **सुलसा** च **सगर**मवृणोत् । तयोश्च सद्यो विवाहे जाते सर्वे स्वं स्वं स्थानं ययुः ।

अथ **मधुपिङ्गो**ऽपमानाद् बालतपो विधाय मृतो **महाकाल**-नामा षष्टिसहस्रेशोऽसुरोऽभवत् । अवधेश्च **सगरस्य सुलसा**याः स्वयंवरे निजापमानकारणं छलं ज्ञात्वा '**सगर**मन्यांश्च नृपान् हन्मी'ति सङ्कल्प्य छिद्रान्वेषी स **शुक्तिमती**नद्यां **पर्वतक**मैक्षत । ततो विप्रवेषो गत्वा स तमुवाच–'महामते ! अहं **शाण्डिल्यो** नाम त्वत्पितुर्मित्रमस्मि, अहं **क्षीरकदम्ब**श्च पुरा **गौतमो**पाध्यात् सहैवाऽपठाव । जनश्रुत्या **नारदे**न त्वां तिरस्कृतं श्रुत्वाऽऽगतोऽस्मि। मन्त्रैः सर्वं विमोहयन् त्वत्पक्षं समर्थयिष्यामि' । एवमुक्त्वा स **पर्वतके**न सह कुधर्मेणाऽखिलं जनं दुर्गतौ पातनाय मोहयामास । स सर्वत्र लोके व्याध्यादिदोषानजनयत् । **पर्वत**मतानुयायिनं च निर्दोषं चकार । तस्य **शाण्डिल्य**स्याऽऽज्ञया स **पर्वत**श्चाऽपि लोकानां व्याधिशान्तिं व्यधात् । एवमुपकृत्योपकृत्य स जनं स्वमते-ऽस्थापयत् । तथा सोऽसुरः **सगर**स्याऽप्यन्तःपुरे सपरिच्छदे

दारुणान् बहून् रोगान् विचक्रे । **सगरो**ऽपि च लोकविश्वासात् **पर्वत**माश्रयत् । सोऽपि चाऽसुरेण सह सर्वेषां व्याधिशान्तिं व्यधात् ।

अथ सोऽसुरः-'**सोत्रामण्यां** यज्ञे विधिपूर्वकं मदिरापानं न दुष्यति, **गोसवा**ख्ये यज्ञेऽगम्यागमनं कार्यम् । **मातृमेधे** मातुः, **पितृमेधे** च पितुर्वधो विधातव्यः, तत्र दोषो न विद्यते । अग्निं स्थापयित्वा कूर्मस्य पृष्ठे **जुह्वक**हविषा स्वाहेत्युक्त्वा प्रयत्नतः तर्पयेत् । यदा कूर्मं न प्राप्नुयात् तदा शुद्धविप्रस्य खल्वाटस्य पिङ्गवर्णस्य क्रियारहितस्य मुखं यावच्छुद्धजलेऽवतीर्णस्य कूर्माभे मस्तकेऽग्निं प्रदीप्य जुहुयात् । भूतं भविष्यच्च सर्वं पुरुष एवेदम् । स मोक्षस्येश्वरः । एवं च पुरुष एक एवेति न कोऽपि केनाऽपि हन्यते । तस्माद् यज्ञे यथाऽभीष्टं प्राणिवधः कुर्यात् । तथा यज्ञे मांसस्य भक्षणं कर्त्तव्यम्' । एवमादि समुपदिश्य च **सगरं** स्वमते स्थापयित्वा **कुरुक्षेत्रा**दिषु स यज्ञानकारयत् । तथा स **राजसूया**दीनपि यज्ञानकार्षीत् । असुरश्च स यज्ञहतान् विमानस्थानदर्शयत् । ततो जातिविश्वासो लोकः **पर्वत**स्य मते स्थितो निःशङ्कं प्राणिवधात्मकान् यज्ञानकरोत् ।

अथ तत् सम्प्रेक्ष्याऽहं **दिवाकरं** विद्याधरमवोचम्-'त्वया यज्ञे सर्वे पशवोऽपहर्त्तव्याः' । स च मद्वाचं स्वीकृत्य तथा चक्रे । परमाधार्मिकश्च सोऽसुरस्तज्ज्ञात्वा **दिवाकर**विद्याविफलीकरणार्थ-**मृषभ**प्रतिमां तत्राऽस्थापयत् । तेन च स विद्याधरस्तत उपरतवान् । ततोऽहमपि निरुपायस्तूष्णीमन्यत्राऽगाम् । सोऽसुरश्च मायया **सगरं** यज्ञेषु भावयित्वा **सुलसा**युक्तं तं यज्ञानले हुत्वा कृतकृत्यः स्वं स्थानं जगाम । एवं **पर्वताद्** द्विजैर्हिंसात्मका यज्ञा अक्रियन्त, ते च त्वयैव निषेध्याः' ।



अथ **रावण**स्तद्वाचं स्वीकृत्य **नारदं** प्रणम्य **मरुत्तात्** क्षमयित्वा तं विससर्ज । **मरुत्त**श्च नत्वा **रावण**मवोचत्-'कोऽयं कृपालुर्योऽमुष्मात् पापात् त्वया कृत्वाऽस्मानवारयत्' । ततो **रावणो** जगाद-'**ब्रह्मरुचि**र्द्विज आसीत् । तस्य च तापसस्य भार्या **कूर्मी** गर्भवती जाता । तत्रैकदा समागतेषु साधुष्वेकोऽब्रवीत्-'भवभीत्या यद्गृहवासस्त्यक्तस्तत् साधु साधु । पुनश्च स्वदारसहितस्य विषयाधीनस्य तव वने वासो गृहवासात् कथं विशिष्यते ?' तच्छ्रुत्वा **ब्रह्मरुचि**र्जिनशासनं प्रपद्य तदैव प्राव्रजत् । सा च **कूर्मी** श्राविका जाता । आश्रमे वसन्ती च सा रोदनादिरहितं **नारदं** सुतं सुषुवे ।

एकदा तस्यामन्यत्र गतायां **जृम्भका**मरास्तं जगृहुः । ततः सा पुत्रशोका**दिन्दुमाला**पार्श्वे प्राव्रजत् । ते देवाश्च तं पालयामासुः । शास्त्राण्यध्यापयन् । क्रमेण च तस्मा **आकाशगामिनीं** विद्यां ददुः । स **नारद**श्चाऽखण्डव्रतधरो, मनोहरं यौवनं प्राप्तः, शिखाधारणात् संयतगृहस्थोभयलक्षणहीनः, कलहप्रेक्षणोत्सुको, गीत-नृत्यकुतूहली, कामचेष्टादिषु वत्सलो, वीराणां कामुकानां च सन्धि-विग्रहयोर्निपुणच्छत्राक्षमालासनपाणिः, पादुकारूढो, देवपालितत्वाद् देवर्षिरिति प्रथितः, प्रायेण ब्रह्मचारी, स्वेच्छाचारी **नारद** एषः' । एवमुक्तवन्तं **रावणं** स **मरुत्तो** यज्ञसम्भवमज्ञानात् कृतं निजमपराधं क्षमयामास । तथा **कनकप्रभां** नाम निजां कन्यां **रावणा**य ददौ ।

अथ **रावण**स्तामुद्वाह्य **मथुरां** नगरीं जगाम । तत्र **हरिवादनो** नृपो **मधु**ना पुत्रेण सह तमुपतस्थे । ततश्च प्रीतो **रावण**स्तमपृच्छत्-'भवत्पुत्रस्येदं शूलमायुधं कुतः' । ततः पित्रा भ्रूसंज्ञयाऽऽदिष्टो **मधु**रुवाच-'इदं मे प्राग्जन्मसुहृदा **चमरेन्द्रे**णाऽर्पितम्' । **चमरे**न्द्रश्च समर्पयद् मामवोचत्-'**धातकी**खण्डे **ऐरावत**क्षेत्रे **शतद्वारा**ख्ये

महापुरे राजपुत्रः **सुमित्रः** कुलपुत्रकः **प्रभवश्च** वसन्तकामदेवाविव मित्रे अभूताम् । तौ च बाल्ये एकस्य गुरोः पार्श्वे कला जगृहतुः। **अश्विना**विव सह चिक्रीडतुश्च । यौवनं प्रपन्नः **सुमित्रश्च** तन्नगरे नृपोऽभवत् । तेन च स्वमित्रं **प्रभवो** महर्द्धिको विदधे ।

एकदा च स नृपस्तुरङ्गेण हृतो महाटवीं प्राप्तः पल्लीपतिसुतां **वनमालां** परिणीय तामादाय स्वपुरं समायातवान् । रूप-यौवनशालिनीं तां प्रेक्ष्य च **प्रभवः** कामार्त्तः कृष्णपक्षे चन्द्र इव दिने दिने कृशो जज्ञे । नृपेण साग्रहं तत्कारणं पृष्टश्च **वनमाला**नुरागो मे दौर्बल्यकारणमित्यवोचत् । ततो राजोचे-'त्वदर्थे राज्यमपि सन्त्यजामि, किं पुन**र्वनमालाम्** ? इयमद्यैव गृह्यताम्' । इत्युक्त्वा तं विसृज्य तस्याऽनुपदमेव तां **वनमालां** रात्रौ तद्गृहे प्रैषीत् । सा तत्र गत्वा चोचे-'राज्ञा तुभ्यं दत्ताऽस्मि, मम भर्त्ता त्वदर्थे प्राणानपि विमुञ्चति'।

ततः **प्रभव** उवाच-'धिङ् मां निर्लज्जं, स खलु महासत्त्वः। यस्य मयीदृशं प्रेम । परस्मै प्राणा अपि दीयन्ते न पुनः प्रिया । तेनाऽद्य मत्कृते दुष्करं कृतं, त्वं मम माताऽसि, गच्छ, नाऽतः परं पापराशिं मां पत्याज्ञयाऽपि भाषस्व' । राजा च गुप्तं तत्राऽऽगत्य तद्वचोऽशृणोत्। तथा सुहृदो भावमालोक्य जहर्ष च । **प्रभवश्च** **वनमालां** नमस्कृत्य विसृज्य च खड्गमाकृष्य स्वशिरश्छेत्तुमारेभे । ततः **सुमित्रः** प्रकटीभूय साहसं मा कृथा इति वदन् तस्य करात् कृपाणमपाहार्षीत् । लज्जानम्रमुखः **प्रभवश्च** कथञ्चन स्वस्थता-मानीतः । ततस्तौ प्राग्वद् मैत्रीपरायणौ चिरं राज्यं चक्रतुः ।

**सुमित्रश्च** मृत्वे**शान**सुरोऽभवत् । ततश्च स च्युत्वा **मथुरेशस्य** **हरिवाहणस्य** **मधुर्नाम** **माधवी**कुक्षिजः पुत्रोऽभूत् । **प्रभवो**ऽपि च



भवं भ्रान्त्वा **विश्वावसोर्ज्योतिष्मत्यां श्रीकुमार**नामा पुत्रोऽभवत् । सनिदानं च तपः कृत्वा विपद्य तव पूर्वजन्मसुहृदहं **चमरे**न्द्रो-ऽभवम्' । इत्याख्याय स मह्यं शूलं ददौ । यदेतदायोजनद्विसहस्राः कार्यं कृत्वा निवर्त्तते । **रावणश्च** तच्छ्रुत्वा तस्मै **मधु**कुमाराय **मनोरमां** नाम कन्यां ददौ ।

❋ ❋ ❋

अथ **लङ्का**प्रयाणदिवसादष्टादशसु वर्षेषु स **रावणो मेरौ पाण्डके** चैत्यान्यर्चितुमगात् । तत्र च समहोत्सवं चैत्यान्यभ्यवन्दत। तदाज्ञया च **कुम्भकर्णा**द्या **दुर्लङ्घ**नगरे **इन्द्र**दिक्पालं **नलकुबरं** ग्रहीतुं ययुः । स **नलकुबरश्चाऽऽशाली**विद्यया स्वपुरे योजनशत-प्रमाणं वह्निमयं प्राकारं व्यधात् । तथा तत्राऽग्निमयान्येव यन्त्राणि चक्रे । तं च प्राकारमाश्रित्य वह्निकुमारवत् कोपाद् दीप्तो भटैः परिवृतो **नलकुबर**स्तस्थौ । **कुम्भकर्णा**द्याश्च तत्रैत्य ग्रीष्म-मध्याह्नसूर्यमिव तं द्रष्टुमपि नाऽशकन् । ततो दुर्लङ्घ्यमेतद् **दुर्लङ्घ**पुरमिति निवृत्य भग्नोत्साहा **रावणा**य व्यजिज्ञपन् । ततस्तत्र स्वयमागत्य **रावण**स्तं प्राकारं प्रेक्ष्य सबान्धवस्तद्ग्रहणोपायं चिरं चिन्तयामास ।

अथ **नलकुबर**पत्नी तं दृष्ट्वाऽनुर**क्तोपरम्भां** दूतीं प्रैषीत् । सा चैत्य **रावण**मब्रवीत्-'मूर्त्ता जयश्रीरि**वोपरम्भा** त्वय्यनुरक्ताऽस्ति, सा त्वद्गुणैर्हृतचित्ता त्वामेव चिन्तयति । सा वप्रस्य रक्षिका**माशाली**विद्यामात्मानमिव त्वदधीनां करिष्यति । तथा तया कृत्वा **नलकुबर**सहितमिदं पुरं ग्रहीष्यसि । **सुदर्शनं** नाम दैवं चक्रमपि तेऽत्र सेत्स्यति' । ततः सहासं **रावणे**नाऽवलोकितो **विभीषण** एवमस्त्वित्युक्त्वा तां विससर्ज ।

तेन च क्रुद्धो **रावणो विभीषण**मुवाच–'त्वया कुलविरुद्ध-मिदं किं स्वीकृतम् ? अस्मत्कुलभवैः परस्त्रीणां द्विषां पृष्ठमिव कदाऽपि हृदयं नाऽर्पितम् । त्वयाऽयं नवीनः कुलकलङ्कः कृतः । केयं तव मतिर्जाता येनेत्थमब्रवीः' । ततो **विभीषण** उवाच–'आर्य ! प्रसीद, विशुद्धचित्तानां वाङ्मात्रं दोषाय न भवति, सा समायातु, तुभ्यं विद्यां प्रयच्छतु, शत्रुर्वश्योऽस्तु तां न भजेथाः, वाचोयुक्त्या तां परित्यजेः' । तदानीमेव चो**परम्भा रावणं** तत्सङ्गमोत्कण्ठिता समागात् । तथा तस्मै **आशालिकां** विद्याममोघानि व्यन्तराधिष्ठितानि शस्त्राणि च ददौ ।

**रावण**श्च तया विद्ययाऽग्निप्राकारं तं संहृत्य सबलवाहनो **दुर्लङ्घ**पुरं प्रविश्य रणायोत्थितं **नलकुबरं विभीषणे**न कृत्वा वशगं विदधे । तथा सुदर्शनं नाम चक्रं तत्र प्राप्य पुन**र्नलकुबरा**य तत्पुरं दत्त्वो**परम्भा**मुवाच–'भद्रे ! निजं पतिं मयि विनयिनं भज । त्वं विद्यादानाद् मम गुरुरिवाऽसि । अहं चाऽन्या अपि परस्त्रियः स्वस्य मातृवत् पश्यामि । त्वं च पुनः **कामध्वज**स्य **सुन्दरी**सम्भवा पुत्र्यसि, कुलद्वयकालुष्यकरस्तव कलङ्को माऽस्तु' । एवमुक्त्वा तां **नलकुबरा**य समर्पयामास । **नलकुबरे**ण च पूजितः स **रावणः** सेनाभी **रथनूपुरं** नगरं प्रति प्रतस्थे ।

अथ तमायान्तं श्रुत्वा **सहस्त्रारः** सुत**मिन्द्रं** सस्नेहमवोचत्–'त्वया महौजसाऽन्यवंशोत्कर्षमपहृत्याऽस्माकं वंशः परोत्कर्षं प्रापितः । त्वया चैकेनैव विक्रमेणैवमनुष्ठितम् । सम्प्रति च नीत्या त्वया वर्त्तितव्यम् । विक्रमो हि क्वाऽपि विपदे क्वाऽपि च नाशायाऽपि जायते । वसुन्धरा हि बहुरत्ना । तस्मादहमेवौजस्वीत्यहङ्कारं मा कृथाः । सम्प्रति जगति स्वगुणैः ख्यातो **रावणः** सपरिवारः



ससैन्यश्च समुपस्थितोऽस्ति । स च नम्रतयाऽनुकूलनीयः । तस्मै इमां **रूपवतीं** सुतां प्रयच्छ । तत्सम्बन्धाच्च तेनोत्तमः सन्धिर्भविष्यति'।

एवं पितृवचः श्रुत्वा कुप्यन्निव सोऽवोचत्–निजा कन्या कथमस्मै दीयते ? अनेन नाऽऽधुनिकं वैरं किन्तु कुलक्रमागतम् । तत्पक्ष्यैर्हि तातो **विजयसिंहो** हतः, तत् स्मर । एतत्पितामहस्य **मालिनो** यद् मया कृतं तदस्याऽपि करिष्यामि, एष समायातु । स्नेहात् कातरो मा भूः, धैर्यमाश्रय, किं स्वसूनोर्मम पराक्रमं न वेत्सि'। तस्यैवं कथयत एव **रावणः** समेत्य सेनाभी **रथनूपुरं** परिवेष्टयामास । तथा **रावणे**न प्रेषितो दूतः समेत्योवाच–'पराक्रमशीलैः सर्वैरेव नृपै **रावणः** पूजितः । साम्प्रतं तव भक्तिकालः । तद्भक्तिं स्वशक्तिं वा दर्शय, अन्यथैवमेव विनङ्क्ष्यसि ।

तत **इन्द्र** उवाच–'दुर्बलै राजभिः पूजितो मत्तो **रावणो** मत्सकाशादपि पूजां वाञ्छति ? याहि, स्वस्वामिनो भक्तिं शक्तिं वा मयि दर्शय, अन्यथैवमेव विनङ्क्ष्यसि' । दूतेन तज्ज्ञात्वा क्रुद्धो **रावणः** सन्नह्य समाययौ । **इन्द्रो**ऽपि च सन्नह्य पुराद् निर्ययौ । द्वयोः सैन्ययोश्च दारुणे युद्धे प्रवृत्ते **रावण इन्द्रेणैरावण**स्थेन योद्धुं प्रावृतत् । द्वयोश्च तुमुले युद्धे प्रवृत्ते छलविद् **रावणो** निजगजादुत्प्लुत्**यैरावणं** प्राप्य तन्महामात्रं हत्**वेन्द्रं** बबन्ध । शक्रे च गृहीते तत्सैन्यं सर्वतो विदुद्राव । **रावणश्चेन्द्रं सैरावणं** स्वशिबिरे निनाय। स्वयं च द्वयोः श्रेण्योर्नायको जातः ।

अथ **रावण**स्ततो निवृत्त्य **लङ्का**मगात् । **इन्द्रं** च शुकं पञ्जर इव कारायामक्षिपत् । ततः सदिक्पालः **सहस्त्रारो लङ्का**यामेत्य नमस्कृत्य बद्धाञ्जलि**र्दशमुख**मभाषिष्ट–'यः **कैलास**मप्युद्दधार, ततो

विजितस्तं याचमानश्च न लज्जे । **तच्छक्रं** मुञ्च, मे पुत्रभिक्षां प्रयच्छ'। ततो **रावण** उवाच -'**शक्रं** मुञ्चामि, यद्यसौ **लङ्कां** परितः क्षणे क्षणे वासगृहमिव तृणादिरहितां करोति । स प्रातः प्रातः पुरीमिमां दिव्यगन्धैर्जलैरभितोऽभिषिञ्चतु । मालाकार इव च सदा स्वयमवचित्य पुष्पाणि ग्रथित्वा च देवपूजादिषु समानयतु । एवंविधानि कर्माणि कुर्वन्नेष तव सुतः पुना राज्यं गृह्णातु, मत्प्रासादाद् नन्दतु च' । तत एवं करिष्यतीति **सहस्त्रारे**ण स्वीकृते निजबन्धुवत् सत्कृत्य काराया **इन्द्रं** मुमोच । **इन्द्र**श्च **रथनूपुर**मेत्योद्विग्न इव तस्थौ ।

अथाऽन्यदा तत्र **निर्वाणसङ्गमो** नाम ज्ञानी मुनिः समवासरत् । **इन्द्र**श्च तत्र गत्वा वन्दित्वा-'केन कर्मणा मम **रावण**-कृतस्तिरस्कार' इति पृष्टवान् । ततो मुनिरब्रवीत्-'पुराऽ**रिञ्जयपुरे ज्वलनसिंहो** नाम विद्याधरेन्द्रोऽभवत् । तस्य **वेगवत्यां** पत्न्यां जाताया **अहल्या**याः स्वयंवरे सर्वे विद्याधरेन्द्राः समेयुः । तत्र च **चन्द्रावर्त्त**पुरेश्वर **आनन्दमाली सूर्यावर्त्त**पुरेश्वर**स्तडित्प्रभ**श्च त्वं समागाः । **अहल्या** च त्वां त्यक्त्वाऽऽ**नन्दमालिनं** वव्रे । तेन पराभवेन च त्वमा**नन्दमालिनी**र्ष्यालुर्जातः । **आनन्दमाली** च कालक्रमेण निर्वेदाद् व्रतं गृहीत्वा तीव्रं तपस्तप्यमानो मुनिभिः समं विजहार ।

एकदा च स **रथावर्त्तं** गिरिं गतस्त्वया ददृशे । **अहल्यायाः** स्वयंवरश्च त्वया स्मृतः । ततस्त्वया स ध्यानस्थो बद्धोऽनेक-शस्ताडितश्च । तथाऽपि स ध्यानाद् न चचाल । किन्तु **कल्याण-गुणधर**स्तद्भ्राता मुनिस्तत् प्रेक्ष्य त्वयि वृक्षे वज्रमिव तेजोलेश्याम-मुचत् । ततस्त्वत्पत्न्या **सत्यश्रिया** भक्तिवचनैः प्रसादितः स



मुनिस्तेजोलेश्यां संजहार । तेन च त्वं तदैव न दग्धः । मुनितिरस्कारपापाच्च बहून् भवान् भ्रान्त्वा शुभं कर्म विधाय **सहस्त्रार**सुतस्त्व**मिन्द्रो**ऽभुवः। तन्मुनितिरस्कारप्रहारजन्यकर्मणः फलं च तव **रावणा**त् पराजयः । कीटा**दिन्द्रं** यावच्चिरादपि सर्वस्य कर्माण्यवश्यमेव फलन्ति' । तच्छ्रुत्वा सुतं **दत्तवीर्यं** राज्येऽभिषिच्य प्रव्रज्य तीव्रं तपस्तप्**त्वेन्द्रः** शिवं ययौ ।

अथैकदा **रावणो मेरु**शिखरेऽ**नन्तवीर्यं** नामर्षिं जातकेवलं वन्दितुं गतः । तं वन्दित्वा यथास्थानमुपविश्य धर्मदेशनां श्रुत्वाऽन्ते 'कुतो मम मरणमि'ति महर्षिं पृष्टवान् । ततः स मुनीश्वरो जगाद-'प्रतिविष्णोस्तव पारदारिकदोषेण **वासुदेवा**द् मरणं भविता' । ततः सोऽनिच्छन्तीं परस्त्रियं न रमयिष्यामीत्यभिग्रहं तस्यैव मुनेः पुरो जगृहे । ततस्तं मुनिं नत्वा **पुष्पक**विमानस्थः स्वां पुरीं **रावणः** समेयाय ॥ २ ॥

*इति रावणदिग्विजयवर्णनात्मको द्वितीयः सर्गः ॥२॥*

# तृतीयः सर्गः

अथ **वैताढ्य**पर्वते **आदित्यपुर**नगरे **प्रह्लाद**नामनृपस्य **केतुमत्यां** भार्यायां पवन इव बलवान् गगनगामी च **पवनञ्जयो** नाम पुत्रो बभूव। इतश्चाऽत्रैव **भरते** उपसमुद्रं **दन्ति**पर्वते **महेन्द्र**नगरे **महेन्द्रो** नाम नृपो बभूव। तस्य च **हृदयसुन्दर्यां** भार्यायाम**रिन्दमा**दयः शतं पुत्रा **अञ्जनसुन्दरी** पुत्री च बभूवुः । प्राप्तयौवनायास्तस्या वरार्थं चिन्तितं नृपं मन्त्रिणो विद्याधरयूनां रूपाणि पृथक् पृथक् पटेष्वालिख्याऽऽनाय्य च दर्शयामासुः । तेषु विद्याधरेन्द्रस्य **हिरण्याभ**स्य **सुमनः** कुक्षिजन्मानं पुत्रं **विद्युत्प्रभं प्रह्लाद**पुत्रं **पवनञ्जयं** च दृष्ट्वा 'रूपवतोरनयोः कुलीनयोः क उत्तमो वर' इति राज्ञा पृष्टोऽमात्य उवाच-'एष **विद्युत्प्रभो**ऽष्टादशवर्षायुर्मोक्षं गमी'ति नैमित्तिकाः कथयन्ति स्म, तथा **पवनञ्जय**श्च दीर्घायुः । तस्मादेष एव वरो योग्यः' ।

अत्रैवाऽवसरे सर्वे विद्याधरेन्द्रा यात्रायै **नन्दीश्वरं** द्वीपं ययुः। तत्र च **प्रह्लादो**ऽञ्जन**सुन्दरीं** प्रेक्ष्य 'मत्सुताय **पवनञ्जया**यैषा प्रदीयतामि'ति **महेन्द्र**मुवाच । **महेन्द्रो**ऽपि पुरैव चिन्तितं तत् स्वीकृतवान्। ततश्चेतस्तृतीये दिवसे **मानसा**ख्ये सरोवरे विवाहोत्सवः सम्पाद्य इति निश्चित्य तौ स्वस्वस्थानं जग्मतुः ।



ततस्तौ **महेन्द्र-प्रह्लादौ** सपरिच्छदौ सानन्दौ **मानसं** प्राप्याऽऽवासं चक्रतुः । तत्र च **पवनञ्जयो** मित्रं **प्रहसितं** पप्रच्छ- 'किं त्वयाऽ**ञ्जनासुन्दरी** दृष्टा ? सा कीदृशी ? तद् ब्रूहि' । सोऽपि चेषद् विहस्योवाच-'सा मया दृष्टा, सा **रम्भा**दिभ्योऽप्यतिशेते । तस्या निरूपमं रूपं वक्तुं न शक्यते' । ततः **पवनञ्जय**स्तमुवाच- 'विवाहकालो दूरे, तर्हि कथं मयाऽद्य स द्रष्टव्या ? तां द्रष्टुमहं न कालक्षेपं सोढुं समर्थोऽस्मि'। ततः **प्रहसित** उवाच-'शान्तो भव । तत्र रात्रावेत्याऽनुपलक्षितस्तां द्रक्ष्यसि' । ततः **प्रहसिते**न सह **पवनञ्जय** उत्पत्याऽ**ञ्जनासुन्दर्या** अधिष्ठिते सप्तभूमिके प्रासादे चर इव गुप्तोऽ**ञ्जनसुन्दरीं** द्रष्टुमारेभे।

तदानीमेव च **वसन्ततिलका** नाम सखी तामुवाच-'त्वं धन्याऽसि, यत् **पवनञ्जयं** पतिं प्राप'। ततो **मिश्रका** नाम सख्युवाच- 'हले ! चरमशरीरं **विद्युत्प्रभं** विहाय कोऽन्यो वरः श्लाघ्यः ?' ततः 'स्वल्पायुर्वरो न श्लाघ्य' इति तया प्रत्युक्ता सा पुनरुवाच- 'त्वं मन्दबुद्धिरसि, स्वल्पमप्यमृतमेव श्रेयः। न तु विषस्य भारोऽपि'। तयोरेवमालापं श्रुत्वा **पवनञ्जयो** दध्यौ-'नूनमस्या इदं प्रियं, कथमन्यथा न निषेधति ?' ततश्च क्रुद्धः सोऽसिमाकृष्य प्रकटीभूय 'ययोर्द्वयो**र्विद्युत्प्रभः** प्रियस्तयोः शिरश्छिद्मीति मनसिकृत्य चलितं तं बाहौ गृहीत्वा **प्रहसितो**ऽवदत्-'साऽपराधाऽपि स्त्री गौरिवाऽवध्या। इयं चाऽनपराधा । यतो ह्रिया नैते निषेधति' । एवं तेन निषिद्धः स निजावासमुपेत्य दुःखितस्तस्थौ ।

प्रातश्च **प्रहसित**मुवाच-'मित्र ! अनयोढयाऽलम्। यतो भृत्योऽपि विरक्तो न श्रेयसे, प्रियायाः किं वक्तव्यम् ? तदेहि, स्वपुरीं गच्छावः'। एवमुक्त्वा यावत् स प्रतस्थे, तावत् **प्रहसित**स्तं धृत्वाऽबोधयत्-

'अङ्गीकृतस्याऽतिक्रमो महतां न युज्यते । किं चाऽ**ञ्जनासुन्दरी** निरपराधा, ततो विरम' । ततः **पवनञ्जयो** विमृश्य कथमपि तत्रैवाऽस्थात् । ततस्तयोर्निश्चिते शुभे लग्ने विवाहमहोत्सवोऽभवत् । **प्रह्लाद**श्च प्रमुदितो **महेन्द्रे**ण सत्कृतस्तद्वधू-वरमादाय स्वां पुरीं प्रति प्रस्थितः । पुरीं प्राप्य च **प्रह्लादोऽञ्जनासुन्दर्याः** सप्तभूमिकं प्रासादं वासायाऽऽर्पयत् ।

इतश्च **पवनञ्जय**स्तां वाचाऽपि न सत्कृतवान् । तेन च सा चन्द्रं विना रात्रिरिव **पवनञ्जयं** विना बाष्पान्धकारावलिप्तमुखी दुःखिता तस्थौ । एवं कियत्यपि काले गते राक्षसेन्द्रस्य दूतः समुपेत्य **प्रह्लाद**मब्रवीत्-'**वरुणो रावणे**न सह वैरायते । तेन च क्रुद्धो **रावणः** सेनया तत्पुरमरौत्सीत् । **वरुण**श्च पुराद् निर्गत्य **राजीव-पुण्डरीकाद्यैः** पुत्रैः समन्वितोऽयुध्यत । तस्मिंश्च रणे वीरै**र्वरुण**पुत्रैः **खर-दूषणौ** बद्ध्वाऽनीयेताम् । ततश्च राक्षससैन्ये भग्ने **वरुणो** निजां नगरीमविशत् । तेन **रावणो** विद्याधरेन्द्रान् प्रत्येकमाकारयितुं दूतान् प्रेषितवान् । भवते चाऽहं प्रेषितोऽस्मि' ।

तच्छ्रुत्वा तत्साहाय्यार्थं **प्रह्लादो** यावच्चचाल तावत् **पवनञ्जयः** समुपेत्य तमुवाच-'तात ! त्वमिहैव तिष्ठ, अहमपि **रावण**मनोरथं पूरयिष्यामि' एवमुक्त्वा साग्रहं पितरं निषिध्य स प्रतस्थे । **अञ्जनासुन्दरी** च पत्युर्यात्रां श्रुत्वोत्सुका प्रासादादवरुह्य तमीक्षितुं स्तम्भमवष्टभ्य तस्थौ । **पवनञ्जय**श्च व्रजन् तां साश्रुनेत्रां दृष्ट्वा दध्यौ-'इयं मन्दमतिर्निर्ह्रीका निर्भीका च । यद् वाऽस्या विरक्तत्वं मया पुराऽपि ज्ञातमेव' । **अञ्जनासुन्दरी** च तस्य पादयोः पतित्वा रचिताञ्जलिरूचे-'त्वया सर्वोऽपि सम्भाषितः, किन्त्वहं मनागपि न । तथाऽपि प्रार्थ्यसे मया-यत् त्वया नाऽहं विस्मर्त्तव्या, ते



पन्थानः शिवाः सन्तु' । एवं कथयन्तीं तामनिन्दितामवगणय्यैव स जयाय ययौ । पत्युरवज्ञया वियोगेन च दुःखिता सा गृहान्तर्गत्वा भूतले निपपात ।

**पवनञ्जय**श्चोत्पत्य गच्छन् रात्रौ **मानसे** सरसि तस्थौ । तत्र च विकृते प्रासादे पर्यङ्कमास्थितः सरस्तीरे पतिवियोगार्त्तचक्रवाकीं क्रन्दन्तीं प्रेक्ष्य दध्यौ-'या विवाहात् प्रभृत्येव न कदाऽपि भाषिता, आगमनकालेऽपि या मयाऽवज्ञाता, अदृष्टमत्सङ्गसुखा सेदानी**मञ्जना** कथं भविष्यति ? धिङ् मामविवेकिनम्' । एवं स्वचिन्तितं च सर्वं स **प्रहसिता**याऽऽख्यत् । ततः **प्रहसित** उवाच-'चिरादप्यद्य साधु त्वया ज्ञातम् । नूनं सा त्वद्वियोगाद् विपद्येत । तामद्याऽप्याश्वासयितुमर्हसि, गच्छ, अद्याऽपि तां समाश्वास्य पुनरागच्छ' । एवं तेन प्रबोधितः स उत्पत्याऽ**ञ्जना**गृहं प्रापत् । तत्र च स द्वार एव तिरोहितस्तस्थौ । **प्रहसित**श्चाऽग्रे भूत्वा तद्गृहे प्राविशत् । **अञ्जना** च विरहार्त्ताऽपि तं दृष्ट्वा 'कस्माद् व्यन्तर इव कः समाययौ । **वसन्ततिलके** ! बहिः कुर्वेतं पुरुषं, **पवनञ्जयं** विहाय न कस्याऽपि मद्गृहे प्रवेशाधिकारोऽस्ति । नाऽहमेनं द्रष्टुमपि क्षमे'त्यब्रवीत् ।

तच्छ्रुत्वा नत्वा **प्रहसित** उवाच-'स्वामिनि ! दिष्ट्या वर्धसे । **पवनः** सोत्कण्ठितः समायातोऽस्ति । तस्य मित्रं **प्रहसितो**ऽहमायातोऽस्मि' । ततोऽ**ञ्जना** जगाद-'विधिना कदर्थितां मां मा कदर्थय । मत्पुराकृतानामेष दोषः । कथमन्यथा तादृशः कुलीनो भर्त्ता मां त्यजेत् ? विवाहात् प्रभृति भर्त्रा त्यक्ताया मम द्वाविंशतिर्वर्षाणि व्यतीयुः । अद्याऽपि पापिन्यहं जीवामि' । ततो दुःखितः **पवनञ्जयो**ऽन्तः प्रविश्य सगद्गदस्वरमुवाच-'विवाहात् प्रभृति निर्दोषाऽपि दोषमारोप्य मयाऽवज्ञाताऽसि, त्वं मद्भाग्यादेवाऽद्याऽपि जीवसि' ।

इत्युक्तवन्तं तमुपलक्ष्य त्रपावती नम्रमुखी सोत्तस्थौ । **पवनञ्जय**श्च तां बाहुना गृहीत्वा पर्यङ्के न्यषदत् । ततः **प्रहसितो वसन्ततिलका** च गृहाद् निर्जग्मतुः ।

ततश्च स्वैरं रममाणयोस्तयोरेकयामेव रात्रिः समाप्ता । प्रभातकल्पां रात्रिं ज्ञात्वा च **पवनञ्जय**स्तामूचे-'कान्ते ! जयाय यास्यामि । अतः परं खेदं मा कार्षीः । सखीभिः समं सुखं तिष्ठ, यावद् **रावण**कार्यं सम्पाद्याऽऽगच्छामि' । साऽप्युवाच-'तत्कार्यं सम्पाद्य शीघ्रमागच्छेः, यदि मां जीवन्तीं द्रष्टुमिच्छसि । किं चाऽद्यैवाऽहमृतुस्नाताऽस्मि । यदि मे गर्भो भवेत् तदा त्वत्परोक्षे लोका मामपवदेयुः' । **पवनञ्जय** उवाच-'सुन्दरि ! शीघ्रमागमिष्यामि। तदा च त्वयि न दोषावसरः स्यात्। तथा मदागमनसूचकमिदं मन्नामाङ्कितमङ्गुलीयं गृहाण । अवसरे सति तत् प्रकाशयेः' । एवमुक्त्वाऽङ्गुलीयं दत्वोत्पत्त्य स **मानस**सरस्तीरस्थं निजं शिबिरं जगाम । ततोऽपि च सैन्येन सह सुर इवाऽऽकाशमार्गेण **लङ्का**नगरीं गत्वा **रावणं** प्रणनाम । **रावणो**ऽपि च सेनासहितः **पातालं** प्रविश्य **वरुण**मभिययौ ।

❀ ❀ ❀

इतश्चाऽ**ञ्जना** तद्दिन एव गर्भं बभार । तस्याः शरीरे च गर्भलक्षणानि क्रमशः प्रकटितानि । तद् दृष्ट्वा श्वश्रूः **केतुमती** साधिक्षेपमवदत्-'त्वया किमिदं कुलद्वयकलङ्ककरमाचरितम् ? यद् विदेशस्थे पत्यौ गर्भवत्यभूः' । श्वश्र्वा निर्भर्त्सिता साऽ**ञ्जना** साश्रुमुखी पत्युरागमनचिन्हं तदङ्गुलीयकमदर्शयत् । तथाऽपि सोवाच-'किमङ्गुलीयकेन मां प्रतारयसि ? यस्तेन नामाऽपि नाऽग्रहीत्, तेन तव सङ्गमः कथम् ? अद्यैव मद्गृहाद् निर्गच्छ, पितुर्गृहं गच्छ' ।



एव**मञ्जनां** निर्भर्त्स्य तां पितृगृहं नेतुमारक्षानादिक्षत् । तेऽपि च तां यानमारोप्य **महेन्द्र**नगरोपान्तेऽमुञ्चन् । तां नमस्कृत्य क्षमयित्वा च स्वस्थानं ययुः । तदानीमेव च रविरस्तमगात् । सा चाऽ**ञ्जना** भीता जाग्रत्येव तां निशामनयत् । प्रातश्चोत्थाय सा शनैः पितृगृहद्वारं ययौ ।

तां दृष्ट्वा ससम्भ्रमो द्वारपालः दृष्ट्वा सख्या निवेदितां तादृशीमवस्थां राज्ञे व्यजिज्ञपत् । राजा च लज्जानम्रमुखोऽचिन्तयत्-'स्त्रीणां चरितमचिन्त्यम् । इयं कुलटा कुलकलङ्काय गृहमागता' । तमेवं चिन्ताचान्तस्वान्तं नयज्ञः **प्रसन्नकीर्ति**नामा पुत्रोऽवोचत्-'एषा द्रुतं निर्वास्यताम् । अनया हि कुलं दूषितम्' । ततो **महोत्साहो** नाम मन्त्री राजानमवोचत्-'पुत्रीणां श्वश्रूदुःखे पितैव शरणम् । किं च **केतुमती** क्रूरा निर्दोषामप्येनां दोषमुत्पाद्य निर्वासयेत् । तद्यावद् दोषा-ऽदोषयोर्निर्णयो न भवेत् तावदेषा स्वपुत्रीति कृपया गुप्तं पाल्यताम्'। ततो नृपः पुनरुवाच-'श्वश्रूस्तथा भवति, किन्तु वधूरीदृशी न भवति। किं च पुरा श्रृणोमि, यदेषा **पवन**स्य द्वेष्या । तत् कथमस्यास्ततो गर्भः सम्भाव्यते ? तदेषा सर्वथा दोषवती तया साधु निर्वासिता । इतोऽपि शीघ्रं निर्वास्यतां, तन्मुखं न पश्यामः' ।

इत्थं नृपाज्ञया द्वारपालोऽ**ञ्जनां** निरवासयत् । सा च क्षुधा तृष्णया चाऽऽर्त्ता श्रान्ताऽश्रूणि वर्षन्ती पदोर्दर्भेण विद्धा शोणितैर्महीतलं रञ्जयन्ती पदे पदे प्रस्खलन्ती रुदन्ती सख्या सहाऽचालीत् । यत्र यत्र चाऽगच्छत् तत्र तत्र पूर्वमेवाऽऽयातै राजपुरुषैः प्रतिषिद्धा कुत्राऽपि स्थितिं न लेभे। इत्थं पर्यटन्ती सा कामप्येकां महाटवीं प्राप्य तरुमूले उपविश्य चिरं विललाप । सख्या च सम्बोध्याऽग्रतो नीता सा गुहान्तर्ध्यानस्थ**ममितगतिं** मुनिं ददर्श । ततस्ते द्वे अपि चारणश्रमणं तं प्रणम्य पुरो भूमौ समुपविष्टवत्यौ । मुनिरपि ध्यानमपारयत् ।

तथा दक्षिणकरमुन्नम्य धर्मलाभाशिषं ददौ । ततस्तत्सखी **वसन्ततिलका** पुनर्भक्त्या तं मुनिं प्रणम्य मूलतः सर्वमप्य**ञ्जना**-दुःखमाचख्यौ । तथाऽस्या गर्भे कोऽभवत् ? केन कर्मणैषेदृशीं दशामाप्तेति पप्रच्छ ।

ततो मुनिरुवाच–'अस्यैव **जम्बूद्वीप**स्य **भरते** क्षेत्रे **मन्दर**नाम्नि नगरे **प्रियनन्दी** वणिगभूत् । तस्य **जया** नाम्न्यां जायायां कलानिधि**र्द-मयन्तो** नाम पुत्रो बभूव । स एकदोद्याने क्रीडन् साधून् दृष्ट्वा तेभ्यो धर्मं श्रुत्वा सम्यक्त्वं प्रतिपद्य तपःसंयमनिष्ठो विपद्य द्वितीये कल्पे देवोऽभूत् । ततश्च्युत्वा **जम्बूद्वीपे मृगाङ्क**नगरे **प्रियङ्गुलक्ष्म्यां** पत्न्यां **हरिचन्द्र**नृपस्य **सिंहचन्द्र**नामा पुत्रो भूत्वा जैनं धर्मं प्रपद्य कालयोगतो विपद्य देवत्वं प्राप्तवान् । ततश्च्युत्वा च **वैताढ्ये वारणे** नगरे **सुकण्ठ**नृपस्य **कनकोदर्यां** पत्न्यां **सिंहवाहनो** नाम पुत्रो बभूव । तत्र च सुचिरं राज्यं भुक्त्वा श्री**विमल**प्रभोस्तीर्थे **लक्ष्मीधर**मुनेर्व्रतमादाय दुस्तपं तपस्तप्त्वा **लान्तके** सुरोऽभवत् । ततश्च्युत्वा च त्वत्सख्या उदरे समवातरत् । अस्याश्च पुत्रो गुणवान् पराक्रमी विद्याधरेश्वरश्चरमदेहो भविष्यति ।

**कनकपुरे** नगरे **कनकरथ**नृपस्य **कनकोदरी लक्ष्मीवती** च द्वे पत्न्यावभूताम् । तयो**र्लक्ष्मीवती** श्राविकाऽऽसीत् । सा च गृहचैत्ये रत्नमयं जिनबिम्बं विधाय प्रत्यहमपूजयत् । **कनकोदर्या** च मात्सर्यात् साऽर्हत्प्रतिमा हृत्वाऽवकरस्याऽन्तश्चिक्षेप । तदा च **जयश्री** नाम्नी गणिनी विहरन्ती समागता तद् दृष्ट्वा 'किमिदमकार्षीः? अत्र भगवत्प्रतिमां प्रक्षिपन्त्या त्वयाऽनेकभवदुःखमुपार्जितम्' । तयैवमुक्ता सा सदुःखा प्रतिमां गृहीत्वा प्रमृज्य क्षमयित्वा च यथास्थानं न्यवेशयत् । तत्प्रभृति च सम्यक्त्ववती जैनं धर्मं प्रपाल्य काले



विपद्य **सौधर्मे** देवी जाता । ततश्च्युत्वा च **महेन्द्र**नृपसुता तवेयं सखी जाता । तदर्हत्प्रतिमाया दुःस्थानक्षेपजमस्या ईदृशं फलम् । तस्मिन् भवे चाऽस्यास्त्वं जामिस्तत्कर्माऽनुमन्त्री चाऽऽसीरित्यनया सह दुःखमनुभवसि । किन्त्वस्यास्तद् दुष्कर्मफलं भुक्तप्रायमस्ति । भवे भवे शुभो जिनो धर्मो गृह्यताम् । अकस्मादागतोऽस्या मातुल एनां स्ववेश्मनि नेष्यति । अचिरादेव च पत्याऽपि सङ्गमो भविष्यति' । एवमुक्त्वा स मुनिस्ते द्वे आर्हते धर्मे स्थापयित्वा नभसोत्पपात ।

अथ ते द्वे अपि किञ्चित्क्रूरं बूत्कारदारुणं सिंहं समायान्तं दृष्टवत्यौ भयार्ते कम्पमानगात्रे यावदतिष्ठतां, तावद् **मणिचूल**नामा तद्गुहाधिपो गन्धर्वोऽष्टापदरूपं विकृत्य तं सिंहमवधीत् । पुनः स्वं रूपं प्रतिपद्य तयोर्मोदाय सभार्योऽर्हद्गुणस्तवनं चकार । तथा ते द्वे तद्गन्धर्वसमीपे तद्गुहायामवस्थिते **मुनिसुव्रतं** पूजयामासतुः ।

अथाऽन्येद्यु**रञ्जना** वज्रा–ऽङ्कुश–चक्राङ्कितपादं सुतं सुषुवे। **वसन्त-तिलका** च तस्याः सूतिकर्म सहर्षं चकार । **अञ्जना** च तं सुतमङ्क-मारोप्य साश्रुमुखी नितरां रुरोद । तां च रुदतीं प्रेक्ष्य विद्याधर उपेत्य मधुरगिरा दुःखकारणमपृच्छत् । ततस्तत्सखी विवाहादारभ्य सुतजन्मान्तं सर्वं वृत्तान्तं कथितवती । स विद्याधरोऽपि रुदन्नवादीत्–'अहं **हनुपुरा**धिप**श्चित्रभानु**सुतः **सुन्दरीमाला**कुक्षिजातस्त्वज्जनन्या भ्राता **मानसवेगो**ऽस्मि । दिष्ट्या त्वां जीवन्तीं दृष्टवानस्मि, समाश्व-सिहि' । ततस्तं मातुलं ज्ञात्वा सा**ऽञ्जना** बाढं रुरोद । स **प्रतिसूर्यो** विद्याधरस्तां रुदतीं वारयित्वा सार्धमागतं दैवज्ञं तद्बालस्य जन्मादिकमपृच्छत् । दैवज्ञो जगाद–'अयं बालः शुभे लग्ने जातोऽस्ति । तेनाऽयं महाराजो भविष्यति, तथाऽस्मिन्नेव भवे सिद्धिमेष्यति' ।

अथ **प्रतिसूर्यो** भगिनीपुत्रीं ससखीं ससुतां च ता**मञ्जनां** विमानमारोप्य स्वपुरं प्रति प्रस्थितवान्। स बालकश्च विमाने लम्बमाना रत्नकिङ्किणीर्ग्रहीतुमिच्छुर्मातुरुत्सङ्गादुत्पपात। गिरिशिखरे च वज्रमिव पतितः सः। तेन च स गिरिस्तत्पातघातवशात् कणशो जातः। **अञ्जना** च विह्वला हृदयं ताडयन्ती करुणं रुरोद। **प्रतिसूर्य**श्च सद्य एव नीचैरागत्य तं बालमक्षताङ्गमेवोपादायाऽर्पितवान्। तथा तां मुदा स्वगृहे निवासयामास। तदन्तःपुरं च तां चारु सच्चकार। 'अयं बालो जातमात्रो **हनुपुरे** समाययावित्यतो मातुलस्तस्य **हनुमानि**त्यभिधेयमकरोत्। तथा स पतितः शैलं चूर्णीकृतवानित्यतः **श्रीशैल** इति द्वितीयाख्यामप्यकरोत्। **हनुमां**श्च यथा सुखं क्रीडन् वृद्धिमाप। **अञ्जना** च श्वश्र्वाऽऽरोपितो दोषः कथमपगच्छेदिति चिन्तयन्ती ह्यताम्यत्।

इतश्च **पवनवेगः** सन्धिं विधाय **वरुणात् खर-दूषणौ** मोचयित्वा **रावणं** तोषयामास। **रावण**श्च सपरिवारो **लङ्कां** जगाम। **पवनो**ऽपि तमापृच्छ्य स्वपुरमाययौ। तत्र च पितरौ प्रणम्याऽ**ञ्जना**वासगृहं गतस्तत्रा**ञ्जनाम**पश्यन् तत्रस्थामेकां स्त्रियं क्वाऽ**ञ्जने**त्यपृच्छत्। साऽपि च **पवनवेग**यात्रात आरभ्याऽ**ञ्जनाया** अरण्यमोचनपर्यन्तं सर्वं वृत्तान्तं यथातथमाख्यत्। तच्छ्रुत्वा च **पवनवेगः** श्वशुरपुरं शीघ्रं गत्वा प्रियामनवलोकमानः कुतश्चित्स्त्रियास्ततोऽ**प्यञ्जना**निर्वासनं श्रुत्वा शैल-वनादिषु तामन्वेषयन् बभ्राम। किन्तु प्रियायाः प्रवृत्तिमप्राप्य विषण्णो मित्रं **प्रहसितं** जगाद-'मित्र! गत्वा पित्रोः कथय-'मयाऽद्य यावत् क्वाऽ**प्यञ्जना** न दृष्टा। पुनस्तामन्वेषयामि। तां द्रक्ष्यामि वा पावकं प्रवेक्ष्यामि'।



ततः **प्रहसितो** द्रुत**मादित्यपुरं** गत्वा **प्रह्लाद-केतुमत्यो**-स्तद्वृत्तान्तं कथयामास। तच्छ्रुत्वा च मूर्च्छिता **केतुमती** कथञ्चिल्लब्धसंज्ञोवाच-**प्रहसित**! मरणे कृतनिश्चयः **पवनः** किं वने एकाकी मुक्तः? मया वाऽविमृश्यकारिण्या निर्दोषा सा किं निरवास्यत?' एवं रुदतीं तां निवार्य **प्रह्लादः** ससैन्यः पुत्रमन्वेष्टुं चचाल। तथाऽ**ञ्जना-पवन**योरन्वेषणाय सर्वत्र दूतं प्रेषयामास। पुत्रं पुत्रवधूं चाऽनवलोकयन् स सत्वरं भ्राम्यन् **भूतवनं** नाम वनमगात्। अत्राऽवसरं च **पवन**श्चितां विरचय्य तत्राऽग्निं ज्वालयामास। **प्रह्लाद**श्च तं ददर्श। **पवन**श्च चितासमीपे स्थित्वा वनदेवताः समुद्दिश्य स्वं वृत्तान्तं निवेद्य त्वद्वियोगात् तव पतिश्चितां प्रविष्ट इति वाचिकं दत्त्वा च चितायां झम्पां दातुमुत्पपात। **प्रह्लाद**श्चाऽपि तच्छ्रुत्वा ससम्भ्रमं तं स्वबाहुभ्यामधारयत्। तथाऽ**ञ्जना**न्वेषणाय सहस्रशो विद्याधराः प्रेषिताः सन्ति मया, तानागमयस्वेत्युवाच च।

अत्रैव चाऽन्तरे तेन प्रेषिताः केचिद् विद्याधरा **हनुपुरं** ययुः। तत्र **प्रतिसूर्या-ऽञ्जनयोः पवन**स्याऽग्निप्रवेशप्रतिज्ञामाचख्युः। **अञ्जना** च तच्छ्रुत्वा हा हताऽस्मीति जल्पन्ती मूर्च्छिता भुवि पपात। शीतोप-चारैर्लब्धसंज्ञां मुहुर्मुहू रुदतीं तां बोधयित्वा **प्रतिसूर्यः** सपुत्रीं विमान-मारोप्य **पवन**मन्वेष्टुं ययौ। भ्राम्यंश्च तत्रैव **भूतवने प्रहसिते**न दूरादपि ददृशे। तथा **प्रह्लाद-पवनयोः** सा**ञ्जनं** समायातं तं जयपूर्वकमाख्यत्। ततः **प्रतिसूर्योऽञ्जना**ऽपि च विमानादवतीर्य **प्रह्लादं** नेमतुः।

**प्रह्लाद**श्च **प्रतिसूर्य**मालिङ्ग्य पौत्रमङ्के स्थापयित्वा जातहर्षो जगाद-'त्वमेव बन्धुर्यद् व्यसनाब्धौ मज्जन्तं सकुटुम्बं मामद्य समुद्धर'। **पवनो**ऽपि च शान्तशोको नितरां मुमुदे। विद्याधरेन्द्राश्च तत्र विद्यामाहात्म्याद् महोत्सवं चक्रुः। तथा सर्वे ते विमानै**र्हनुपुरं**

ययुः । तत्र **मानस**वेगया सार्द्धं **महेन्द्रः केतुमत्य**न्ये बान्धवाश्च समाययुः । ततः पुनरेव तत्र सर्वे महोत्सवं चक्रुः । स्वं स्वं पुरं चाऽन्योन्यमापृच्छ्य ययुः । **अञ्जन**या **हनुमता** च सह **पवन**स्तत्रैव तस्थौ । **हनुमां**श्च वर्धमानः सर्वाः कला जगृहे । विद्याश्चाऽसाधयत् । क्रमशो यौवनं प्रपेदे ।

इतश्चाऽसहनो **रावणः** सन्धिदोषमुद्भाव्य **वरुणं** जेतुं प्रतस्थे। दूतैराहूताश्च सर्वे विद्याधरास्तस्य सैन्यं वर्धयामासुः । **पवन-प्रतिसूर्यौ** च प्रस्थितौ दृष्ट्वा **हनुमानू**चे-'भवन्ताविहैव तिष्ठतम्, अहं शत्रून् जेष्यामि । नाऽहं बाल इत्यनुकम्प्यः' । एवमाभाष्य स कृतप्रस्थान-मङ्गलः सामन्तादिपरिवृतो **रावण**स्कन्धावारं ययौ । **रावण**श्च तं समागतं प्रणमन्तं मुदा स्वाङ्के चक्रे । तथा युद्धाय **वरुण**पुर्याः समीपे प्रतस्थौ ।

**वरुण**श्चाऽपि ससैन्यः पुराद् निर्ययौ । **वरुण**श्च युद्धे **रावणं** खेदयामास । ततः क्रुद्धो **हनुमान्** विद्यासामर्थ्याद् **वरुणा**त्मजान् युद्ध्वा बबन्ध । तद् दृष्ट्वा च क्रुद्धो **वरुणो हनुम**न्तमधाविष्ट । **रावणो**ऽपि तमापतन्तं दृष्ट्वा बाणवृष्टिं कुर्वन् मध्य एवाऽवरुरोध। छलेन च **वरुण**माकुलं कृत्वा बबन्ध । ततश्च सर्वतो जयजयारावपूर्वकं **रावणो** निजस्कन्धावारं प्राप । **वरुणं** च वशगं विधाय सपुत्रं मुमोच । **वरुण**श्च **हनुमते सत्यवतीं** नाम स्वपुत्रीं ददौ । **रावण**श्च हृष्ट**श्चन्द्रणखा**पुत्री**मनङ्गकुसुमां हनुमते** दत्त्वा **लङ्कां** ययौ । तथा **सुग्रीवः पद्मरागां नलो हरिमालिनी**मन्ये चाऽपि स्वाः सुता **हनुमते** प्रददुः । **हनुमां**श्च **रावणे**न सादरं विसृष्टो **हनुपुरं** जगाम । अन्ये चाऽपि वानरेन्द्रा विद्याधरेन्द्राश्च स्वं स्वं पुरं ययुः ॥ ३ ॥

*इति हनुमदुत्पत्ति-वरुणसाधनो वर्णनात्मकः तृतीयः सर्गः ॥३॥*

## चतुर्थः सर्गः

अथ **मिथिला**नगर्यां हरिवंशे **वासवकेतु**नृपो बभूव । तस्य **विपुला**कुक्षिजो भुवि ख्यातो **जनको** नाम पुत्र आसीत् । **अयोध्या**पुर्यां चेक्ष्वाकुसन्ताने सूर्यवंशीयो विंशतितमार्हतस्तीर्थे **विजया**ख्यस्य नृपस्य **हिमचूला**कुक्षिजौ **वज्रबाहु-पुरन्दरौ** द्वौ पुत्रावभूताम् । **नागपुरे** नगरे चे**भवाहन**नृपस्य **चूडामणि**कुक्षिजा **मनोरमा** पुत्र्यासीत् । **वज्रबाहु**श्च तां परिणीयो**दयसुन्दरा**ख्येन श्यालेनाऽनुस्रियमाणो **मनोरमा**मादाय स्वपुराय प्रस्थितवान् । स गच्छंश्च मार्गे **वसन्ता**द्रौ ज्ञानिनं तपस्यन्तं महामुनिं **गुणसागरं** दृष्ट्वा जातहर्षो वाहनं धृत्वाऽऽह-'पुण्येन दृष्टोऽयं महामुनिर्मया ऽवश्यवन्द्यः' । तच्छ्रुत्वो**दयसुन्दरे**ण परिव्रज्यामिच्छसीति पृष्टस्तथेति समर्थितवान् । 'यदि तथा, तदा विलम्बो न कार्यः, अहमपि ते सहायः' इत्यु**दयसुन्दरे**ण पुनरुक्तः प्रतिज्ञाय प्रतिज्ञाप्य च वाहनादुत्तीर्य **वसन्ता**द्रिमु**दयसुन्दरा**दिभिः परिवृत आरुरोह ।

तत्र **उदयसुन्दरो वज्रबाहु**मुवाच-'स्वामिन् ! मा प्रव्राजीः, मम परिहासवाचं धिक् । नर्मोक्तिव्यतिक्रमे न कोऽपि दोषः' । ततो **वज्रबाहु**रुवाच-'चारित्रं मर्त्यजन्मफलं, तत्ते नर्मोक्तिरपि परमार्थफला जाता । प्रतिज्ञामनुपालयस्व, क्षत्रियाणामेष कुलधर्मः' । एवमु**दयसुन्दरं** प्रतिबोध्य **वज्रबाहुर्गुणसागर**मुनिमुपेत्य तत्पादान्ते

**उदयसुन्दरे**ण **मनोरम**या पञ्चविंशतिकुमारैश्च सह परिव्रज्यामुपाददे। **वज्रबाहुं** प्रव्रजितं श्रुत्वा च **विजयो** नृपोऽपि वैराग्यमापन्नः **पुरन्दरं** राज्ये न्यस्य **निर्वाणमोह**मुनेः पार्श्वे व्रतं जग्राह । **पुरन्दरो**ऽपि **पृथ्वी**कुक्षिजं **कीर्तिधरं** पुत्रं राज्येऽभिषिच्य **क्षेमङ्कर**मुनिपार्श्वे प्राव्राजीत् ।

**कीर्तिधर**श्चाऽपि **सहदेव्या** समं विषयान् भुञ्जानो व्रतं जिघृक्षुर्मन्त्रिभिर्निवेदितः-'अपुत्रस्य तव व्रतादानं नाऽर्हति, तद्यावत् पुत्रो नोत्पद्यते तावत् प्रतीक्षस्व' । ततो गृहवासिनस्तस्य यथाकालं **सहदेवी**कुक्षिजः **सुकोशलो** नाम पुत्रो बभूव । 'जातं बालं श्रुत्वा मे पतिः प्रव्रजिष्यती'ति **सहदेवी** तं पुत्रमगोपयत् । किन्तु नृपः सुगुप्तमपि तं बालं जानाति स्म । ततो राजा **सुकोशलं** राज्ये न्यस्य **विजयसेन**सूरिपादान्ते व्रतं गृहीतवान् । तीव्रं तपस्तप्यमानश्चाऽन्यदा स गुर्वनुज्ञयाऽन्यतो विजहार ।

अथैकदा मासोपवासी भिक्षार्थं **साकेतं** प्राप्तो मध्याह्ने तत्र भ्रमति स्म । प्रासादोपरिस्था **सहदेवी** च तं दृष्ट्वाऽचिन्तयत्- 'पितरं दृष्ट्वा **सुकोशलो**ऽपि यदि प्रव्रजेत्, तदा निर्वीरा स्यामिति पुत्रराज्यस्थिरतार्थं निर्दोषोऽपि पतिर्नगराद् निर्वास्यः' । ततो राज्ञी तमन्यव्रतिभिः सह नगराद् निरवासयत् । किन्तु **सुकोशल**स्य धात्री व्रतिनं स्वामिनं निर्वासितं ज्ञात्वा भृशं रोदिति स्म । **सुकोशले**न किं रोदिषीति पृष्टा च यथातथं वृत्तान्तं निवेदयामास।

तच्छ्रुत्वा च स पितुरन्तिकं गत्वा विरक्तो बद्धाञ्जलिर्व्रतग्रहणेच्छां निवेदयामास। सगर्भा च तत्पत्नी **चित्रमाला** मन्त्रिभिः सहेत्याऽस्वामिकं राज्यं त्यक्तुं नाऽर्हसीति निवारयामास। ततो नृपो



जगाद-'गर्भस्थस्तव सूनुरेव मया राज्येऽभिषिक्तः' । तदनन्तरं च व्रतं गृहीत्वा दुस्तपं तपस्तेपे । निर्ममौ च तौ पिता-पुत्रौ सहैव विहारं चक्रतुः । **सहदेवी** च तनयवियोगखिन्नाऽऽर्त्तध्यानपरा मृत्वा गिरिगुहायां व्याघ्री बभूव ।

अथ तौ **कीर्तिधर-सुकोशल**मुनी वर्षर्त्तुचतुर्मासीं गमयितुमेकस्यां गिरिगुहायां तस्थतुः । कार्तिके मासि समायाते पारणार्थमटन्तौ तौ तया व्याघ्र्या मार्गे दृष्टौ । सा च तौ दृष्ट्वा विस्फारितमुखा दधाव । तौ च मुनी धर्मध्यानापन्नौ तथैव कायोत्सर्गेणाऽविकम्पितौ तस्थतुः । सा चाऽऽदौ प्रहारेण **सुकोशलं** भूमौ निपात्य नखैस्तच्चर्म विदार्याऽसृजमपिबत् । किन्तु कर्मक्षयसहायेयमित्यखिन्नो मुनिः शुक्लध्यानस्थस्तत्कालोत्पन्नकेवलो मोक्षमाप । **कीर्तिधरो**ऽपि केवलं प्राप्य मोक्षं ययौ ।

इतश्च **सुकोशल**नृपप्रिया **चित्रमाला** **हिरण्यगर्भं** पुत्रं सुषुवे। **हिरण्यगर्भ**स्य च **मृगावती**कुक्षिजो **नघुषो** नाम पुत्रो बभूव । **हिरण्यगर्भ**श्च तृतीये वयसि **नघुषं** राज्ये निवेश्य **विमल**मुनिपादान्ते व्रतमग्रहीत् । **नघुषश्च** **सिंहिक**या विषयान् भुञ्जान **उत्तरापथ**नृपान् जेतुमभिययौ । **सिंहिकां** च स्वे राज्य एव मुक्तवान् । तदा **दक्षिणापथ**राज इह **नघुषो** नाऽस्तीति च्छलेनाऽ**योध्यां** रुरुधिरे । ततश्च क्रुद्धा **सिंहिका** तान् सिंही द्विपानिव बलेन पराभूयाऽनाशयत्। **नघुषश्चोत्तरापथं** जित्वा समागतः पत्न्या जयवृत्तान्तं श्रुत्वा दध्यौ- 'दुष्करमिदं कर्म स्त्रीणामयोग्यं तदवश्यमियं कुलटे'ति मनसि निश्चित्य तां **सिंहिकां** प्रियामपि तत्याज ।

एकदा चाऽन्यथाऽशान्तं **नघुष**स्य दाहज्वरं ज्ञात्वा सा स्वसतीत्वज्ञापनाय पत्युस्तापच्छेदाय च जलमादाय **नघुष-**

समीपमागता । 'नाथ ! त्वां विना परः पुमान् यदि मया नाऽवलोकितस्तदा तव ज्वरोऽपयात्वि'ति सत्यश्रावणं कृत्वा जलेन पतिमभिषिषेच । नृपश्च तदैव रोगमुक्तस्तां पूर्ववदेव बहु मेने । सुराश्च पुष्पवृष्टिं चक्रुः । कियत्यपि काले गते च **नघुषस्य सिंहिका**कुक्षिजः **सोदासो** नाम पुत्रो बभूव । **नघुषश्च सोदासं** राज्ये न्यस्य परिव्रज्यामुपाददे ।

**सोदास**नृपे शासति चाऽष्टाह्निकोत्सवे मन्त्रिणोऽमारिं घोषयामासुः । तथा **सोदासं** त्वत्पूर्वैर्मांसं नाऽखादीति त्वमपि तन्मा खादीरित्युपादिशन् । **सोदास**स्तु मांसप्रियः 'त्वयाऽवश्यं गुप्तं मांसं देयमि'ति पाचकानादिशत् । अमारिघोषणायाश्च सूदः क्वाऽपि मांसं न प्राप । ततो राजाज्ञाभङ्गभिया मांसाप्राप्तेश्च मृतबालमांसमेव पक्त्वा **सोदासा**य ददौ । स च स्वादु तन्मांसं वर्णयित्वा कस्येदमिति सूदानपृच्छत् । नरमांसमिति तेनोक्तश्चाऽद्यैवैतद् मह्यं देयमिति तान् समादिशत् । ततस्ते प्रत्यहं पुरे बालानहार्षुः । मन्त्रिणस्तथोग्रकर्माणं नृपं ज्ञात्वा धृत्वा वने तत्यजुः। तत्पुत्रं **सिंहरथं** राज्येऽभिषिषिचुश्च। **सोदास**स्तु मांसं खादन् पृथिव्यां बभ्राम । एकदा च **दक्षिणापथे** कमपि मुनिं दृष्ट्वा धर्ममपृच्छत् । मुनिश्च तस्मा आर्हतमहिंसाप्रधानं धर्मं समुपदिदेश । **सोदास**स्तं धर्मं श्रुत्वा चकितः प्रमुदितः परमश्रावकोऽभवत् ।

इतश्च **महापुरे** नगरेऽपुत्रे राज्ञि मृते पञ्चभिर्दिव्यैः **सोदासो** नृपो बभूव । ततः स ममाऽऽज्ञां कुर्विति **सिंहरथं** प्रति दूतं प्रैषयत्। तेन तिरस्कृतश्च दूतः समागत्य **सोदासा**य यथातथं वृत्तमाख्यत् । **सोदास**श्च युद्ध्वा **सिंहरथं** विजित्य राज्यद्वयं तस्मै दत्त्वा स्वयं प्राव्राजीत् । **सिंहरथ**स्य च **ब्रह्मरथ**स्तस्य **चतुर्मुख**स्ततो **हेमरथ**-



स्तस्य **शतरथः** पुत्रो बभूव । ततः क्रमादु**दयपृथुर्वारिरथ इन्दुरथ आदित्यरथो मान्धाता वीरसेनः प्रतिमन्युः प्रतिबन्धू रविमन्यु-र्वसन्ततिलकः कुबेरदत्तः कुन्थुः शरभो द्विरदः सिंहदशनो हिरण्यकशिपुः पुञ्जस्थलः ककुत्स्थो रघु**श्चेत्येतेषु केषुचिद् मुक्तेषु केषुचित् स्वर्गेषु च **साकेतपुरेऽनरण्यो** नाम नृपो बभूव । तस्य **पृथ्वी**कुक्षिजौ द्वाव**नन्तरथ दशरथा**ख्यौ पुत्रावभूताम् ।

इतश्चाऽ**नरण्य**स्य मित्रं **सहस्त्रकिरणो** नृपो युद्धे **रावणे**न पराजितो वैराग्यमापन्नो व्रतमाददे । तत्सौहार्दाद**नरण्यो**ऽपि मासजाते लघुपुत्रे राज्यं न्यस्याऽ**नन्तरथे**न सह व्रतं गृहीतवान् । **अनरण्ये** मोक्षमाप्तेऽ**नन्तरथ**स्तपस्तप्यमानो महीं विजहार । **दशरथ**श्च बालोऽपि क्रमाद् वर्धमान आर्हद्धर्मपरायणो **दभ्रस्थलपुरे**शितुः **सुकोशल**स्याऽ**मृतप्रभा**कुक्षिजां रूप-लावण्यसम्पन्नाम**पराजितां** नाम कन्यामुदुवाह। तथा **कमलसङ्कुले** पुरे **सुबन्धुतिलक**नृपस्य **मित्रादेवी**कुक्षिजां **सुमित्रे**त्यपराभिधां **कैकेयीं** नाम कन्यामन्यां च **सुप्रभा**ख्यां राजपुत्रीं परिणिनाय । ताभिर्वैषयिकं सुखं भुञ्जानश्च स धर्मा-ऽर्थानसाधयत् ।

❁ ❁ ❁

इतश्च **भरता**र्धेश्वरो **रावणः** सभामास्थाय नैमित्तिकमपृच्छत्- 'मम स्वतः परतो वा मृत्युर्भावी ?' ततो नैमित्तिकोऽवोचत्- 'भाविन्या **जानकी**नामनार्या हेतो**र्दशरथ**पुत्रात् ते मृत्युर्भविष्यती'- ति । तच्छ्रुत्वा **विभीषण** उवाच-'नैमित्तिकस्याऽस्य वचो वितथी-करिष्यामि, अनर्थमूलं **जनकं दशरथं** च तत्कन्यातनयजनकं सद्य एव हनिष्यामि, तदेवं च्छिन्ने मूले नैमित्तिकवचोऽवश्यमेव मिथ्या

स्यात्' । ततो **रावणे**न तथाऽस्त्वित्युक्तः स स्वगृहं जगाम । तत्सभास्थो **नारद**श्च तच्छ्रुत्वा **दशरथ**स्याऽन्तिकं जगाम । तत्र च तेनाऽभ्युत्थानादिना सत्कृतः कुत आयासीति पृष्टश्च सर्वं यथातथं निवेदयामास ।

राजा **दशरथो जनक**श्च मन्त्रिणे सर्वं वृतं समाख्याय राज्यं समर्प्य च कालयापनेच्छया निर्ययौ । मन्त्रिणश्च शत्रुमोहायाऽन्धकारे **दशरथस्य जनक**स्य च मृन्मयीं प्रतिमां नृपालये स्थापयामासुः । **दशरथ-जनकौ** चाऽलक्ष्यौ महीमटतुः । **विभीषण**श्चैत्याऽन्धकार एव **दशरथ**मूर्तेर्मस्तकं चकर्त्त । तदानीं च नगरे महान् कोलाहलो जज्ञे । अन्तःपुरे च महानाक्रन्दध्वनिरुत्तस्थौ । अङ्गरक्षकाश्च सन्नह्या-ऽधावन् । मन्त्रिणश्च मृतकार्याणि विदधुः । ततो **विभीषणो दशरथं** मृतं ज्ञात्वा **मिथिले**श्वरं **जनक**मेकमकिञ्चित्करमहत्वैव **लङ्कां** ययौ ।

भ्राम्यन्तौ मिथो मिलितौ **जनक-दशरथौ** मित्रे **उत्तरापथं** प्रापतुः । तत्र **शुभमति**नृपस्य पुरे तद्दुहितु**र्द्रोणमेघ**सोदरायाः **कैकेय्याः** स्वयंवरं श्रुत्वा तन्मण्डपमुपेयतुः । **हरिवाहण**मुख्यानां नृपाणां मध्ये च तौ मञ्चे निषेदतुः । **कैकेयी** चाऽलङ्कृता साक्षाल्लक्ष्मीरिव स्वयंवरमण्डपमुपागता प्रतीहार्या दत्तहस्ता भूयसो नृपानतीत्य गङ्गा सागरमिव **दशरथं** प्राप्य तत्रैव तस्थौ । सातिशयं प्रमोदमाप्ता च **दशरथ**कण्ठे वरमालां चिक्षेप । **हरिवाहणा**दयश्च नृपास्तिरस्कृतंमन्या बहु विरुद्धं जल्पन्तः स्वशिबिरमागत्य सैन्यानि संवर्मयामासुः । **दशरथ**स्य पक्षे **शुभमति**श्चाऽपि महोत्साहेन चतुर-ङ्गिणीं संवर्मयामास ।



**दशरथ**श्च 'प्रिये ! त्वं सारथिकर्म कुरु, यथा शत्रून् मथ्नामी'ति **कैकेयी**मुवाच । सकलकलाकौशलशालिनी **कैकेयी** चाऽपि रश्मिं गृहीत्वा महारथमारुरोह । **दशरथ**श्चाऽपि सन्नद्ध एकाक्येव रथमारुरोह । ततः **कैकेयी** शत्रुरथैः प्रत्येकं युगपदिव निजरथमयोजयत् । लघुहस्तो **दशरथो**ऽपि **हरिवाहणा**दीनां रथान् प्रत्येकं चूर्णयामास । इत्थं सर्वानपि भूपान् विद्राव्य स **कैकेयीं** परिणिनाय । 'त्वत्सारथ्येन प्रसन्नोऽस्मि, वरं वृण्वि'ति च **कैकेयी**-मुवाच । ततः 'समये वरं याचिष्ये, तन्न्यासीभूतोऽस्तु मे वर' इति **कैकेय्यो**क्तश्च नृपस्तदनुमेने । ततो बलाद् हृतैः परसैन्यैः सह **दशरथो** लक्ष्म्येव **कैकेय्या** समं **राजगृह**नगरीं ययौ । **जनक**श्चाऽपि स्वां नगरीं जगाम ।

अथ **दशरथ**स्तत्रैवाऽ**पराजिता**मुख्यमन्तःपुरमानाययामास । तत्र **राजगृहे** राज्ञीभी रममाणश्चिरमस्थात् । काले गच्छति चा-ऽ**पराजिता** बलभद्रजन्मसूचकान् गज-सिंह-चन्द्र-सूर्यान् निशाशेषे स्वप्नेऽपश्यत् । तदा महर्द्धिको देवो **ब्रह्मलोका**च्च्युत्वा तत्कुक्षाव-वातरत् । पूर्णे समये च सम्पूर्णलक्षणं शुक्लवर्णं सुतं सुषुवे । नृपश्च समहोत्सवं तस्य **पद्म** इत्यभिधामकरोत् । स बालो **राम** इत्यपि प्रथितो बभूव । **सुमित्रा**ऽपि च विष्णुजन्मसूचकान् गज-सिंह-चन्द्रा-ऽर्क-वह्नि-श्री-समुद्रान् निशाशेषे स्वप्नेऽपश्यत् । तदानीं च देवलोकाद् महर्द्धिको देवश्च्युत्वा तत्कुक्षाववातरत् । समये च घनश्यामं सर्वलक्षणलक्षितं जगन्मित्रं पुत्ररत्नं सुषुवे । नृपश्च समहोत्सवं तस्य **'नारायण'** इति नामाऽकरोत् । स **लक्ष्मण** इत्यपरनाम्ना भुवि ख्यातो बभूव । नील-पीताम्बरौ धात्रीभिर्लाल्य-मानौ क्रमेण वर्धमानौ तौ क्रमेण सकलाः कला जगृहतुः ।

अन्यदा च नृपस्तयोः कुमारयोर्विक्रमेण विश्वस्तः स्वा**मयोध्यापुरीं** ययौ। तत्र च सूर्य इव प्रतापेन भासमानः स महीमन्वशात्। तत्र च **कैकेयी** शुभस्वप्नसूचितं **भरतं** नाम पुत्रमसूत। **सुप्रभा** च **शत्रुघ्नं** नाम कुलनन्दनं नन्दनमजीजनत्। स्नेहाच्च **भरत-शत्रुघ्नौ** बलदेव-वासुदेवाविवाऽवियुक्तावेवाऽनिशं तस्थतुः ।

इतश्चाऽस्मिन्नेव **जम्बूद्वीपे भरते** क्षेत्रे **दारुग्रामे वसुभूति**र्नाम द्विजो बभूव । तस्य चाऽ**नुकोशा**कुक्षिजोऽ**तिभूति**र्नाम पुत्रो बभूव। **अतिभूते**श्च **सरसा**ख्या पत्न्यासीत्। सा च जातरागेण **कयान**नाम्ना विप्रेण च्छलाज्जह्रे। **अतिभूति**श्च तामन्वेष्टुं भूतवद् भृशं महीं बभ्राम। **अनुकोशा वसुभूति**श्चाऽपि सुतस्नुषार्थे महीं चेरतुः । तौ च सुत-स्नुषे अपश्यन्तौ पर्यटन्तावेकं साधुं दृष्ट्वा भक्तितो वन्दित्वा धर्मं श्रुत्वा तन्मुनिपार्श्वे व्रतं जगृहतुः । **अनुकोशा** च गुरोराज्ञया **कमलश्रियं** नामाऽऽर्यिकां ययौ । काले तौ विपद्य **सौधर्मे** देवत्वमापतुः । **वसुभूति**श्च ततश्च्युत्वा **वैताढ्ये चन्द्रगति**नामा **रथनूपुर**पुरेशोऽभूत्। **अनुकोशा** चाऽपि ततश्च्युत्वा तस्य **पुष्पवती** नाम भार्या जाता । **सरसा** च कामप्यार्यिकां दृष्ट्वा प्रव्रज्य मृत्वै**शाने** देवी जाता । **सरसा**विरहार्तोऽ**तिभूति**श्च विपद्य संसारं चिरं भ्रान्त्वा हंसपोतोऽभवत् ।

एकदा च श्येनेन भक्ष्यमाणः स साधुसमीपं पपात । कण्ठगतप्राणस्य तस्य स साधुर्नमस्कारमन्त्रं ददौ। अनन्तरं च मृतो नमस्कारप्रभावेण स दशवर्षसहस्रायुः किन्नरेषु देवोऽभवत्। ततश्च्युत्वा च **विदग्धे** पुरे **प्रकाशसिंह**भूपतेः **प्रवरावल्ल्यां** पत्न्यां **कुण्डलमण्डितः** पुत्रो बभूव । **कयानो**ऽपि भोगासक्तश्चिरं भवं भ्रान्त्वा **चक्रपुरे चक्रध्वज**नृपपुरोहितस्य **धूमकेश**स्य **स्वाहा**कुक्षिजः



**पिङ्गलो** नाम सुतो बभूव । स च **चक्रध्वज**स्य पुत्र्याऽ**तिसुन्दर्या** सहैकगुरोः समीपे पपाठ । काले गच्छति च परस्परमनुरागे जाते **पिङ्गलः** छलात् तां हृत्वा **विदग्ध**नगरं ययौ । तत्र चाऽज्ञानः स तृण-काष्ठादि विक्रयात् कथञ्चित्कालं यापयामास ।

**कुण्डलमण्डित**श्च तत्राऽ**तिसुन्दरीं** दृष्ट्वाऽन्योन्यमनुरागे जाते तामपहृत्य पितुर्भिया **दुर्गदेशे** पल्लीं कृत्वाऽवास्थित। **पिङ्गल**श्च तया विरहित उन्मत्त इव महीमटन् कदाचि**दार्यगुप्त**मुनिं दृष्ट्वा धर्मं श्रुत्वा तत्पार्श्वे व्रतं गृहीतवान् । किन्तु सोऽ**तिसुन्दर्याः** प्रेम न मुमोच। पल्लीस्थितः **कुण्डलमण्डित**श्च च्छलात् सर्वदा **दशरथ**प्रजां लुण्टयामास। ततो **दशरथा**ज्ञया **बालचन्द्रा**ख्यः सामन्तः सौप्तिकं प्रदाय बद्ध्वा तं **दशरथ**स्याऽन्तिकमनैषीत्। ततो **दशरथः** काले गच्छति शान्तकोपः **कुण्डलमण्डित**ममुचत् । ततः **कुण्डलमण्डितः** पितृराज्यार्थं महीमटन् **मुनिचन्द्र**मुनेर्धर्मं श्रुत्वा श्रावकोऽभवत्। राज्यकाम एव च विपद्य स **मिथिला**नगरे **जनक**भार्याया **विदेहायाः** उदरे **कुण्डलमण्डित**जीवयुग्मरूपेण सुता जाता। पूर्णे काले च **विदेहा** युगपत् पुत्र-कन्यके असूत ।

**पिङ्गल**श्च विपद्य **सौधर्मे** देवो जातोऽवधिना प्राग्जन्म पश्यन् शत्रुं **कुण्डलमण्डितं** जनकपुत्रं दृष्ट्वा पूर्ववैराज्जातक्रोधस्तं जातमात्रं हृत्वा दध्यौ-'किमेनं शिलातले आस्फाल्य निहन्मि, अथवा पूर्वभवदुष्कर्मणः फलं भूयस्सु भवेष्वन्वभवं, तदेनं हत्वा पुनरनन्तभवः कथं स्यामि'ति विचार्य भूषणादिभिर्भूषयित्वा तं बालं पतत्पतङ्गप्रतिमं **वैताढ्य**दक्षिणश्रेण्यां **रथनूपुर**पत्तने **नन्दनो**द्याने तूलिकायामिव शनैरमुचत् । **चन्द्रगति**श्च तं दृष्ट्वा किमेतदिति जातसम्भ्रमस्तन्निपातानुसारेण **नन्दनो**पवनं गतस्तं दृष्ट्वाऽपुत्रत्वात्

पुत्रत्वेन स्वयमाददे । तथा **पुष्पवत्त्याः** समर्प्य 'देव्यद्य पुत्रं सुषुवे' इति पुर्यघोषयत् । समहोत्सवं च तस्य भामण्डलयोगाद् **भामण्डल** इति नाम चकार । ततः स बालो विद्याधरीभिर्लालितः क्रमाद् ववृधे ।

❀ ❀ ❀

इतश्च **विदेहा** पुत्रेऽपहृते करुणस्वरं रुरोद । **जनक**श्च प्रतिदिशं दूतान् प्रेष्य तमन्वेषयामास । किन्तु चिरादपि क्वाऽपि तत्प्रवृत्तिं नाऽऽप । अनेकगुणसस्यानामत्र प्रादुर्भाव इति **मिथिले**शो युग्मजातायाः पुत्र्याः **सीते**ति नाम चकार । काले गच्छति च तयोः शोकोऽस्तमियाय । **सीता** च क्रमाद् वर्धमाना चन्द्रलेखेव कलापूर्णा जाता । तां च वयस्थां दृष्ट्वा कोऽस्या अनुरूपो वरो भवितेति **जनको** दिवानिशं चिन्तयामास । चरैश्च राज्ञां कुमारान् ज्ञात्वाऽमात्यैर्विचारयन् न क्वाऽपि तुतोष ।

तदानीमेव चाऽ**र्धबर्बरैरातरङ्गतमादि**नृपैर्बहुभिस्तस्य भूमिरुपदुद्रुवे । तान् वशीकर्तुमक्षमश्च **जनको दशरथा**ह्वानाय दूतं प्राहिणोत् । नृपेण सत्कृत्य समागमकारणं पृष्टश्च दूत उवाच-'त्वं **जनक**स्य मित्रमस्ति, तेनाऽद्य विधुरे समुपस्थिते कुलदेवतेव तेन स्मृतोऽसि । **वैताढ्य**स्य दक्षिणतः **कैलास**स्योत्तरतश्च भूयांसोऽनार्या जनपदाः सन्ति । तेष्व**र्धबर्बरे** नाम देशे **मयूरमाल**नगरे **आतरङ्गतमो** नाम म्लेच्छराजोऽस्ति । तस्य तनयाश्च **शुक-मङ्कन-काम्बोज**प्रभृतीन् विषयान् भुञ्जते । अधुना चाऽऽ**तरङ्गो जनक**भूमिमुपाद्रवत् । प्रतिस्थानं च चैत्यानि बभञ्जुः। तस्माद् मित्रस्य धर्मस्य च परित्राणं कुरुष्व' । तच्छ्रुत्वा च **दशरथो** यात्राभेरीम-



वादयत् । ततो **राम** उवाच-'म्लेच्छोच्छेदाय स्वयं चेत् तातो यास्यति तदा **रामः** सानुजः किं करिष्यति ? ततः प्रसीद, विरम, मां समादिश, अचिरादेव जयवार्तां श्रोष्यसि' ।

इत्थं राजानमनुज्ञाप्य सेनापरिवृतः सानुजो **रामो मिथिला**पुरीं जगाम । तत्र च पुरीपरिसरे म्लेच्छभटान् दृष्टवान् । म्लेच्छाश्च सत्वरमेव **राम**मुपद्रोतुं प्रावर्त्तन्त । तैर्युगपदेवाऽस्त्रै **राम**सैन्यमन्धीकृतम् । ततः क्रुद्धो रामो धनुरधिज्यं विधाय मृगान् व्याध इव तानस्त्रैर्विव्याध । **आतरङ्गा**दयश्च म्लेच्छाः कुपित-विस्मिता युगपदस्त्राणि ततोऽभि**रामं** दधावुः । **राम**श्च शरभः कुञ्जरानिव तान् म्लेच्छानभाङ्क्षीत् । ततस्ते म्लेच्छाः काकनाशं नष्टाः कान्दिशीकाः पलायामासुः । **जनक**श्च स्वस्थो बभूव । ततः प्रसन्नो **जनको रामाय** स्वसुतां **सीतां** ददौ ।

तदानीं च **नारदो जानकी**रूपमाकर्ण्य कौतुकात् तां द्रष्टुं कन्यागृहं निवेश । तं च भीषणं दृष्ट्वा **सीता** भीता कम्पमानगात्रा हा मातरित्याक्रोशन्ती गर्भगृहान्तरविशत् । ततो **नारदो** दासी-द्वारपालाद्यैः कण्ठे शिखादिषु च धृतः क्षुभितः कथञ्चन स्वं विमोच्योत्पत्त्य **वैताढ्यं** गतोऽचिन्तयत्-'दिष्ट्या **वैताढ्यं** प्राप्तोऽस्मि' इह दक्षिणश्रेण्यां **चन्द्रगति**पुत्रस्तरुणः पराक्रमी **भामण्डलो**ऽस्ति, तत्**सीतां** पटे लिखित्वाऽस्य तद्रूपं दर्शयामि । येनाऽयं हठात् तामपहरति । एवमेष कृते प्रतिकरोमि' ।

ततस्सद्यस्तथा कृत्वा **भामण्डल**स्य **सीता**रूपमदर्शयत् । **भामण्डल**श्चाऽदृष्टपूर्वं तद्रूपं दृष्ट्वा भूतेनेव कामेनाऽऽक्रान्तो जातुचिद् निद्रां न लेभे । विषण्णं तं दृष्ट्वा **चन्द्रगति**ना कारणं

पृष्टश्च ह्रिया सोऽधोमुखो जातः । ततो वयस्यैः कारणं ज्ञात्वा स नृपो **नारदं** भक्त्या स्वगृहमानीतवान् । ततः सर्वं **सीता**वृत्तान्तं ज्ञात्वा 'तवैवैषा पत्नी भविष्यति, मा खिद्यस्वे'ति पुत्रमाश्वास्य **नारदं** व्यसृजत् । ततो **जनक**मपहृत्याऽऽनयेति **चपलगतिं** नाम विद्याधरमादिदेश। सोऽपि रात्रावनुपलक्षितो **जनकं** हृत्वा राज्ञः समर्पयामास । तत**श्चन्द्रगति**र्बन्धुवत् स्नेहाद् **जनकं** समाश्लिष्य समाश्वास्य च सस्नेहमवदत्-'तव पुत्री **सीता** सर्वगुणसम्पन्नाऽस्ति, **भामण्डलो** मम पुत्रश्चाऽपि तथाऽस्ति, तद्द्वयोर्वधू-वरत्वेन संयोगोऽस्तु, आवयोश्चाऽपि मिथो मैत्री सम्पद्यताम्' ।

ततो **जनक** उवाच-'मया स्वसुता **रामा**य दत्ता कथमन्यस्य दीयताम् ? कन्या हि सकृत् प्रदीयते' । तत**श्चन्द्रगतिः** प्राह-'मम स्नेहवृद्ध्यर्थमेवाऽऽनीय याचितोऽसि, तामहं हर्त्तुमपि समर्थः । यद्यपि त्वया **सीता रामा**य दत्ता, तथाऽपि **रामो** नः पराजित्यैव तां परिणेष्यति मद्गृहे देवताज्ञया यक्षसहस्राधिष्ठिते दुःसहतेजसी **वज्रावर्त्ता-ऽर्णवावर्त्ते** द्वे धनुषी कुलदेवतावत् पूज्ये कृते बलभद्र-वासुदेवयोर्भविष्यतः, ते गृहाण । यदि **दाशरथि**राभ्यामेकमप्यधिज्यं करोति, तदा वयं जिताः, **रामः सीता**मुद्वहतु' । **जनक**मेवमुक्त्वा बलात् प्रतिज्ञाप्य सपुत्रस्ते धनुषी **जनकं** च **मिथिला**मानैषीत् । तत्र च **चन्द्रगतिर्जनकं** राजसद्मनि मुमोच, स्वयं च पुर्या बहिर्भुवि सपरिवारोऽवात्सीत् ।

अथ **जनको** निशि तद्वृत्तं सर्वं देवीं **विदेहां** शशंस । तच्छ्रुत्वा **विदेहां** शोकसन्तप्तां **'रामः** ख्यातपराक्रम' इति समाश्वास्य प्रभाते मञ्चोपशोभिते मण्डपे ते चापे अर्चित्वा स्थापयामास **जनकः**।



स्वयंवरायाऽऽकारिता विद्याधरेन्द्राश्च मञ्चेषूपाविशन् । **सीता** च सखीभिस्तत्रैत्य धनुःपूजां विधाय **रामं** मनसि कृत्वा तत्राऽतिष्ठत् । **भामण्डल**कुमारस्तु तां यथा **नारदो**दितं दृष्ट्वा कामविह्वलो जातः । समये च **जनक**द्वारपालः सर्वान् विद्याधरेन्द्रान् सम्बोध्योवाच-'भवतो **जनको** निवेदयति, यः कश्चिदनयोश्चापयोरेकतरमपि गुणमारोपयति, सोऽद्यैव मे सुतामुद्वहतु' ।

ततो राजानः प्रत्येकं चापसमीपं तदारोपणेच्छया समाजग्मुः । किन्तु पन्नगै रक्षिते ते उग्रतेजसी चापे स्प्रष्टुमपि न शेकुः । ततो **राम**स्तेषु लज्जयाऽधोमुखं निवृत्तेषु तत्रोपेत्य **वज्रावर्त्तं** तच्चापं पाणिनाऽऽदायाऽधिज्यं विधाय कर्णान्तमाकृष्य स्फालयामास । **सीता** च तत्क्षणं **रामे** स्वयंवरमालां चिक्षेप । **राम**श्च धनुषो गुणमुत्तारयामास । **लक्ष्मणो**ऽपि **रामा**ज्ञयाऽ**र्णवावर्त्तं** द्वितीयं कार्मुकं सज्यं विधायाऽऽस्फाल्य गुणमुत्तार्य यथास्थानं मुमोच । ततो विद्याधरा अतिविस्मिताः सुरकन्या प्रतिमा निजा अष्टादशकन्या **लक्ष्मणा**य ददुः । **भामण्डल**सहिता**श्चान्द्रगत्या**द्या विद्याधरेन्द्राश्च म्लानमुखा निजनिजं नगरं ययुः ।

अथ **दशरथो जनक**सन्देशमाप्य समागतः । **राम-सीतयो**-र्विवाहश्च समहोत्सवं सम्पन्नः । तदा **जनक**भ्राता **कनकः सुप्रभा**-कुक्षिजां निजां **भद्रां** नाम कन्यकां **भरता**य ददौ । ततो **दशरथः** सुतैर्वधूभिश्च समन्वितोऽ**योध्यां** ययौ ।

अथाऽन्यदा **दशरथो** महत्या समृद्ध्या चैत्यमहोत्सवं शान्तिस्नात्रं च चकार । तथा स्नानजलं कञ्चुकिना प्रथममहिष्यै पश्चाच्च दासीभिरपरपत्नीभ्यः प्रेषयामास । किन्तु तरुणत्वाद् दास्यः

प्रथममेव गत्वा राज्ञीनामार्पयत्, ताश्च तत् स्नानजलं ववन्दिरे । सौविदल्लश्च वृद्धत्वाद् मन्दगतिरित्यप्राप्तस्नानसलिला महिषी दध्यौ–'राज्ञा सर्वाभ्य एव राज्ञीभ्यः स्नानजलं प्रेषितं किन्तु महिष्यै अपि मह्यं नेति मानभङ्गे मम जीवनेनाऽलम्' ।

एवं विमृश्य वस्त्रेणाऽऽत्मानं मरणेच्छयोद्बन्धुमारेभे । तदैव तदगारे समुपस्थितो नृपस्तां तदवस्थां दृष्ट्वा तन्मृत्युभीतस्तां स्वोत्सङ्गे निवेश्योवाच–'कुतोऽपराधादिदं दुःसाहसं त्वयाऽऽचरितम् ?' साऽपि गद्गदकण्ठोवाच–'मह्यं कुतो न स्नानपयः प्रेषितम् ?' तावदेव तत्र कञ्चुकी समुपेत्य राज्ञाऽर्हत्स्नात्रजलं प्रेषितमिति वदन् तेन जलेन राज्ञीं मूर्ध्नि सिषेच। राज्ञा विलम्बेनाऽऽगमनकारणं पृष्टश्च वार्धक्यादित्युदतरत् । ततस्तं वार्धक्यजर्जरतनुं दृष्ट्वा राजाऽचिन्तयत्–'यावद् वयमपि नेदृशा जातास्तावदात्मश्रेयसे प्रयतामहे' । एवं विचिन्त्य विषयविरक्तो नृपः कियन्तं कालं व्यतीयाय ।

अथाऽन्येद्युस्तस्यामेव नगर्यां ज्ञानचतुष्टयविराजितः **सत्यभूति**-र्महामुनिः सङ्घसमन्वितः समवासरत् । तच्छ्रुत्वा च **दशरथो**ऽपि सपरिवारस्तत्रोपेत्य वन्दित्वा देशनां शुश्रूषुर्निषसाद । तदानीमेव च **सीता**प्राप्तिसंतप्त**श्चन्द्रगति**र्नृपो **भामण्डल**समन्वितो **रथावर्त्ता**-चलेऽर्हतो वन्दित्वा निवृत्तस्तत्रोपेतो नभसि स्थितस्तं मुनिं समवसृतं दृष्ट्वाऽवतीर्य वन्दित्वा धर्मं शुश्रूषुरुपविवेश । **सत्यभूति**श्च देशनां प्रक्रम्य **भामण्डल**स्य **सीता**भिलाषजं तापं ज्ञात्वा **चन्द्रगति-पुष्प-वत्योर्भामण्डल-सीतयो**श्च तेषां पापाद् निवृत्तये पूर्वभववृत्तान्तं शशंस ।



ततो **भामण्डल**कुमारो जातिस्मरणमाप्य मूर्च्छितो भुवि पपात । लब्धसंज्ञश्च स्वयमपि स्वपूर्वभवं यथायथं शशंस । तेन **चन्द्रगत्या**दयः परमं वैराग्यं प्रापुः । **भामण्डल**श्च **रामं** स्वसेति वदन् **सीतां** च प्रणनाम । **चन्द्रगति**श्च दूतं प्रेष्य **विदेह**या समं **जनकं** समाहूय जातमात्र**भामण्डला**पहारवृत्तान्तं समाख्याय तवाऽसौ पुत्र इति जगाद । तच्छ्रुत्वा **जनको विदेहा** चाऽत्यन्तं हर्षमाप्तौ । **भामण्डल**श्च पितरौ नमश्चक्रे । तत**श्चन्द्रगतिर्भामण्डलं** राज्ये निधाय विरक्तः प्रवव्राज । **भामण्डलो**ऽपि **सत्यभूतिं चन्द्रगतिं** पित**रावनरण्य**जं **सीता-रामौ** च प्रणम्य निजं नगरमगात् ।

❁ ❁ ❁

अथ **दशरथः सत्यभूतिं** प्रणम्याऽऽत्मनः पूर्वभवानपृच्छत् । ततो महामुनिरुवाच–'त्वं **सेनापुरे भावन**स्य वणिजो **दीपिका**-कुक्षिजो**पास्ति**र्नाम कन्यकाऽभूः । सा च साधुद्वेषिणी चिरं भवं भ्रान्त्वा **चन्द्रपुरे धन**स्य **सुन्दरी**कुक्षिजो **वरुणो**ऽभूः । तत्रोदार-प्रकृतिस्त्वं साधुभ्यः श्रद्धया दानं ददत् कालधर्ममासदः । ततो **धातकीखण्डे** युग्म्युत्तर**कुरु**षु भूत्वा मृत्वा देवत्वमाप्य ततश्च्युत्वा **पुष्कलावत्यां** विजये **पुष्कला**यां पुरि **नन्दिघोष**नृपस्य **पृथ्वी**कुक्षिजो **नन्दिवर्धनः** सुतोऽभूः ।

**नन्दिघोष**श्च पुत्रं त्वां राज्ये न्यस्य **यशोधर**मुनेर्गृहीतदीक्षो **ग्रैवेयकं** प्राप्तवान् । त्वं **नन्दिवर्धन**श्च श्रावकत्वं पालयित्वा विपद्य **ब्रह्मलोक**माप । ततश्च्युत्वा **प्राग्विदेहे वैताढ्ये** उत्तरश्रेण्यां **शशिपुरे** नगरे **रत्नमालिनो** विद्याधरस्य **विद्युल्लता**कुक्षिजः **सूर्यंजय** इत्यभिधः सुतोऽभूः ।

एकदा च स **रत्नमाली** विद्याधरेन्द्रं **वज्रनयनं** जेतुं **सिंहपुरं** गत्वा तत्पुरं ज्वालयितुं प्रारेभे। तदैव पूर्वजन्मपुरोधस **उपमन्यो**र्जीवो देवः **सहस्रारा**दुपेत्य तमुवाच-'भो ! महानुभाव ! पापं मा कृथाः,त्वं पूर्वजन्मनि **भूरिनन्दनो** नाम नृपोऽभूः । तदा त्वं मांसनिवृत्तिं प्रतिज्ञातवान् । **उपमन्यु**ना पुरोहितेनोक्तश्च प्रतिज्ञामत्याक्षीः । स पुरोहितश्च **स्कन्दा**भिधेन केनाऽपि पुरुषेण निपातितो गजो जातः । स च **भूरिनन्दन**नृपेण गृहीतो रणे हतो **भूरिनन्दन**नृपस्य **गन्धारा**कुक्षिजोऽ**रिसूदनः** पुत्रोऽभूत् । जातिस्मरणमाप्य च प्रव्रज्य विपद्य सोऽहं **सहस्रारे** देवो जातोऽस्मि । **भूरिनन्दन**श्च विपद्य वनेऽजगरो भूत्वा तत्र दावानले दग्धो द्वितीयां नरकावनिं प्राप्तो मया स्नेहात् प्रतिबोधितस्ततत उद्धृत्य त्वं **रत्नमाली** जातः । तत्त-दानीमिव मांसप्रत्याख्यानभङ्गं मा कार्षीः । पुरदाहाद् निवर्तस्व' ।

**रत्नमाली** च तद्वचः समाकर्ण्य युद्धाद् निवृत्तो राज्ये **सूर्यंजय**पुत्रं **कुलनन्दनं** निवेश्य **सूर्यंजये**न सहैव **तिलकसुन्दरा-**चार्यसमीपे व्रतमादाय विपद्य **महाशुक्रे** देवौ जातौ । ततश्च्युत्वा **सूर्यंजय**जीवस्त्वं **दशरथो**ऽभूः । **रत्नमाली** च **जनक, उपमन्यु**स्तु **कनको**ऽभूत् । ते **नन्दिवर्धन**जन्मनि पिता **नन्दिघोषो**ऽहं **ग्रैवेयका**च्च्युत्वा **सत्यभूति**रस्मि ।

तच्छ्रुत्वा जातवैराग्योऽ**नरण्यजः** प्रव्रज्येच्छू **रामं** राज्येऽभि-षेक्तुकामो गृहं गत्वा राज्ञीः सुतान् मन्त्रिणश्च समाहूयाऽऽपप्रच्छ । ततो **भरतो** नत्वाऽवोचत्-'अहमपि त्वया समं व्रतं ग्रहीष्यामि' । तच्छ्रुत्वा पति-पुत्रयोरुभयोर्विरहं सम्भाव्य **कैकेय्यु**वाच-'स्मरसि स्वामिन् ! यत् तत्र स्वयंवरोत्सवे मत्सारथ्यकर्मणा तुष्टेन त्वया स्वयं वरो दत्तः । तमधुना मह्यं प्रयच्छ, यतस्त्वं सत्यप्रतिज्ञोऽसि'। ततो



**दशरथो** जगाद-'व्रतनिषेधं विना यद् ममाऽधीनमन्यत् तद् याचस्व' । तच्छ्रुत्वा **कैकेयी** जगौ-'यदि स्वयं प्रव्रजसि, तर्हि राज्यं **भरताय** यच्छ' । ततो **दशरथः**-'अद्यैव मद्राज्यं गृह्यतामि'ति तामभिधाय **लक्ष्मण**सहितं **राम**माहूय 'यो मया वरो दत्तः पुरा प्रतिज्ञातः सोऽधुना **कैकेय्या भरत**राज्यरूपेण याचितः' ।

तच्छ्रुत्वा हृष्टेन **रामेण** '**भरता**य राज्यं दीयतां, मात्रा साधु याचितम्' । एवं **राम**वचनं श्रुत्वा प्रीतो नृपो यावद् मन्त्रिणोऽदिक्षत् तावद् **भरतो** जगाद-'तात ! मया प्राक् सहैव व्रतादानं याचितं तद् नाऽन्यथाकर्त्तुमर्हसि' । ततो राजोवाच-'मम प्रतिज्ञां मुधा मा कुरु, मम मातुश्चाऽऽज्ञामन्यथा कर्तुं नाऽर्हसि' । **रामो**ऽपि **भरतं** 'पितुः प्रतिज्ञां पालयितुं त्वं राज्यं गृहाणे'त्युवाच । ततो **भरतः** सगद्गदं पादयोः पतित्वा **राम**मुवाच-'तव पितुश्च मे राज्यदानमुचितं, किन्तु मम तद्ग्रहणं नोचितम्' ।

ततो **रामो** नृपमुवाच-'मयि सत्ययं राज्यं न ग्रहीष्यति, तस्मादहं वनवासाय यामि' । एवमनुज्ञाप्य राजानं नत्वा **भरत**स्य रुदतः स धनुर्धरो निर्ययौ । तं च निर्गच्छन्तं दृष्ट्वा सुतवत्सलो **दशरथः** पुनः पुनर्मूर्च्छितः । **राम**श्चाऽ**पराजितां** देवीं नत्वोवाच-'मातः ! यथाऽहं तथा **भरतो**ऽपि ते पुत्रः । पिता स्वां प्रतिज्ञां पालयितुं **भरता**य राज्यमदात् । तन्मयि सत्ययं न गृह्णाति, ततो वनं यामि। मद्वियोगेन कातरा मा भूः' । **अपराजिता** च तद्वाचमाकर्ण्य मूर्च्छिता भुवि पपात । लब्धसंज्ञा च मुहुर्मुहुः करुणं विललाप ।

**रामो** मधुरैर्वाक्यैस्तां बोधयित्वा नत्वाऽन्याश्च जननीः प्रणम्य निर्ययौ । **सीता**ऽपि दूराद् **दशरथं** नत्वाऽ**पराजिता**मुपेत्य

**रामा**नुगमनं याचितवती । 'त्वमत्यन्तं सुकुमारशरीरा न वनवासकष्टं सोढुमर्हसी'ति तया सस्नेहं क्रोडमारोप्य बोधिताऽपि साग्रहं तामनुज्ञाप्य नत्वा **राम**मनु निर्ययौ सा **सीता** । अहो अस्याः पतिभक्तिरित्येवं पौरस्त्रीभिः सा वनं प्रति गच्छन्ती साश्रु ददृशे । **लक्ष्मणो**ऽपि **रामं** वनाय निर्गतं श्रुत्वा क्रुद्धो हृदि दध्यौ-'तातः प्रकृत्या सरलः, स्त्रियश्च कुटिलाः । कथमन्यथा चिराद् वरं धृत्वाऽद्य याचते ? भवतु । **भरता**य राज्यं दत्तं नृपेणेति स्वस्य पितुश्च ऋणमपगतम् । तदद्य **भरताद्** राज्यं हृत्वा **रामे** न्यस्यामि । अथवाऽयं महासत्त्वस्तृणवद् राज्यं त्यक्तवानिति पुनर्न ग्रहीष्यति । तातस्य दुःखं च भविष्यति तस्मात् पदातिवदहमपि **राम**मनुगच्छामि' । एवं विचार्य नृपमापृच्छ्य नत्वा **सुमित्रा**मुपगम्य नत्वोवाच-'**रामो** वनं गमिष्यति, तमहमप्यनुगमिष्यामि' ।

ततो धैर्यमालम्ब्य **सुमित्रो**वाच-'**रामो** मां नमस्कृत्य दूरं गतः, मा विलम्बस्व' । ततो **लक्ष्मणः** सहर्षं मातरं स्तुत्वा नत्वाऽ**पराजितां** नन्तुमगच्छत् । तां नत्वोवाच च-'**राम** एकाक्येव चिरमगात् । तमनुजिगमिषुस्त्वामाप्रष्टुमागतोऽस्मि' । ततः साश्रु सोवाच-'वत्स ! त्वमपि मां त्यक्त्वा वनाय प्रस्थितोऽसि, मन्दभाग्याऽहं हताऽस्मि, ममाऽऽश्वासनाय त्वमेकोऽत्र तिष्ठ' ।

ततो **लक्ष्मणः** प्रत्युवाच-'त्वं **राम**स्य माताऽसि, तदधैर्येणाऽलम् । मम भ्राता दूरे याति, तं शीघ्रमनुयास्यामि, विघ्नं मा कृथाः' । एवमुक्त्वा नत्वा च स **सीता-रामा**वनुदधाव । ततस्त्रयोऽपि ते प्रसन्नवदना वनाय पुर्या निर्ययुः । नागराश्च कष्टां दशां प्रापुः । **कैकेयीं** देवं चाऽऽक्रोशन्तः प्रेम्णाताननुदधावुः ।



**दशरथो**ऽपि साश्रु सान्तःपुरपरिच्छदः स्नेहगुणैराकृष्टो द्रुतमनुजगाम। ततो **रामो**ऽवस्थाय पितरं जननीरपि च कथञ्चित् सम्बोध्य विसृज्य च **सीता-लक्ष्मणा**भ्यां सह त्वरितं विनिर्ययौ । स ग्रामे पुरे च मार्गे ग्रामवृद्धादिभिरवस्थातुं प्रार्थ्यमानोऽपि नाऽवस्थित ।

इतश्च **भरतो** राज्यं नाऽऽदत्त, प्रत्युत स्वं **कैकेयीं** चाऽऽचुक्रोश । नृपश्च परिव्रज्योत्सुकः सामन्तादीन् **राम**मानेतुं प्रेषयामास । ते च **रामं** प्राप्य राजाज्ञां निवेद्य निवृत्तये प्रार्थयामासुः। स तु प्रार्थ्यमानोऽपि न निववृते । ततस्ते तेन विसृज्यमाना अपि तन्निवर्त्तने कृताशाः पुनः पुनः सहैव चेलुः । ततः श्वापदादिभिर्गहनां **पारियात्रा**टवीं प्राप्य तत्र गभीरां नदीं ददृशुः । **राम**श्च तत्र स्थित्वा सामन्तादीनवोचत्-'इतः स्थानाद् यूयं निवर्त्तध्वम्, अस्माकं कुशलवृत्तान्तं च तातस्य निवेदयत । मद्वाक्याद् **भरतं** भजध्वम्'। ततस्ते स्वं निन्दन्तो रुदन्तः साश्रु न्यवर्त्तन्त ।

**रामो**ऽपि स**सीता-लक्ष्मणः** तैस्तटस्थैः साश्रु दृश्यमानस्तां दुस्तरां नदीमुत्ततार । ततो **रामे**दृग्गोचरातीते ते सामन्ताद्याः कथञ्चना**योध्या**मागत्य राज्ञे सर्वं वृत्तान्तं शशंसुः । ततो नृपो **भरत**मुवाच-'**रामो** नाऽऽयातः, तद्राज्यं गृहाण । मम दीक्षाविघ्नाय मा भूः' । **भरतो**ऽपि-'राज्यं नाऽहं ग्रहीष्यामि, स्वयमेव गत्वा कथञ्चनाऽपि **राम**मानेष्ये इत्युवाच । तदैव च **कैकेयी** समागत्य नृपमब्रवीत्-'**भरता**य त्वया राज्यं दत्तं, परमेष न गृह्णाति । तथाऽन्यासां मातृणां मम च महद् दुःखमस्ति । पापया मया नृपे सत्यपि राज्यमराजकं कृतम् । **अपराजिता**दीनां रुदितं श्रुत्वा मम

हृदयं भिद्यते । तद्भरतेन समं गत्वाऽनुनीय तानानेष्यामि मामनुजानीहि' ।

ततः प्रहृष्टेन राज्ञा समादिष्टा सा **भरता**मात्यादिभिः सह कृतत्वरा **रामं** प्रति जगाम । षड्भिर्दिनैस्तद्वनं प्राप्य वृक्षमूले तान् दृष्ट्वा रथादवतीर्य वत्स ! वत्सेति भाषमाणा प्रणमन्तं **रामं** मूर्ध्नि चुचुम्ब । **सीता-लक्ष्मणा**वपि च बाहुभ्यामुपरि समाक्रम्य तारतारं रुरोद । **भरतो**ऽपि **रामं** प्रणम्य मूर्च्छामापन्नवान् । ततो **रामे**ण बोधितो **भरतो** जगाद-'कथं मां त्यक्त्वाऽत्राऽऽगमः ? राज्यार्थी **भरत** इति मातृदोषेण यो ममाऽपवादो जातस्तं मां सहैव नयन् हर । यद् वा निवृत्त्याऽ**योध्या**यां गत्वा राज्यमुद्वह । एवं कुलनाशकं मम शल्यमपयास्यति । **लक्ष्मण**स्तवाऽमात्योऽहं प्रतीहारः **शत्रुघ्न**श्च च्छत्रहरो भविष्यति' । तदा **कैकेय्यु**वाच-'त्वं सदा मातृवत्सलोऽसि, तद्भ्रातृवचः प्रतिपालय । अत्र न कस्याऽपि दोषः, किन्तु ममैव । स्वैरित्वं विहाय स्त्रियाः सर्व एव दोषा मयि । मया पत्युः पुत्राणां तन्मातृवर्गस्य च दुःखदं कृतम् । तत् सहस्व, यतः सुतोऽसि' ।

तामेवमुदश्रु जल्पन्तीं **रामो**ऽवोचत्-'कथमहं प्रतिज्ञातं त्यजामि, राज्यं तातेन **भरता**य दत्तं, मया च तदनुमतम् । तत् तद्वचः कथङ्कारमन्यथा क्रियते । ततो **भरतो** द्वयोरपि निदेशतो राजाऽस्तु । अस्याऽहं तात इवाऽनुल्लङ्घ्योऽस्मि' । एवमुक्त्वोत्थाय **सीता**नीतेन जलेन स्वयं सर्वसामन्तादिसमक्षं **भरतं** राज्येऽभिषिक्तवान् । ततः **कैकेयीं** प्रणम्य **भरतं** च समाश्वास्य विसृज्य दक्षिणां प्रति प्रतस्थे । **भरतो**ऽपि **साकेतं** गत्वा पितुर्भ्रातुश्च



निदेशाद् राज्यधुरमूरीचक्रे । **दशरथो**ऽपि **सत्यभूति**मुनेः पार्श्वे भूयसा परिवारेण सह व्रतं गृहीतवान् । **भरत**श्च भ्रातृवनवासेन हृदि दुःखितोऽर्हत्पूजापरायणो राज्यं ररक्ष । **रामा**दयश्च मार्गे गच्छन् **चित्रकूट**गिरिमतीत्य कतिपयैर्दिनै**रवन्ति**देशं प्राप ॥ ४ ॥

*इति रामलक्ष्मणोत्पत्ति-परिणय-वनवासगमन-*
*वर्णनात्मकश्चतुर्थः सर्गः ॥४॥*

## पञ्चमः सर्गः

अथ **रामो**ऽध्वनि श्रान्तां **जानकीं** विश्रमयितुं वटस्य मूले समुपाविशत् । तं देशं परितोऽवलोक्य च **लक्ष्मण**मुवाच-'अयं देशः कस्याऽपि भीत्याऽचिरादेव विजनो जातोऽस्ति । यतो-ऽत्रोद्यानानि सजलकुल्यानि खलानि सान्नानि इक्षुवाटाश्च सेक्षव एव सन्ति' । तदैव च तत्र गच्छन्तं कञ्चिज्जनं 'कुतोऽयं देशो निर्जनः, त्वं च कुतश्चलितोऽसी'ति पप्रच्छ । ततः स जन उवाच-'**अवन्ति**-देशेऽ**वन्त्यां** नगर्यां **सिंहोदरो** नाम नृपोऽस्ति । तस्य चाऽस्मिन् देशे **वज्रकर्णो** नाम सामन्तो **दशाङ्गपुर**नायकोऽस्ति ।

स चैकदा मृगयायै गतः कायोत्सर्गस्थं **प्रीतिवर्धनं** महामुनिमैक्षिष्ट । अरण्ये द्रुम इव किं स्थितोऽसीति तेन पृष्ट आत्महितार्थमिति मुनिरुदतरत्। ततः खाद्यपेयादिरिक्तेऽस्मिन्नरण्ये तव किमात्महितं सम्पद्यते इति तेन पृष्टश्च मुनिस्तमधिकारिणं मत्वाऽऽत्महितं धर्ममुपादिशत् । सोऽपि श्रावकत्वं सद्यः स्वीकृत्याऽर्हन्तं साधूंश्च विहाय नाऽन्यं प्रणंस्यामीत्यभिग्रहं गृहीत्वा मुनिं वन्दित्वा **दशाङ्गपुरं** प्राप्तः श्रावकत्वं पालयन् दध्यौ-'मया नाऽन्यः प्रणम्य' इति मदभिग्रहेण मद्वैरी **सिंहोदरो**ऽनमस्कृतो भविष्यति' । एवं विचार्य स निजाङ्गुलीये **मुनिसुव्रत**नाथस्य मणिमयीं प्रतिमां निवेश्य तं नमन् **सिंहोदरं** वञ्चयते स्म ।



तद्वृत्तान्तं कोऽपि दुर्जनः **सिंहोदर**स्याऽऽचख्यौ । तेन च सद्यः क्रुद्धः **सिंहोदरः** । तदपि कोऽपि **वज्रकर्णा**याऽऽख्यातवान्। तस्य मयि कोपः कथं त्वया ज्ञात इति **वज्रकर्णे**न पृष्टश्च स पुमानाख्यत्-**कुन्दपुरे** नगरे श्रावकः **समुद्रसङ्गमो** वणिगस्ति । तस्य **यमुना**कुक्षिजोऽहं **विद्युदङ्गा**ख्यः पुत्रोऽस्मि । क्रमात् तारुण्यं प्राप्तो भाण्डमादायाऽह**मुज्जयिन्यां** क्रयविक्रयार्थं समागमम् । तत्र **कामलतां** वेश्यां दृष्ट्वा कामवशगोऽहं निशामेकां वसामीति तामुपभुज्य दृढं तद्रागबद्धो मत्पित्रा कष्टेनाऽऽजन्मोपार्जितं धनं षड्भिर्मासैरेवाऽपव्ययिष्टम् ।

सा चैकदा '**सिंहोदर**महिष्याः **श्रीधरा**याः कुण्डलतुल्ये कुण्डले मह्यं देही'ति मां याचितवती । अहं च धनाभावात् **श्रीधरा**कुण्डलापजिहीर्षया साहसेन रात्रौ खात्रेण नृपगृहं प्रविष्टः **सिंहोदर-श्रीधर**योरालापं श्रुतवान् । किमित्युद्विग्नो निद्रां न लभस इति **श्रीधर**या पृष्टः 'प्रणामविमुखो **वज्रकर्णो** यावद् नाश्यते तावत् कुतो मम निद्रा ? अमुं प्रातः सपुत्र-मित्र-बान्धवं हनिष्यामी'ति **सिंहोदरः** प्राह । तच्छ्रुत्वा तदाख्यातुं कुण्डलचौरिकं विहाय साधर्मिकवात्सल्यात् त्वां प्राप्तोऽस्मि' । **वज्रकर्ण**श्च तच्छ्रुत्वा सद्य एव पुरीं तृणा-ऽन्नादिसमृद्धां चकार ।

तदैव चाऽऽकाशे परसैन्यरजो दृष्टवान् । **सिंहोदरे**ण च क्षणादेव त**द्दशाङ्गपुरं** बलैरवेष्ट्यत । दूतमुखेन च 'त्वया प्रणाम-मायया चिराद् वञ्चितोऽस्मि, तदङ्गुलीयं विहायाऽऽगत्य मां नमस्कुरु । अन्यथा सकुटुम्बस्य ते विनाश इति **वज्रकर्ण**मुक्तवान्। सोऽपि 'ममाऽयमभिग्रहः, तन्नमस्कारं विना मम सर्वस्वं गृहाण,

मह्यं धर्मद्वारं देहि, येनाऽहं धर्मायाऽन्यत्र गच्छामीति प्रत्युदतरत् । स **सिंहोदरो** न तत् तथा प्रतिपन्नवान् ।

स**वज्रकर्णं** पुरं रुद्ध्वा च स बहिः स्थितोऽस्ति । तेनाऽयं देश उद्वसो जातोऽस्ति । अहमपि च सकुटुम्बोऽत्र नष्टोऽस्मि । सौधानि मम कुटी च जीर्णाऽत्र दग्धानि । क्रूरगृहिण्या च शून्येभ्य इभ्यगृहेभ्य उपकरणान्यानेतुं प्रेषितो यामि। तस्या दुर्वाक्यस्याऽप्येतद् मम शुभं फलं यद्भाग्याद् देवतुल्यस्त्वं दृष्टोऽसि' ।

ततो **राम**स्तस्य दरिद्रस्य रत्नस्वर्णमयं सूत्रमदत्त । तं विसृज्य च **रामो दशाङ्गपुर**मेत्य बहिश्चैत्ये **चन्द्रप्रभं** नत्वा तत्र स्थितः । **रामा**ज्ञया च **लक्ष्मणः** क्षणात् तत्पुरं प्रविश्य **वज्रकर्ण**मुपगम्य 'मम भोजनातिथ्यभाग् भवेति तेनोक्तो मम स्वामी बहिरुद्याने स्थित इति तमादौ भोजयामीत्युक्तवान् । ततो **लक्ष्मणे**न सह **वज्रकर्णो** विविधं भोज्यं **रामा**न्तिकमुपनायितवान् । भोजनानन्तरं च **रामे**णाऽनुशिष्टः प्रेषितश्च **लक्ष्मणोऽवन्ती**शमुपगम्य राजराजो **भरत**स्ते **वज्रकर्णे**न विरोधं निषेधतीत्युक्तवान् । ततः **सिंहोदरः** प्राह-**भरतो**ऽपि भक्तानामेव भृत्यानां प्रसादं कुरुते । अयं **वज्रकर्ण**श्च मम सामन्तो दुराशयो मां न नमतीति कथं प्रसीदामीति वद' ।

ततो **लक्ष्मणेन** 'नाऽविनयात् किन्तु धर्मानुरोधिप्रतिज्ञया न नमति । तदयं न क्रोधपात्रं, त्वया **भरत**शासनं मान्यम् । यतः स आसमुद्रमेदिन्याः शासिते'त्युक्तः क्रुद्धो **वज्रकर्ण**पक्षपातिनं **भरतं** न जानामीत्यवोचत् । ततोऽतिक्रुद्धः **सौमित्रिः** प्राह-'रे **भरतं** न जानासि ? सपद्येव तं ज्ञापयामि, युधे सन्नद्धो भव, सद्य एव त्वां नाशयामि' । ततः **सिंहोदरः** ससैन्यो **लक्ष्मणं** हन्तुमुद्यतस्तेन



गजालानमुत्पाट्य सैन्यानि विनाश्योत्पत्येभस्थितो निजवाससा कण्ठेऽबध्नात् । ततो लक्ष्मणस्तं **दशाङ्गपुर**वासिनां सविस्मयं पश्यतामेव **राम**समीपं नीतः ।

ततः **सिंहोदरो रामं** दृष्ट्वा नत्वाऽभाषत-'मया त्वमिहाऽऽगत इति न ज्ञातः । ममाऽज्ञानदोषं क्षमस्व, कर्त्तव्यमादिश, भृत्ये शिक्षार्थमेव गुरोः शिष्ये इव स्वामिनः कोपः । ततो **वज्रकर्णे**न सन्धिं कुर्वित्यादिष्टो **रामेण सिंहोदर**स्तां वाचं तथेति प्रतिपन्नवान् । **वज्रकर्णो**ऽपि च तत्राऽऽगतो विनयेन पुरोभूय बद्धाञ्जलिरुवाच-'स्वामिनौ **वृषभ**स्वामिवंशजौ बलदेव-वासुदेवौ मया दिष्ट्या दृष्टौ चिराज्ज्ञातौ । एनं **सिंहोदरं** मत्प्रभुं मुञ्च । तथा तथैनं शाधि यथाऽयं ममाऽन्यप्रणामाभिग्रहं सहते' । ततो **राम**-भ्रूसंज्ञया **सिंहोदर**स्तत् प्रतिपद्य **लक्ष्मणे**न मुक्तो **वज्रकर्णं** परिषष्वजे। तथा **राम**साक्षिकं राज्यार्धं परमया मुदा **वज्रकर्णा**य दत्तवान् ।

**वज्रकर्ण**श्च **सिंहोदरा**त् **श्रीधरा**कुण्डले याचित्वा **विद्युदङ्गा**य ददौ । तथा **वज्रकर्णो**ऽष्टौ स्वकन्याः ससामन्तः **सिंहोदर**श्च कन्याशतत्रयं **लक्ष्मणा**य ददौ । ततो **लक्ष्मणः** प्रोवाच-'एताः कन्या वः पार्श्व एव सम्प्रति तिष्ठन्तु । यतः पित्रा मम भ्राता **भरतो** राज्ये निवेशितोऽस्ति । समये प्राप्तराज्यो वः सुताः परिणेष्यामि । इदानीं तु वयं प्रस्थाय **मलयाचले** स्थास्यामः । तत 'ओम्' इत्युक्त्वा स्थितौ **वज्रकर्ण-सिंहोदरौ रामे**ण विसृष्टौ निजनिजं पुरं गच्छतुः ।

❀ ❀ ❀

**राम**श्च तत्र रात्रिमतिवाह्य प्रभाते स**सीता-लक्ष्मणो** गच्छन् क्रमेण कमपि निर्जलं देशं सम्प्राप । तत्र तृष्णाकुलायां **सीता**यां

तरोस्तले विश्रान्तायां **रामा**ज्ञया **लक्ष्मणो** जलमानेतुं प्रययौ । गच्छंश्च स स्वच्छसलिलं सरो दृष्टवान् । तदैव च तत्र **कूबर**पुरेशः **कल्याणमाला**भिधः क्रीडितुमागतो **लक्ष्मणं** दृष्ट्वा कामवशो मम भोजनातिथिर्भवेति प्रोक्तवान् । **लक्ष्मण**श्च कामविकारं देहलक्षणानि च दृष्ट्वा दध्यौ-'नूनमियं केनाऽपि कारणेन पुंवेषा नारी । ततः प्रकटमुवाच-'सभार्यो मम प्रभुरितोऽनतिदूरे तिष्ठति,तं विना न भुञ्जे । ततस्तेन प्रधानपुरुषैः स**सीतो रामो**ऽभ्यर्थ्य तत्राऽऽनीय नत्वा द्वयोः कृते तत्कालं पटकुटीं निरमात् । तत्र कृतस्नानभोजनं **राम**मेकमन्त्रिणा सह निष्परिच्छदः स्त्रीवेशः समाययौ ।

तां लज्जानतमुखीं **रामः** प्राह-'सौम्य ! पुरुषवेषेण स्त्रीत्वं किमिति निह्नुषे ?' ततः **कुबर**पतिः प्राह-'महापुरेऽस्मिन् **कूबर**पुरे **वालिखिल्यो** नाम नृपः **पृथ्वी**नाम्नी तद्भार्या चाऽऽस्ताम् । अन्यदा तस्यां सगर्भायां स **वालिखिल्यो** म्लेच्छैर्महाभटैरवस्कन्दं दत्त्वा बद्ध्वा निन्ये । पश्चाच्च **पृथ्वी**देवी मां तनयामसूत । **सुबुद्धि**ना सचिवेन च पुत्रोऽजनीति घोषणा कृता । **सिंहोदर**श्च तच्छ्रुत्वा यावद् **वालिखिल्यः** समागच्छति तावदयं बालोऽपि राजाऽस्त्वि'त्यवदत् । तदारभ्य पुंवेषधारिण्यहं मातृ-मन्त्रिजनं मुक्त्वाऽन्यैरनुपलक्षिता क्रमेण वर्धमाना **कल्याणमाला**ख्या राज्यं करोमि । तथा पितृमुक्तये म्लेच्छानां भूरि द्रव्यं यच्छामि,ते च द्रव्यं गृह्णन्ति, किन्तु मम पितरं न मुञ्चन्ति । तत् प्रसद्य तेभ्यो मम पितरं मोचय' ।

ततो **राम** उवाच-'तावत् पुंवेषैव राज्यं प्रशासती तिष्ठ, यावद् गत्वा म्लेच्छेभ्यस्त्वत्पितरं न मोचयामि' । ततः सा महाप्रसाद एष इत्युवाच । **सुबुद्धि**मन्त्री च **लक्ष्मणो**ऽस्या



वरोऽस्त्विति प्रार्थितवान् । ततो **रामः** पुनरुवाच-'वयं पित्रादेशाद् देशान्तरं यास्यामः । निवृत्तेष्वस्मासु **लक्ष्मण** एनां परिणेष्यति' । एवं प्रतिपद्य तत्र दिनत्रयं स्थित्वा रात्रिशेषे सुप्ते जने स स**सीता-लक्ष्मणो** ययौ । साऽपि प्रभाते तानपश्यन्ती व्याकुलमनाः स्वं पुरं गत्वा यथापूर्वं राज्यं चक्रे ।

**रामो**ऽपि क्रमेण **नर्मदा**मुत्तीर्य पथिकैर्वार्यमाणोऽपि **विन्ध्या**टवीं प्रविष्टवान् । तत्राऽऽदौ च दक्षिणदिशि कण्टकिद्रुमस्थितः काको विरसं क्षीरद्रुमस्थितश्च काको मधुरं रुराव । किन्तु तेन **राम**स्य हर्षो विषादो वा न जातः । अग्रे गच्छंश्च देशघाताय निर्गतमुदायुधमसङ्ख्यरथादिसमन्वितं म्लेच्छसैन्यं ददर्श । तेषु युवा सेनानीः **सीतां** विलोक्य कामार्त्तो म्लेच्छानादिशत्-'एतौ पथिकौ विनाश्य बलादेतां स्त्रियमपहृत्य मत्कृते समानयत' । तेऽपि च म्लेच्छास्तथाज्ञप्तास्तेन सहैव शरादिभिः प्रहरन्तो **राम**मभ्यधावन्त । ततो **लक्ष्मणो रामं** प्राह-'आर्य ! इहैव तिष्ठ **सीत**या सह । अहममून् कुक्कुरानिव विद्रावयामि' ।

एवमुक्त्वा धनुरधिज्यं विधाय तच्छब्दैर्म्लेच्छानत्रासयत् । चापशब्दोऽप्यसह्यस्तत्र बाणवृष्टेः का कथेति म्लेच्छराजो **राम**मुप**जगाम** म्लेच्छराजः । ततः स शस्त्राणि त्यक्त्वा रथादवतीर्य दीनवदनो **लक्ष्मणे**न सक्रोधमीक्ष्यमाणो नत्वाऽवोचत्-'देव ! **कौशाम्बी**नगर्यां **वैश्वानर**द्विजस्य **सावित्री**कुक्षिजो **रुद्रदेवा**ख्यः सुतोऽस्मि । आजन्म क्रूरकर्माऽहं पापरत एकदा खात्रमुख एव राजपुरुषैर्गृहीतो नृपाज्ञया शूलां समारोपयितुं नीतो दीनमुखः श्रावकवणिजा दृष्टो दण्डं दत्त्वा मोचितः । पुनश्चौरिकां मा कार्षीरित्युपदिश्य तेन विसृष्टस्तं देशं त्यक्त्वा भ्रमन्निमां पल्लीं प्राप्तः

काक इत्यपराख्यया ख्यातः क्रमात् पल्लीपतित्वमाप । तत इह स्थितो लुण्टाकैः पुराणि लुण्टयित्वा नृपानपि धृत्वाऽऽनयामि । किन्तु व्यन्तर इव तव वश्योऽस्मि । कर्त्तव्यं समादिश, ममाऽविनयं क्षमस्व' ।

ततो **रामेण** **वालिखिल्यं** मुञ्चेत्यादिष्टः स म्लेच्छराट् तं मुमोच । **वालिखिल्य**श्च **रामं** ननाम । **रामा**ज्ञया च काकेन स पुनः **कूबर**पुरं प्रापितो निजां कन्यां पुंवेषां दृष्टवान् । ततो **राम-लक्ष्मण**वृत्तान्तं तौ मिथोऽकुर्वताम् । काकश्च निजां पल्लीं गतः ।

**रामो**ऽपि ततो निर्गत्य **विन्ध्याट**वीमतिक्रम्य महानदीं **तापीं** प्राप । रामः तामुत्तीर्याऽ**रुण**ग्रामं प्राप्य **सीता**यां तृषार्त्तायां स**लक्ष्मणः** कोपनस्य **कपिल**स्य द्विजस्य गृहं प्राप्तः । तत्र च **सुशर्मा**ख्यया ब्राह्मण्या पृथगासनं प्रदाय स्वादु शीतलं सलिलं तया दत्तं पपौ । तदैवाऽऽगतेन पिशाचेनेव दारुणेन **कपिले**न 'पापिष्ठे ! किमेते मलिना मम गेहे प्रवेशिताः ?' इत्येवं निर्भर्त्स्यमानां तां ब्राह्मणीं दृष्ट्वा क्रुद्धो **लक्ष्मण**स्तमुद्धृत्य दिवि पर्यभ्रमयत् । ततो **रामे**ण कीटमात्रेऽस्मिन् कोपेनाऽलम्, अमुं द्विजब्रुवं मुञ्चे'त्यादिष्टः शनैस्तं द्विजममुञ्चत् । ततश्च **राम**स्तद्गृहाद् निर्ययौ ।

अथ ते गच्छन्तः क्रमादन्यां महाटवीं प्राप्ताः । तदैव च वर्षर्तुः समुपस्थितः । वारिदे वर्षति च 'अत्रैव वटे वर्षाकालं नयाम' इति वदन् **राम**श्च तत्रैव वटतरोस्तले तस्थौ । तद्वटस्थ**श्चेभकर्णा**ख्यो यक्षस्तद्वचो निशम्य भीतो **गोकर्णं** स्वप्रभुमुपजगाम । तं प्रणम्य 'निजावासाद् वटादहं कैश्चिद् दुःसहतेजोभिरुद्वासितः, तत् त्रायस्व मां, ते हि यावद् वर्षर्त्तुं मद्वट एव स्थास्यन्ति' इति प्रार्थितवान् सः ।



**गोकर्णो**ऽप्यवधिना सर्वं ज्ञात्वाऽवोचत्-'गृहायातावेतावृषभौ बलदेव-वासुदेवावच्यौं' । एवमुक्त्वा स रात्रौ तत्रोपेत्य नवयोजनविस्तृतां द्वादशयोजनायामां धन-धान्य-प्रासादादिसमृद्धां **रामपुरीं** नाम पुरीं निरमात् । प्रातश्च मङ्गलध्वनिना प्रबुद्धो **राम**स्तं वीणाधरं यक्षं समृद्धां नगरीं च दृष्ट्वा विस्मितः । ततः 'त्वं मे स्वामी चाऽतिथिश्च, **गोकर्णो** नाम यक्षोऽहं त्वत्कृते पुरीं निर्मितवानस्मि । मया सेव्यमानस्त्वं यथाकालं यथारुचि तिष्ठे'ति **गोकर्णे**न प्रार्थितः स**सीता-लक्ष्मण**स्तत्रैव तस्थौ ।

इतश्च **कपिलो** विप्रः समिदाद्यर्थं भ्रमन् पर्शुपाणिस्तन्महारण्यं प्राप्य तां पुरीं दृष्ट्वा विस्मितो दध्यौ-'इयं माया वेन्द्रजालं वा गान्धर्वमेतद् वा पुरम् ?' तत्र चैकां मानुषीरूपां यक्षिणीं कस्येयं पुरीत्यपृच्छच्च । सोचे-**गोकर्णे**न कृतेयं **रामपुरी रामा**र्थम् । अत्र **रामो** दीनादिभ्योऽर्थं ददाति । अत्र समागतः सर्व एव कृतार्थो भवती'त्युक्तः समिद्भारं त्यक्त्वा स विप्रो मया कथं **रामो** द्रष्टव्य इति तां प्रार्थितवान् ।

तया च पुनः 'अस्यां पुर्यां यक्षै रक्षितं द्वारचतुष्टयमस्ति, तदत्र प्रवेशोऽतिदुर्लभः । अत्र पूर्वद्वारे चैत्यं यथाविधि वन्दित्वा श्रावकीभूय प्रवेष्टुमर्हसि । नाऽन्यथे'त्युक्तः स **कपिलो** धनार्थी साधूनुपगम्य तेभ्यो धर्मं श्रुत्वाऽल्पकर्मत्वाद् विशुद्धः श्रावको-ऽभवत् । ततो गृहं गत्वा धर्ममाख्याय भार्यामपि श्राविकां विधाय **रामपुरी**मेत्य तया भार्यया सह चैत्यं वन्दित्वा राजगृहं प्राविशत् । तत्र **सीता-राम-लक्ष्मणा**नुपलक्ष्य भीतो नंष्टुमना **लक्ष्मणे**न 'मा भैषीः, यथेष्टं धनं प्रार्थयस्वे'त्युक्तो गतशङ्को **रामा**याऽऽशिषं दत्त्वा

यक्षैर्दत्ते आसने समुपाविशत् । ततः कुत आगतोऽसीति **रामेण** पृष्टः सर्वं पूर्वं वृत्तं समाख्यातवान् । **सुशर्मा** चाऽपि **सीता**मुपगम्य प्राग्वृत्तं समाख्यायाऽऽशिषं दत्त्वा दीनवदना समुपाविशत् । ततो **रामे**ण धनैः कृतार्थी कृतो विसृष्टश्च निजं ग्राममुपेत्य प्रबुद्धो ब्राह्मणो दीनाय दानं यथारुचि दत्त्वा **नन्दावतंस**सूरिपार्श्वे व्रतमग्रहीत् ।

अथ वर्षाकालेऽतीते जिगमिषुं **रामं** प्रेक्ष्य **गोकर्णो** विनयाद् बद्धाञ्जलिरुवाच-'मयि प्रसीद, भक्तिस्खलितं क्षमस्व' । ततो **रामाय स्वयंप्रभं** नाम हारं **लक्ष्मणा**य दिव्यरत्ननिर्मिते ताडङ्के **सीता**यै चूडामणिमिप्सितनादिनीं वीणां च ददौ । **राम**श्च तं यक्षं सम्मान्य प्रतस्थे । यक्षोऽपि तां पुरीमुपसंजहार ।

❀ ❀ ❀

अथ ते च **रामा**दयो गच्छन्तोऽरण्यानि त्यक्त्वा सन्ध्यासमये **विजयपुरं** प्राप्य बहिरुद्याने वायव्यदिशि वटवृक्षतलेऽवात्सुः । तत्र पुरे च **महीधरो** नृप **इन्द्राणी** तद्भार्या **वनमाले**ति तत्सुता चाऽऽसन् । **वनमाला** बाल्य एव **लक्ष्मण**गुणान् श्रुत्वा तं मुक्त्वा नाऽन्यं वरमियेष । तदा च **दशरथं** प्रव्रजितं **राम-लक्ष्मणौ** निर्गतौ च श्रुत्वा **महीधरो** विषण्णोऽभवत् । **चन्द्रनगरे** च **वृषभ**नृपपुत्राय **सुरेन्द्ररूपा**य स **वनमालां** ददौ । **वनमाला**ऽपि च तच्छ्रुत्वा मरणे कृतनिश्चया रात्रावेकिका तदुद्यानं दैवात् प्राप । तत्र वनदेवतां सम्पूज्य जन्मान्तरेऽपि **लक्ष्मणो** मम पतिरस्त्विति सम्प्रार्थ्य तं वटं प्राप्ता सुप्त**सीता-राम**प्राहरिकेण **लक्ष्मणे**न दृष्टा ।

ततो **लक्ष्मणो** दध्यौ-'किमियं वनदेवता, एतस्य वटस्याऽधिष्ठात्री यक्षिणी वा ?' एवं चिन्तयति तस्मिन् सा तद्वटद्रुममारूढा।



**लक्ष्मणो**ऽपि किमियं करोतीति तमारुरोह । ततः सा प्राञ्जलिर्वनदेवतादीन् सम्बोध्य 'नेह जन्मनि **लक्ष्मणो** मम भर्त्ताऽभवत्, किन्तु यदि मद्भक्तिः सुनिश्चला, तर्हि स भवान्तरे भर्त्ता भूयात्' । इत्युक्त्वोत्तरवस्त्रेण गलपाशं विधाय वटशाखायां बद्ध्वा च त्वरितमेवाऽऽत्मानमलम्बयत् । ततो **लक्ष्मणः** 'भद्रे ! साहसं मा कार्षीः । **लक्ष्मणो**ऽहमिति ब्रुवन् पाशमपास्य तामादायोत्तीर्य रात्रिशेषे प्रबुद्धयो **राम-सीतयोर्वनमाला**या अशेषं वृत्तान्तं शशंस । लज्जावगुण्ठितमुखी **वनमाला**ऽपि सद्य एव **जानकी-राम**चरणौ ननाम ।

इतश्च **महीधर**भार्येन्द्राणी **वनमाला**मपश्यन्ती सकरुणं पूच्चके । **महीधर**श्चाऽन्वेषणाय निर्गत इतस्ततो भ्राम्यन् तत्रस्थां तां दृष्ट्वा 'हत हतैतान् कुमारीतस्करानि'ति पुरुषान् समादिशत् । ततो **लक्ष्मणः** क्रुद्धो धनुषि ज्यामारोप्य टङ्कारमकारयत् । तद्ध्वनिना त्रस्तेषु सैन्येषु **महीधरो लक्ष्मणं** दृष्ट्वोपलक्ष्य **'सौमित्रे** ! धनुर्विज्यं कुरु, मत्सुताभाग्यादेव त्वमिहाऽऽगतः' इत्यवादीत् । तथा **रामं** प्रेक्ष्य रथादवतीर्य नत्वा 'तव भ्रात्रे **सोमित्र**ये मया स्वयं जातानुरागेयं कल्पिता पुरा । इदानीं मद्भाग्यादनयोः समागमो जज्ञे', इत्युक्त्वा महत्या प्रतिपत्त्या तान् निजसद्म निनाय ।

अथ तेषु तत्र तिष्ठत्सु कदाचन सभास्थितं **महीधरं** नृप**मतिवीर्य**नृपदूतः समुपेत्योचे-'**नन्द्यावर्त्त**पुराधीशो**ऽतिवीर्य**स्त्वां **भरत**विग्रहे साहाय्यायाऽऽह्वयति । **भरत**स्य बले भूयांसो भूभुजाः समेयुः । तत् त्वमपि महाबलो**ऽतिवीर्ये**ण समाहूयसे' । ततो **लक्ष्मे**णन '**नन्द्यावर्त्त**नृपस्य **भरते**न सह विरोधे को हेतुरि'ति पृष्टो दूत उवाच-'नः स्वामी **भरताद्** भक्तिमिच्छति, किन्तु स न

स्वीकरोतीति विग्रहहेतुः' । ततो **रामो** दूतं पप्रच्छ-'**अतिवीर्य**स्य युद्धे **भरतः** समर्थो यत् तत्सेवां न मन्यते ?' ततो द्वावप्य-साधारणावित्युक्तवन्तं दूतं सत्वरमागच्छामीति विसृज्य **महीधरो राम**मुवाच-'अयमल्पज्ञो यदस्मान् **भरत**युद्धे समाह्वयति । तत्सेनया सह गत्वाऽनुपलक्षितशत्रुभावोऽ**तिवीर्य**मेव हनिष्यामः' ।

ततो **राम** उवाच-'त्वं तिष्ठ, ससैन्यैस्तत्सुतैः सहऽहमेव तत्र गत्वा यथा यथोचितं करिष्यामि । एवमस्त्विति तेनोक्तश्च **रामः** ससैन्यैस्तत्पुत्रैः सहितः स**सीता-लक्ष्मणो नन्द्यावर्त्त**पुरं ययौ । **रामो** बहिरुद्याने कृतनिवासः किमभीष्टं ते करोमीति क्षेत्रदेवतया प्रार्थितो न नः किमपि कर्त्तव्यमित्युक्तवान् । तथाऽपि तवोपकरोम्येतद्यद-**तिवीर्यः** स्त्रीभिर्जित इति तस्याऽयशसे तस्य ससैन्यस्य स्त्रीरूपं तव च कामिकं तत् करिष्यामी'ति सोचे । ततो **महीधर**सैन्यं स्त्री-राज्यमिव क्षणात् स्त्रीरूपमभवत् । **राम-लक्ष्मणौ** चाऽपि स्त्रीरूपावभूताम् ।

ततो **राम**स्तम**तिवीर्यं महीधरे**ण स्वं सैन्यं तव साहाय्यकृते प्रेषितमिति द्वाःस्थेनाऽज्ञापयत् । ततोऽ**तिवीर्यो** जगाद-'यदि **महीधरः** स्वयं नाऽऽगात् तर्हि तस्य बहुमानिनो मुमूर्षोः सैन्येना-ऽलम्। एकोऽपि **भरतं** जेष्यामि । तत्सैन्यं द्रुतं निर्वास्यताम्' । ततस्तत्राऽन्यः कश्चिदूचे-'केवलं **महीधरः** स्वयं नाऽऽगात्, प्रत्युतोप-हासाय स्त्रीसैन्यं प्राहिणोत् । तच्छ्रुत्वाऽत्यन्तं क्रुद्धो जातो **नन्द्या-वर्त्तेशः** । स्त्रीरूपधारिणो **रामा**द्याश्च द्वारमुपाययुः । ततोऽ**तिवीर्यो** दासीवदिमाः स्त्रियो गलेषु गृहीत्वा पुराद् बहिर्निर्वास्यतामित्यादिक्षत्।

ततः सामन्ताद्याः ससैन्यास्तत्स्त्रीसैन्यमुपद्रोतुं प्रावर्त्तन्त । ततो **रामो** गजस्तम्भमुत्पाट्याऽऽयुधीकृत्य तानपातयत् । ततः सैन्यभङ्गे



भृशं कुपितोऽ**तिवीर्यः** खड्गमाकृष्य रणाय स्वयमुत्तस्थौ । **लक्ष्मण**श्च तत्खड्गमाच्छिद्य तं केशेष्वाकृष्य तद्वस्त्रेण बद्ध्वा व्याघ्रो मृगमिव तमादाय चचाल । ततः करुणावशात् **सीता** तं मोचयामास । **लक्ष्मण**श्च **भरत**सेवाम**तिवीर्यं** प्रत्यपादयत् । क्षेत्रदेवता च सर्वेषां स्त्रीवेषं सञ्जहार । तदाऽ**तिवीर्यो**ऽपि तौ **राम-लक्ष्मणा**वज्ञासीत् । ततस्तयोः पूजां विधाय मानभङ्गेन विरक्तः किमहमन्यं भजिष्यामी-त्यहङ्कारवान् दीक्षोत्सुको राज्ये सुतं **विजयरथं** निवेश्य **रामे**ण निषिद्धोऽपि प्राव्राजीत् । ततो **विजयरथः** स्वस्वसारं **रतिमालं लक्ष्मणा**य ददौ । **लक्ष्मण**स्तां स्वीचकार ।

**रामो**ऽपि ससैन्यो **विजयपुरं विजयरथ**श्च **भरतं** सेवितु**म-योध्यां** प्रतस्थे । **भरत**श्च तद्वृत्तान्तं ज्ञात्वा तं **विजयरथ**मायान्तं सच्चकार । **विजयरथ**श्च **रतिमाला**नुजां **विजयसुन्दरीं भरता**य ददौ । तदा चाऽ**तिवीर्यो** मुनिर्विहरन् तत्र समाययौ । **भरते**न च वन्दित्वा क्षमयाञ्चक्रे । **विजयरथ**श्च सप्रसादं **भरते**न विसृष्टो **नन्द्यावर्त्त**पुरं ययौ ।

अथ **महीधर**मनुज्ञाप्य **रामे** गन्तुमुत्सुके **लक्ष्मणो वनमाला**-मापप्रच्छे । तदा बाष्पार्द्रमुखी **वनमालो**चे-'यन्मत्प्राणत्राणम-कार्षीस्तदधुना मुधा । त्वद्विरहजं हि दुःखमर्धवधतुल्यम् । ततो मृत्युरेव वरम् । तदद्यैव परिणीय मां सहैव नय' । ततो **लक्ष्मणो**-'ऽभीप्सितं स्थानं **रामं** प्रापय्य त्वां समेष्यामी'ति सशपथं तामाश्वा-सितवान् । रात्रिशेषे च स**सीता-लक्ष्मणः** प्रस्थाय क्रमाद् वनान्यतिक्रम्य **रामः क्षेमाञ्जलिं** पुरीं प्राप । तत्र **लक्ष्मणे**नाऽऽनीतैः **सीत**या स्वकरेण संस्कृतैः फलादिभिर्बहिरुद्याने वर्त्तयामास ।

अथ **राम**मनुज्ञाप्य कौतुकात् पुरीं प्रविश्य 'योऽस्य राज्ञः शक्तिप्रहारं सहते, तस्मै स्वकन्यकामेव ददाती'त्याघोषणां श्रुत्वा तद्धेतुं कमपि जनमपृच्छत् । स जन उवाच-'अत्र नगरे **शत्रुदमनो** नृपोऽस्ति । तस्य **कनकादेवी**कुक्षिजा **जितपद्मा**ख्या सुताऽस्ति । तद्वरस्य बलपरीक्षार्थं प्रत्यहं नृपो घोषणामिमां कारयति, किन्तु कोऽपि तादृशः पुरुषो नैति' । तच्छ्रुत्वा **लक्ष्मणः** सभास्थितं तं नृपमुपगम्य तेन कुतो हेतोः कुतस्त्य इति पृष्टोऽहं **भरत**दूतोऽस्मि । प्रयोजनेन केनाऽपि गच्छन् तवेमां कन्यां श्रुत्वा परिणेतुमागतोऽस्मि । मम शक्तिघातं सहिष्यसे इति राज्ञा पृष्टश्च 'किमेकेन पञ्चाऽपि सहिष्ये इति च **लक्ष्मण** उदतरत् ।

तदानीमेव च तत्राऽऽगता **जितपद्मा लक्ष्मणं** प्रेक्ष्य कामार्ता जाता । तया वार्यमाणोऽपि च नृपो **लक्ष्मणा**य दुःसहं शक्तिपञ्चकं प्राहरत् । **लक्ष्मण**श्च द्वे कराभ्यां द्वे कक्षाभ्यामेकां च दन्तैरग्रहीत् । ततो **जितपद्मा** स्वयं तस्मिन् वरमालामक्षिपत् । नृपोऽपि च कन्या त्वयोदुह्यतामित्यवोचत् । **लक्ष्मणो**ऽपि बहिरुद्याने ममाऽग्रजो **रामो**ऽस्ति, तेन सर्वदा परतन्त्रोऽस्मीत्यवोचत् । ततो नृपस्तौ **राम-लक्ष्मणौ** ज्ञात्वा सद्यो गत्वा नत्वा स्ववेश्माऽऽनीय भक्त्याऽपूजयच्च । ततश्चलिते च **रामे लक्ष्मणः** परावृत्तस्त्वत्सुतां परिणेष्यामीति नृपमुक्तवान् ।

अथ निशायां ततो निर्गत्य **रामः** सायं **वंशशैला**ख्य-पर्वततटस्थितं **वंशस्थलं** नाम नगरं प्राप । तत्र सनृपं लोकं भयाकुलं प्रेक्ष्य कमपि जनं तद्भयकारणमपृच्छत् । ततः स पुरुष उवाच-'अद्य तृतीयो दिवसोऽस्ति, रात्रावस्मिन् पर्वते उच्चै रौद्रो ध्वनिर्जायते। तद्भयाच्च सकलो लोको रात्रावन्यत्र गच्छति । प्रातश्च पुनरायाति,



नित्यमियं कष्टा स्थितिः' । ततश्च **रामः** कौतुका**ल्लक्ष्मणे**न प्रेरितस्त-मद्रिमारुह्य कायोत्सर्गस्थितौ मुनी दृष्ट्वा स**जानकी-लक्ष्मणो** वन्दित्वा तदग्रे **गोकर्णदत्त**वीणामवादयत् । **लक्ष्मण**श्च ग्रामराग-मनोहरं गातुं प्रववृते । **सीता** च ननर्त । तदैव च रविरस्तमियाय । रात्रिः प्रवृत्ता, विविधानेकवेतालपरिवृतोऽ**नलप्रभो** देवश्चाऽऽगतः। स च स्वयं वेतालरूपः साट्टहासं तौ मुनी दृष्ट्वोपद्रोतुं प्रावर्त्तत । ततो **राम-लक्ष्मणौ सीतां** साधुसमीपे मुक्त्वा तं निहन्तुं सन्नद्धावुत्तस्थाते। ततः स देवस्तयोस्तेजः सोढुमक्षमो निजं स्थानं ययौ । तौ च केवलमापतुः । ततो देवैः केवलज्ञानमहिम्नि कृते **रामो** नत्वोपसर्ग-कारणमपृच्छत् ।

ततस्तयोरेको मुनिः **कुलभूषणो** जगौ-'**पद्मिन्यां** नगर्यां **विजयपर्वतो** नृपो बभूव । तस्य चाऽ**मृतस्वरा**ख्यो दूत आसीत्। तस्य दूतस्यो**पयोगा**कुक्षिजा**वुदितो मुदित**श्च द्वौ पुत्रावास्ताम् । तथा तस्य दूतस्य **वसुभूति**र्द्विजो मित्रमासीत् । **उपयोगा** च तदनुरक्ता-ऽ**मृतस्वरं** हन्तुमियेष । एकदा च नृपादेशाय गच्छ**न्नमृतस्वरः** सह गच्छता **वसुभूति**ना हतः । पुरीमागत्य चाऽ**मृतस्वरे**ण कार्यवशादहं निवर्त्तित इति जनानवोचत् । **उपयोगां** चाऽ**मृतस्वरो** मार्गे छलं प्राप्य मया हत इत्यवदत् । ततः सा तमभिनन्द्येमौ पुत्रावपि जहि, यथा सर्वथा विघ्ननाशः स्यादित्युक्तवती । सोऽपि तथेति प्रतिपन्न-वान् । दैवाच्च **वसुभूति**भार्या तच्छ्रुत्वेर्ष्ययो**दित-मुदित**योस्तदाख्यत्। तेन च क्रुद्धो**दिते**न **वसुभूति**र्हतः । स च मृत्वा **नलपल्ल्यां** म्लेच्छो जातः । नृपश्च महर्षेर्धर्मं श्रुत्वा बोधिमाप्यो**दित-मुदितौ** चाऽपि प्रव्रज्यामग्रहीषुः ।

एकदा च **सम्मेते** चैत्यानि वन्दितुं प्रस्थितौ तावु**दित-मुदितौ** मार्गभ्रष्टौ तां पल्लीं प्रापतुः । तत्र **वसुभूति**जीवो म्लेच्छः पूर्ववैरात् तौ निरीक्ष्य हन्तुं धावितो म्लेच्छाधिपतिना निषिद्धः। स म्लेच्छ-राजश्च प्राग्भवे मृगः कर्षकाभ्या**मुदित-मुदित**जीवाभ्यां व्याधाद् मोचितः । तेन म्लेच्छेशेन रक्षितौ तौ **सम्मेत**मेत्य चैत्यानि वन्दित्वा चिराय विहरन्तावनशनं विधाय विपद्य **महाशुक्रे सुन्दर-सुकेशा**-ख्यौ देवौ बभूवतुः । **वसुभूति**जीवो म्लेच्छश्च भवान् भ्रान्त्वा कथञ्चिद् मानुषं प्राप्य तापसो भूत्वा विपद्य **ज्योतिष्के**षु सुरेषूत्पन्नो मिथ्यादृष्टि**धूमकेतु**नाम्ना । **उदित-मुदित**जीवौ च **शुक्रा**च्च्युत्वा **भारते**ऽरिष्टपुरे **प्रियम्वद**नृपस्य **पद्मावती**कुक्षिजौ **रत्नरथ-चित्ररथा**ख्यौ सुतौ जातौ । **धूमकेतु**रपि च्युत्वा तन्नृपस्य **कनका-भायां** पत्न्याम**नुद्धरो** नाम पुत्रो जज्ञे । स सदा **रत्नरथे चित्ररथे** च समत्सरो बभूव । किन्तु तौ तस्मिन् मात्सर्यं न चक्रतुः । **प्रियम्वद**श्च **रत्नरथे** राज्यं **चित्रकथा-ऽनुद्धरयो**र्यौवराज्यं च न्यस्य षड् दिवसानि प्रायोपवेशनं कृत्वा विपद्य देवा बभूव ।

अथ कश्चिन्नृपोऽ**नुद्धरे** याचमानेऽपि **श्रीप्रभां** नाम कन्यां **रत्नरथा**य ददौ । तेन क्रुद्धोऽ**नुद्धरो रत्नरथ**स्य महीमलुण्टयत् । **रत्नरथे**न च रणे निपात्य गृहीतो बहुशो विडम्ब्य मुक्तस्तापसो भूत्वा स्त्रीसङ्गाद् निजं तपो निष्फलीचक्रे । ततो मृत्वा भवान् भ्रान्त्वा मर्त्यो भूत्वा पुनरपि तापसः सन्नज्ञानकं तपश्चकार । सोऽयं मृत्वा **ज्योति-ष्के**ष्व**नलप्रभो**ऽयमुपसर्गं चकार । **रत्नरथ-चित्ररथौ** च दीक्षां गृहीत्वाऽ**च्युते**ऽ**तिबल-महाबलौ** देवौ अभूताम् । ततः च्युत्वा **सिद्धार्थ**पुरे **क्षेमङ्कर**नृपस्य **विमलादेवी**कुक्षिजावहं **कुलभूषणो**ऽयं **देशभूषण**श्च पुत्रौ जातौ ।



**घोषो**पाध्यायतो द्वादशाब्दीं यावत् सकलाः कला गृहीत्वा त्रयोदशेऽब्दे **घोषे**ण सहाऽऽयातौ राज्ञाऽन्तिके राजकुले वातायनस्थां कन्यामपश्याव । तदा जातानुरागौ सद्य एव विमनायितौ राजानमुप-गम्य कला अदर्शयाव । नृपेण सत्कृत उपाध्यायो निजास्पदं जगाम । आवां च राजाज्ञया मातरं नन्तुमगच्छाव । तत्र मातुः समीपे तां कन्यामपश्याव । माता च 'युवयोः स्वसा **कनकप्रभे**य-मित्यकथयत् । तथा **घोषो**पाध्यायगृहे वसतोर्युवयोरियं जातेति युवां नोपलक्षयथ इति चाऽऽख्यातवती । तच्छ्रुत्वा लज्जितावावामज्ञानात् स्वसारं कामयमानौ क्षणाद् विरक्तौ प्राव्राजिष्व । ततस्तीव्रं तपस्तप्यमानौ अत्र प्राप्य महागिरौ शरीरेऽपि निःस्पृहौ कायोत्सर्गेणा-ऽऽस्थाव । आवयोर्वियोगेन पिता चाऽनशनेन विपद्य **महालोचन**-नामा देवो गरुडेश आसनकम्पेनाऽऽवयोरुपसर्गं विज्ञाय प्राग्जन्म-स्नेहात् सम्प्रतीहाऽऽगतः ।

सोऽ**नलप्रभ**देवो देवैः सह कौतुकाद**नन्तवीर्य**मुनिं केवलिन-मुपगम्य नत्वा देशनामश्रौषीत् । देशनान्ते च केनचिच्छिष्येणाऽस्मिन् **मुनिसुव्रत**तीर्थे तव पश्चात् कः केवलीति पृष्टो मुनिराचख्यौ-'मम निर्वाणे **कुलभूषणो देशभूषण**श्च द्वौ भ्रातरौ केवलिनौ भविष्यतः'। तच्छ्रुत्वा चाऽ**नलप्रभो** निजं स्थानं प्राप्य विभङ्गेन कायोत्सर्ग-स्थितावावां ज्ञात्वाऽऽ**नन्तवीर्य**वचनमन्यथा कर्त्तुमशक्तः प्राग्जन्म-वैराद् दारुणमुपसर्गं चकार । तस्योपसर्गं कुर्वतश्च चत्वारि दिनानि व्यतीयुः । अद्याऽत्र युवामागतौ, युष्मद्भीत्या च स पलायामास । आवयोश्च कर्मक्षयात् केवलमुत्पन्नम् । तदेवमयमुपसर्गपरोऽपि नौ कर्मक्षये सहायोऽभूत् । गरुडेशो **महालोचन**देवोऽपि **राम**मूचे-'राघव ! त्वं साध्वकार्षीः, ते किं प्रत्युपकरोमि ?' ततो **रामे**ण न

कञ्चित् प्रयोजनमस्तीत्युक्तस्तथाऽप्युपकरिष्यामीत्युक्त्वा तिरोहितवान् ।

अथ **वंशस्थला**धीशः **सुरप्रभ**स्तत्रैत्य नत्वा पूजयित्वा **रामा**ज्ञया तत्र शैलेऽर्हच्चैत्यान्यकारयत् । **राम**नाम्ना च स गिरिस्तत्प्रभृति **रामगिरि**रिति ख्यातः । **राम**श्च **सुरप्रभ**मापृच्छ्य प्रस्थाय गहनं **दण्डका**रण्यं प्रविवेश । तत्र च **महागिरि**कन्दरे आवासं विधाय निजगृह इवोवास ।

❀ ❀ ❀

अथाऽन्येद्युर्भोजनसमये **त्रिगुप्त-सुगुप्तौ** चारणौ मुनी नभसा तत्र समायातौ कृतद्विमासोपवासौ पारणार्थमुपस्थितौ भक्त्या वन्दितवन्तः **सीता-राम-लक्ष्मणाः** । **सीता** च यथोचितैरन्नपानैस्तौ प्रत्यलाभयत् । तदा देवै रत्नगन्धाम्बुवृष्ट्यो विदधिरे । तदानीं च **कम्बुद्वीप**विद्याधरेश्वरो **रत्नजटी** द्वौ सुरौ चाऽऽगत्य **रामाय** साश्वं रथं ददुः । तत्र च गन्धाम्बुवृष्टिगन्धेनाऽऽकृष्टो **गन्ध**नामा खगो रोगी पादपादुत्तीर्य समायातो मुनेर्दर्शनमात्रेण सम्प्राप्तजातिस्मरणो मूर्च्छया भूमौ पपातः । सः **सीत**याऽम्बुभिः सिक्तो लब्धसंज्ञः समुत्थाय साधुपादेषु पतितः साधोः स्पर्शौषधीलब्ध्या क्षणाद् नीरोगोऽभवत् ।

तदानीं च तस्य पक्षौ हैमौ, चञ्चू विद्रुमाभा, पादौ पद्मरागप्रभौ, वपुर्नानारत्नप्रभं जटाश्च शिरस्यभवन् । तदादि तस्य पक्षिणो **जटायु**रिति नामाऽभवत् । ततो **रामो** मुनी अपृच्छत्-'क्रव्यादः कुधीश्चाऽपि गृध्रोऽयं वः पादयोः पतित्वा कस्माच्छान्तो जातः । तथाऽत्यन्तकुरूपाङ्गः क्षणात् कनकरत्नद्युतिः कथमभवत् ?' ततः **सुगुप्त**मुनिराह-



इह पुरा **कुम्भकारकटं** नाम पुरं **दण्डको** नाम राजा चाऽऽसीत् । तदा च **श्रावस्त्यां जितशत्रू राजा धारिणी** च तद्भार्या **स्कन्दक**श्च तत्पुत्र आसन् । तयोश्च **पुरन्दरयशसं** नाम कन्यां **दण्डकः** पर्यणैषीत् । एकदा च केनचित् प्रयोजनेन **दण्डको जितशत्रुं** प्रति **पालकं** नाम द्विजं दूतं प्राहिणोत् । तदानीं च **जितशत्रु**रर्हद्धर्मगोष्ठीपर आसीत् । कुधीः **पालक**श्च तं धर्मं दूषयितुं प्रारेभे । ततः **स्कन्दके**न युक्त्या स निरूत्तरीचक्रे । तदा सभ्यैरुपहसितः **स्कन्दकः** सामर्षो राज्ञा विसृष्टः **कुम्भकारकट**मुपेतवान् । **स्कन्दक**श्चाऽन्यदा विरक्तः पञ्चशत्या राजपुरुषाणां **मुनिसुव्रत**पादान्ते व्रतं गृहीत्वा **पुरन्दरयशः**प्रभृतिकं बोधयितुं **कुम्भकारकटं** यामीत्यापप्रच्छ प्रभुम् ।

प्रभुणा च तत्र गतस्य ते सपरिवारस्य मारणान्तिक उपसर्गो भावीत्युक्तम् । तत्र वयमाराधका भाविनो न वेति पुनः पृष्टेन भगवता त्वां विना सर्वेऽप्याराधका इत्याख्यातम् । सर्वमेतत् सम्पूर्णमित्युक्त्वा मुनिपञ्चशत्या परिवृतश्चलितः स्कन्दकमुनिः **कुम्भकारकटं** प्राप्तवान् । **पालक**श्च तं दृष्ट्वा तं पराजयं स्मरन्नुद्यानेषूर्व्यां शस्त्राण्यखानयत् । तत एकस्मिन्नुद्याने समवसृतं **स्कन्दक**मुनिं वन्दितुं **दण्डकः** सपरिवार आययौ । मुनेर्देशनां श्रुत्वा च हृष्टो गृहं ययौ । ततः **पालको** रहसि **दण्डक**मूचे-'स्वामिन् ! असौ मुनिर्बकाचारः पाखण्डी सहस्रयोधिभिर्मुनिवेषधरैः पुम्भिस्त्वां हत्वा राज्यं ग्रहीतुमिहाऽऽगतोऽस्ति । अत्रोद्याने च निजस्थाने गुप्तं शस्त्राणि निखातानि दृष्ट्वा प्रत्ययं कुरु' ।

ततो नृपः सर्वतो मुनिस्थानानि निखन्य चित्राण्यस्त्राणि दृष्ट्वा च परं विषण्णोऽविचार्यैव **पालक**मादिदेश-'मन्त्रिन् ! त्वया

साधु ज्ञातम्। अस्य दुर्मतेरुचितं कर्त्तुं त्वमेव जानासि, तत् कुरुष्व, पुनर्न प्रष्टव्योऽहम्' । ततः **पालकः** शीघ्रं गत्वा यन्त्रं कारयित्वा **स्कन्दक**स्य पुरत एव साधून् प्रत्येकं निपीडितवान् । **स्कन्दक**श्च निपीड्यमानानेतान् स्वयं देशनापूर्वकं सम्यगाराधनाविधिमकारयत् । चरमे शिशौ मुनावुपयन्त्रं नीते च करुणावशात् **स्कन्दकः पालक**मुवाच-'आदौ मामेव पीलय, ममैतद् वचः कुरु, बालं मुनिं यथा पील्यमानं न पश्यामि' । **पालक**स्तु **स्कन्दकं** तत्पीडापीडितं ज्ञात्वा तमेव बालमुनिमपीलयत् । ते मुनयश्च सर्वे समुत्पन्नकेवला अव्ययपदमवापुः ।

**स्कन्दक**स्तु प्रत्याख्याय निदानं चकार-**दण्डक-पालक**-कुलराष्ट्रविनाशायाऽस्य तपसः फलेन भूयासम्' । एवं कृतनिदानः **पालके**न पीलितो विपद्याऽ**ग्निकुमारो** देवोऽभूत् । शकुनिकया च **पुरन्दरयशसा** दत्तं रत्नकम्बलतन्तुजं रक्ताक्तं तद्रजोहरणमुद्धृतं यत्नेन धृतमपि दैवात् **पुरन्दरयशो**देव्याः पुरः पपात । सा च भ्रातुर्मुनेर्विपदं ज्ञात्वा **दण्डक**माक्रोशन्ती शोकमग्ना शासनदेवतया **मुनिसुव्रत**पादान्ते नीता प्राव्राजीत् ।

**स्कन्दका-ऽग्निकुमार**श्च प्राग्जन्माऽवधिना ज्ञात्वा स**पालकं** सनगरं **दण्डकं** ददाह । तत्प्रभृत्युद्वसमिदं दारुणं **दण्डका**रण्यं **दण्डक**नाम्ना भुवि विख्यातं बभूव । **दण्डको**ऽपि भवान् भ्रान्त्वाऽयं **गन्धाख्यः** स्वकर्मभिर्महारोगी पक्षीजातोऽस्मद्दर्शना-ज्जातिस्मरणं प्राप्तोऽस्मत्स्पर्शौषधीलब्ध्या नीरोगो जातः । तच्छ्रुत्वा प्रसन्नः स पक्षी पुनरपि मुनिपादयोः पतित्वा धर्मं श्रुत्वा श्रावकत्वमुरीचकार । मुनिरपि तस्येप्सितं ज्ञात्वा जीवघातमांसाहार-रात्रिभोजनकर्मणां प्रत्याख्यानं ददौ । युष्माकमेष साधर्मिकः ।



तस्मिन् वात्सल्यं श्रेयस्करमुक्तं जिनेश्वरैरिति **राम**मुक्त्वा तेन चाऽस्माकमेष परमो बन्धुरित्यङ्गीगारपूर्वकं वन्दितौ तौ मुनी नभसोत्पत्याऽन्यतो जग्मतुः । **रामा**दयश्च **जटायु**ना सह तं दिव्यं रथमारुह्य क्रीडया विजह्रुः ।

❀ ❀ ❀

इतश्च **पातालल**ङ्कायां **खर-चन्द्रणखा**त्मजौ **शम्बूक-सुन्दौ** तरुणावास्ताम् । पितृभ्यां निषिध्यमानोऽपि **शम्बूकः सूर्यहासा**-सिसाधनार्थं **दण्डका**रण्यमुपेत्य **क्रौञ्चरवा**तीरे वंशगह्वरान्तः स्थित्वा मां यो वारयिष्यति तं हनिष्यामीत्युक्तवान् । ततः स एकाशनो, विशुद्धो, ब्रह्मचार्यधोमुखो, वटशाखायां बद्धपादो, विद्यां सप्ताहाग्र-द्वादशाब्द्या सिद्धिमुपगन्त्रीं जपितुमारेभे । एवमधोमुखं तस्थुषस्तस्य दिवसचतुष्ट्याऽधिकद्वादशाब्दी व्यतिक्रान्ता । ततः सेद्धुकामः **सूर्यहासः** कोशगुप्तस्तत्र समागतः । तदानीमेव क्रीडयेतस्ततो भ्राम्यन् **लक्ष्मण**स्तत्रोपेत्य तमसिं दृष्ट्वा हस्तेनाऽऽदाय कोशादा-कृष्य तत्तीक्ष्णत्वपरीक्षार्थं समीपस्थां वंशजालीं लुलाव । तेन च वंशगह्वरान्तरस्थस्य **शम्बूक**स्य शिरं कर्तितं पुरः पतितं दृष्टम् । 'अयुध्यमानोऽशस्त्रश्च मया कोऽपि हतः, मां धिगि'त्यात्मानं निन्दयित्वा गत्वा **रामा**याऽशेषं वृत्तान्तं निवेद्याऽसिं च दर्शयामास।

ततो **राम** उवाच-'**सूर्यहासो**ऽयमसिः, अस्य साधकस्त्वया हतः, अस्य कोऽप्युत्तरसाधको भविष्यति' । अत्रान्तर एव **रावण**-स्वसा **चन्द्रणखा** मत्पुत्रस्याऽद्य **सूर्यहासः** सेत्स्यतीति कृतत्वरा पूजासामग्रीमादाय मुदिता तत्रोपस्थिता पुत्रस्य च्छिन्नं शिरो ददर्श च। क्वाऽसि वत्स ! **शम्बूके**ति रुदति **लक्ष्मण**स्य मनोहरां पादन्यासपङ्क्तिमपश्यत् । मत्पुत्रघातकस्येयं पादपङ्क्तिरिति

तामनुसरन्त्यविदूर एव स**सीता-लक्ष्मण**मासेचनकं **रामं** तरुतले स्थितमपश्यत् सा । रिरंसापरवशा सुन्दरं कन्यारूपं विकृत्य कम्पमानगात्रोपतस्थे सा । ततो **रामेण** कुत इहाऽऽगम इति पृष्टोवाच-'**अवन्ति**राजस्य कन्याऽहं सौधतले सुप्ता रात्रौ केनाऽपि हृता । इहाऽरण्ये च सखड्गेन केनाऽपि विद्याधरेण दृष्टः स स्त्रीरत्नमपहृत्य न गन्तुमर्हसि मयि तिष्ठतीति तेनोक्तः । ततो द्वावपि सामर्षौ युद्ध्वा विपेदाते । अहं चैकाकिनीतस्ततो भ्राम्यन्ती दैवात् त्वां प्राप्ताऽस्मि । तन्मां कुलजां कुमारीं परिणय' । ध्रुवमियं काऽपि मायाविनी मां वञ्चयितुमिहाऽऽगतेति चिन्तयन्तौ **राम-लक्ष्मणौ** स्मेरनेत्रावन्योन्यं ददृशतुः ।

**राम**स्तामुवाच-'अहं सभार्यः, त**ल्लक्ष्मण**मभार्यं भज । ततस्तेनैवमुक्ता **लक्ष्मणे**न च तथैवोक्ता प्रार्थनाभङ्गात् पुत्रवधाच्च क्रुद्धा गत्वा **खरा**दीनां सर्वं पुत्रवधादिवृत्तान्तमाख्यत् । ततस्ते **खरादयः** क्रुद्धाश्चतुर्दशभिर्विद्याधरसहस्रै **राम**मुपद्रोतुमभ्याययुः । ततो मयि तिष्ठति तव युद्धेनाऽलमिति प्रार्थयन्तं **लक्ष्मणं**-'जयाय गच्छ, सङ्कटे ममाऽऽह्वानाय सिंहनादं कुर्या' इति **रामः** समादिशत्। ततो **रामे**णाऽनुज्ञप्तो **लक्ष्मणो** धनुरादाय गत्वा तान् हन्तुं गरुडः सर्पानिव प्रववृते । युद्धे प्रवर्धमाने च स्वभर्त्तुः सहायार्थं सा **रावण**स्वसा गत्वा **रावण**मूचे-'**दण्डका**रण्ये समायातौ मनुष्यौ **राम-लक्ष्मणौ** ते भागिनेयं जघ्नतुः । तज्ज्ञात्वा तत्र गत्वा ते स्वसृपतिः सानुजः सबलो **लक्ष्मणे**न युध्यमानोऽस्ति। **राम**श्चा-ऽन्यत्र **सीत**या सह स्थितोऽस्ति । **सीता** परमसुन्दरी लोक-विलक्षणैवाऽस्ति, यदि तत्स्त्रीरत्नं न गृह्णासि, तद् रावणो नाऽसि'।

ततो **रावणः पुष्पकं** विमानमारुह्य तं यत्र **जानकी** तत्र शीघ्रं याहीत्यादिशत् । तत्र विमाने समुपस्थिते च **राम**मुग्रतेजसं दृष्ट्वा



भीतस्ततो व्याघ्रोऽग्नेरिव दूरे स्थितोऽचिन्तयत्-'इतो **रामो** दुष्प्रापः, इतश्च **सीता**हरणमिष्टमितीतो व्याघ्र इतस्तटी' । तद्विचार्य स्मृतिमात्रेणोपस्थिताम**वलोकनीं** विद्यां बद्धाञ्जलिरादिशत्-'मम **सीता**हरणे साहाय्यं कुरु' । ततः सा विद्योवाच-'**राम**समीपस्थायाः **सीता**या हरणमसाध्यम् । तत्रैष उपायो यद् **रामो लक्ष्मणं** तत्स-ङ्केतितसिंहनादेन यथा याति तथा कुरु' । ततस्तथा कुर्विति **रावणे**नाऽऽदिष्टा साऽन्यत्र गत्वा **लक्ष्मण**सिंहनादं विचकार । तं च श्रुत्वा **लक्ष्मणो**ऽप्रतिमल्ल इति तस्य कुतः सङ्कटमिति चिन्तयति **रामे लक्ष्मण**वात्सल्यात् **सीतो**वाच-किं विलम्बसे ? शीघ्रं गत्वा **लक्ष्मणं** त्रायस्व' । ततः सिंहनादेन **सीता**वचनेन च प्रेरितो-ऽशकुनान्यप्यगणयन् द्रुतं जगाम ।

ततो **रावणो** विमानादुत्तीर्य बलाद् रुदतीं **सीतां** विमाने समारोपयितुमारेभे । तद् दृष्ट्वा च क्रुद्धो **जटायु**र्नखचञ्चुभि**र्दश-ग्रीव**स्योरो विदारयामास । **रावणो**ऽपि खड्गमाकृष्य तं खगं पक्षौ छित्वा भूतलेऽपातयत् । ततो निःशङ्को **रावणः सीतां पुष्पके** समारोप्य दुतं नभसोत्पपात । **सीता**रुदितं श्रुत्वा चाऽ**र्कजटि**पुत्रो **रत्नजटि**र्दध्यौ-'समुद्रस्योपरि रुदितं श्रूयते, तद् नूनं **राम**पत्नी **रावणे**न ह्रियते । **राम-लक्ष्मणौ** च च्छलितौ । तदद्य स्वामिनो **भामण्डल**स्योपकरोमी'ति विचिन्त्य खड्गमाकृष्य **रावणं** दधाव । **रावण**श्च युद्धायाऽऽह्वयमानं तं हसित्वा विद्यासामर्थ्य-तस्तस्याऽखिलां विद्यां जहार । तेन च स पक्षहीनः पक्षीव हतविद्यः पतितः **कम्बुद्वीपे कम्बु**शैलमारुह्य तस्थौ ।

**रावणो**ऽपि विमानस्थो नभसा गच्छन् कामार्त्तः **सीतां** सानुनयमुवाच-'खेचरभूचराधीशस्य मे महिषीपदमाप्य किं रोदिषि ? **राम**स्तव नाऽनुरूपः । मां पतिं मन्यस्व' । एवं कथयति **रावणे**

**रामं** स्मरन्ती **सीता** नम्रमुखी तस्थौ । **रावण**श्च कामार्त्तस्तस्याः पादयोः पपात । **सीता** च परपुरुषस्पर्शभीता पादावपसारयत् । निस्त्रप ! परस्त्रीलम्पट ! शीघ्रमेव तव मृत्युर्भवितेति **रावण**माचुक्रोश च । तदानीं च समन्ताद् **रावण**स्य **सारणा**दयो मन्त्रिणः सामन्तादयश्च संमुखाः समागतवन्तः । **रावण**श्च सोत्साहं महोत्सवां **लङ्का**पुरीमागमत् । **सीता** च यावद् **राम-लक्ष्मण**कुशलं न प्राप्नोमि तावद् न भोक्ष्ये इत्यभिग्रहं गृहीतवती । ततो **रावणो लङ्का**पूर्वदिशि स्थिते **देवरमणो**द्याने रक्ताशोकतरुतले **त्रिजट**याऽऽरक्षकैश्चाऽऽवृतां **जानकीं** मुक्त्वा प्रमुदितः स्वं धाम जगाम ॥ ५ ॥

*इति सीताहरणवर्णनात्मकः पञ्चमः सर्गः ॥५॥*

## षष्ठः सर्गः

अथ **रामो** धनुर्धरो द्रुतमेव शत्रुभिः सङ्ग्राममारभमाणं **लक्ष्मण**मुपाजगाम । तमागच्छन्तं दृष्ट्वा किं **सीता**मेकाकिनीं मुक्त्वा त्वमिहाऽऽगम इति **लक्ष्मणः** पृष्टवान् । तव सिंहनादेनाऽऽयातोऽस्मीति **रामे**ण प्रत्युक्तश्च **लक्ष्मणः** पुनरुवाच–'मया न सिंहनादो विहितो भवता च श्रुतः, तद् नूनं वयं केनाऽपि वञ्चिताः। **सीता**मपहर्तुं केनाऽप्यनेनोपायेन दूरमुपनीतोऽसि, तदत्र बलवत्कारणं शङ्के । ततः **सीतां** परित्रातुं त्वरितमेव गच्छ । अहमप्यरीन् हत्वा द्रुतमेव पृष्ठतः समागच्छामि' । ''**लक्ष्मणे**नैवमुक्तो **रामः** स्वस्थानं प्राप्य **सीता**मनवलोक्य च मूर्च्छितो भुवि पपात । लब्धसंज्ञश्चोत्थाय मुमूर्षुं **जटायुषं** दृष्ट्वा च दध्यौ–'केनाऽपि च्छलेन मे दयिताऽपहृता, तेनैव चाऽयं युध्यमानो हतः'' । ततः प्रत्युपकारकामो **रामः** तस्य श्रावकस्य **जटायुषो** नमस्कारमन्त्रं ददौ । स च विपद्य **माहेन्द्रे** महर्द्धिको देवोऽभवत् । **राम**श्च **सीता**मन्वेष्टुमितस्ततोऽरण्ये बभ्राम ।

इतश्च **लक्ष्मण** एक एव **खरे**ण युध्यमान **खरा**नुजं **त्रिशिरसं खरं** निवार्य युद्धोद्यतं रथस्थं जघान । तदानीमेव च **पाताललङ्के**श्वर-**चन्द्रोदर**नृपतनयो **विराधः** सबलः समुपत्य नत्वा **लक्ष्मण**मूचे–'तव भृत्योऽहमेतेषां तव शत्रुणां शत्रुः । इमे **रावण**पत्तयो मे पितरं

**चन्द्रोदरं** निर्वास्य **पातालल**ङ्कां जगृहुः । यद्यपि तव न मत्साहाय्य-प्रयोजनं तथाऽपि मां समादिश" । ततो विहस्य **लक्ष्मण** उवाच-मया हन्यमानान् शत्रून् पश्य, पराक्रमशालिनामन्यसाहाय्याद् विजयस्त्रपाकरः । अद्यारभ्य **राम**स्ते स्वामी, त्वं चाऽद्य मया **पातालल**ङ्काराज्ये स्थापितोऽसि" । ततो **विराधं** तत्र दृष्ट्वाऽधिकं क्रुद्धोऽभ्येत्य **खरो** जगाद-'विश्वासघातिन् । क्व मम पुत्रः **शम्बूकः** ? **विराधे**न किमधुना रक्ष्यसे ?"

ततो विहस्य **लक्ष्मणो** जगाद-'तवाऽनुज**स्त्रिशिरा** भ्रातुष्पुत्रस्य सोत्कण्ठस्तमनुप्रेषितः, त्वामपि तत्र नेताऽस्मि । मूर्ख ! मया प्रमादेन तव पुत्रो हतः, तत्र मे पौरुषं नाऽस्ति । किन्तु त्वां हत्वा कीनाशं प्रीणयामि" । तद्वचसा क्रुद्धश्च **खरो लक्ष्मणं** प्रहर्तुमारेभे । **लक्ष्मणो**ऽपि क्षणेनाऽपि बाणैर्नभच्छादयामास । द्वयोर्भयङ्करो युद्धः प्रावर्त्तत । तदानीं च 'विष्णुनाऽपि युद्धे यस्येदृशी शक्तिः स **खरः** प्रतिविष्णोरप्यधिक" इति नभोवाणी प्रादुर्भूता । **लक्ष्मण**श्चाऽस्य वधेऽपि कालविलम्ब इत्यमर्षाल्लज्जितो बाणेन **खर**शिरश्चिच्छेद । **दूषणो**ऽपि च युद्धायोद्यतः ससैन्यो **लक्ष्मणे**न विनाशितः । ततो **विराधे**न सह वलितो **लक्ष्मणो** दूरं गत्वा **सीता**विरहितं **रामं** दृष्ट्वा परमं विषादं प्राप ।

**रामश्च सीता**विरहपीडितः पुरस्थमपि **लक्ष्मण**मपश्यन् नभोऽभिमुखं जगाद-"मयेदं वनं भ्रान्तं किन्तु **सीता** नाऽवलोकिता । हे वनदेवताः ! युष्माभिः सा न दृष्टा किम् ? अस्मिन् गहने वने एकाकिनीं **सीतां** मुक्त्वा **लक्ष्मणा**य गतोऽस्मि । **लक्ष्मणं** च रक्षोभटसहस्राग्रे मुक्त्वेहाऽऽगतः । मम धियं धिक्" । एवं ब्रुवन् **रामो** मूर्च्छया भुवि पपात । ततो **लक्ष्मण** उवाच-'एष तव भ्राता **लक्ष्मणो**ऽरीन् हत्वा समुपस्थितोऽस्मि" । तद्वचसाऽमृतेनेव सिक्तो लब्धसंज्ञो **रामो**ऽग्रे **लक्ष्मणं** दृष्ट्वाऽऽलिलिङ्ग ।



ततो **लक्ष्मण** उवाच-'सिंहनादस्य कारणं **सीता**हरणं ध्रुवं कस्याऽपि च्छलिनः । तत्तस्य प्राणैः सहैव **सीता**मानेष्यामि । सम्प्रति तद्वृत्तान्तप्राप्तये यतामहे । एष **विराधश्च** पैतृके **पातालल**ङ्काराज्ये स्थाप्यताम् । यद् मया **खर**युद्धे तत् स्वीकृतम्" । **विराधश्च सीता**प्रवृत्तिमानेतुं विद्याधरभटान् प्रेषयामास । **राम-लक्ष्मणौ** च क्रुधाऽधरंनिर्दशन्तौ शोकमग्नौ तत्र तस्थतुः । विद्याधराश्च दूरं भ्रान्त्वाऽपि **सीता**प्रवृत्तिमप्राप्य तत्रैत्याऽधोमुखास्तस्थुः । तज्ज्ञात्वा **राम**स्तानब्रवीत्-'स्वामिकार्ये युष्माभिर्यथाशक्ति साधु समुद्योगः कृतः । यदि **सीता**प्रवृत्तिर्न प्राप्ता, तत्र न भवतो दोषः" ।

ततो **विराधो** नत्वाऽवदत्-'शोकं मा कृथाः, **पातालल**ङ्कायां मां निवेशयितुमद्याऽऽगच्छ, तत्र **सीता**प्रवृत्तिरपि सुलभा स्यात्" । ततो **लक्ष्मण**सहितो **रामो विराधे**न सबलेन सह **पातालल**ङ्काया परिसरं प्राप्तवान् । तत्र च **खर**पुत्रः **सुन्दो** रणाय महासैन्य-समन्वितोऽभ्याययौ । स च **विराधे**न समं भयङ्करं युद्धं चकार । ततो **रामे** रणं प्राप्ते **चन्द्रणखा**वचसा **सुन्दः** प्रणश्य **ल**ङ्कायां **रावणं** शरणं ययौ । **राम-लक्ष्मणौ** च **पातालल**ङ्कां प्रविश्य **विराधं** पैतृके पदे निवेशयामासतुः । **राम-लक्ष्मणौ** च **खर**स्य प्रासादे **विराधश्च सुन्द**स्य प्रासादे तस्थुः ।

इतश्चिरं **तारा**भिलाषिणः **साहसगतेर्हिमवत्**कन्दरे **प्रतारिणी** विद्या सिद्धा । स च तया **सुग्रीव**रूपः **किष्किन्ध**पुरे गत्वा क्रीडार्थं **सुग्रीवे** बहिरुद्याने गते **तारा**विभूषितं तदन्तःपुरं प्रविवेश ।

सत्य**सुग्रीव**श्चाऽपि तदैवाऽऽगतो द्वारि '**सुग्रीवो**ऽग्रेगत' इति वादिभिर्द्वारपालैर्निरुद्धः । ततो **वालि**पुत्रः **सुग्रीव**द्वयं दृष्ट्वा सन्देहात् शुद्धान्तोपद्रवं त्रातुं शीघ्रं ययौ । कपट**सुग्रीव**श्च तेन शुद्धान्ते प्रविशन्निरुद्धः । तदानीं च सैनिकानां चतुर्दशाक्षौहिण्यस्तत्राऽमिलन् । द्वयोरपि तयोर्भेदमजानन्तस्तेऽर्धेऽर्धे सत्य**सुग्रीव**तः कपट**सुग्रीव**तश्च विभक्ताः । ततो द्वयोरपि सैन्ययोर्दारुणं युद्धमजनि । तत्राऽन्तरे कपट**सुग्रीवो** गर्जितं कुर्वन् युद्धोद्यतोऽभवत् । तौ द्वावपि युद्ध्यमानौ च्छिन्नास्त्रौ मल्लयुद्धेन कृतघातावन्योन्यं जेतुमसमर्थौ दूरमपसृत्य तस्थतुः ।

ततः सत्य**सुग्रीवो**ऽ**ञ्जना**सुतं साहाय्यार्थं समाहूय भूयोऽपि माया**सुग्रीवे**ण युध्यमानो भेदमजानतो **हनुमतः** पश्यतोऽपि माया**सुग्रीवः** सत्य**सुग्रीवं** ताडयामास । तेन खिन्नश्च सत्य**सुग्रीवः** **किष्किन्ध**पुराद् बहिर्निर्गत्याऽऽवासमग्रहीत् । माया**सुग्रीव**श्च तत्रैव स्थितोऽपि **वालि**नन्दनाद् निषिद्धोऽन्तःपुरप्रवेशं न लेभे ।

सत्य**सुग्रीव**श्चाऽधोमुखो दध्यौ-'अहो ! कोऽपि परस्त्रीलम्पटो मायापटुरेष मे शत्रुः । माया-पराक्रमाभ्यामुत्कृष्टोऽयं मया कथं वध्यः ? पराक्रमभ्रष्टं मां धिक् । धन्यो **वाली**, यो राज्यं तृणवत् त्यक्त्वा परमं पदं जगाम । मम कुमार**श्चन्द्ररश्मि**र्जगतोऽपि बलीयान् । किन्तु द्वयोर्भेदमजानन् स कं रक्षतु कं वा हन्तु ? किन्तु तेनेदं साधु समाचारितं यत् तस्याऽन्तःपुरप्रवेशो रुद्धः । अस्य पापीयसो वधाय कं बलीयांसं श्रयामि ? किं त्रिलोकीवीरं **रावणं** देवयज्ञभञ्जनं श्रयामि ? किन्त्वसौ प्रकृत्या स्त्रीलम्पटो मां तं च हत्वा **तारां** ग्रहीष्यति । ईदृशेऽवसरे **खरः** साहाय्यकर आसीत्,



सोऽपि **रामेण** हतः । तत्तावेव **राम-लक्ष्मणौ** **विराध**स्य राज्यप्रदौ **पातालल‍ङ्का**यां स्थितौ गत्वा मित्रीकरोमि'' ।

एवं विचार्य रहसि स्वयमनुशिष्य विश्वासपात्रं दूतं प्रेषितवान् । स दूतश्च गत्वा **पातालल‍ङ्का**यां **विराधं** प्रणम्याऽशेषं वृत्तान्तं निवेद्याऽब्रवीत्-'मम स्वामी महति व्यसने पतितः, त्वद्द्वारेण **राम-लक्ष्मणौ** शरणीकर्त्तुमिच्छति' । ततस्तेन **सुग्रीवो** द्रुतमायात्वित्युक्त इतः समेत्य **सुग्रीवा**य निवेदयामास । **सुग्रीव**श्चाऽपि द्रुतमेव ससैन्यः प्रस्थाय **पातालल‍ङ्कां** प्राप्य **विराध**मुपस्थाय तेन सहैव गत्वा **रामं** नत्वाऽवोचत्-'अस्मिन् व्यसने त्वं मे गतिः' । **रामो**ऽपि स्वयं दुःख्यपि परकार्यव्यसनी तद्दुःखं च्छेत्तुं समाजगाम । **विराधे**न **सीता**हरणवृत्तान्तं ज्ञात्वा च बद्धाञ्जलिः **सुग्रीवो** **रामं** निवेदयामास-'त्वत्प्रसादाद् विनष्टारिः ससैन्यः शीघ्रमेव **सीतायाः** प्रवृत्तिमानेष्यामि' । ततो **रामो** **विराधं** विसृज्य स**सुग्रीवः** **किष्किन्धां** प्रति प्रतस्थे ।

ततो **रामे** पुरद्वारमधिष्ठिते **सुग्रीवः** कपट**सुग्रीवं** रणायाऽऽह्वास्त । माया**सुग्रीवो**ऽपि गर्जन् शीघ्रमेवाऽभ्याजगाम । द्वावपि च मत्तौ वनगजाविवाऽयुध्येताम् । **राम**श्च सरूपौ तौ दृष्ट्वा संशयानः क्षणमुदासीन इव तस्थौ । ततः किञ्चिद् विचार्य **रामो** **वज्रा**भिधधनुष्टङ्कारमकरोत् । तद्ध्वनेश्च **साहसगतेः** **प्रतारिणी** विद्या क्षणादेव पलायत । ततो मायया सर्वं विमोह्य परदारै रिरंसुकाम ! पाप ! तिष्ठेत्युक्त्वा **राम** एकेनाऽपि बाणेन तस्य प्राणानहार्षीत् । ततः **सुग्रीवं** राज्ये न्यवेशयत् । **सुग्रीव**श्च प्राग्वदेव निजैर्नमश्चक्रे । ततः **सुग्रीव**स्त्रयोदशाऽत्यन्तसुन्दरीर्निजाः कन्या ग्रहीतुं प्राञ्जली **राम**मयाचिष्ट । **राम**श्च **सीता**न्वेषणार्थं प्रयतस्व,

एताभिः किमित्युक्त्वा बहिरुद्याने गत्वा तस्थौ । **सुग्रीवो**ऽपि तदाज्ञया पुरीं प्रविवेश ।

❁ ❁ ❁

इतश्च **लङ्का**यां पुरि **रावणा**न्तःपुरस्त्रियो **मन्दोदर्या**दयः **खरा**दिहननवृत्तान्तं श्रुत्वा भृशमरुदन् । **सुन्दे**न सह **चन्द्रणखा**ऽपि रुदती **रावण**गृहे प्रविवेश । **रावणं** दृष्ट्वा च कण्ठे लगित्वाऽऽर्त्तस्वरं रुरोद । ततो **रावण**स्त्वद्भर्तृ-पुत्रहन्तारमचिरादेव हनिष्यामीति तां प्रबोध्य तेन शोकेन **सीता**विरहपीडया च शयने निपत्य तस्थौ ।

ततो **मन्दोदरी** तमुपेत्योवाच-'स्वामिन् । किं प्राकृतजनवद् निश्चेष्टस्तिष्ठसि ?' ततो **रावण** उवाच-'**सीता**विरहपीडयाऽहं निश्चेष्टोऽस्मि, यदि मम जीवितेन ते प्रयोजनं तदा **सीतां** प्रबोधय । अनिच्छन्तीमन्यनारीं जातुचिद् न भुञ्जे इति गुरुसाक्षिको मम नियमः' । सा च पत्युः पीडया पीडिता तत्क्षणं **देवरमणो**द्याने समुपेत्य **सीता**मुवाच-'अहमेषा **मन्दोदरी रावण**महिषी, तव दासीभावं स्वीकरिष्यामि, **रावणं** भज । त्वं धन्याऽसि, यां विश्ववन्द्यो मम पतिः सेवितुमिच्छति । यदि **रावणो** लभ्यस्तर्हि भूचरेण **रामे**ण तपस्विना किम्'' ?

ततः क्रुद्धा **सीतो**वाच-'क्व सिंहः क्व च शृगालः ! क्व मम पती **रामः** क्व च ते पतिः ! तव तस्य च दम्पतित्वं युक्तम् । यदेकोऽन्यस्त्रीषु रिरंसुरपरा च दूती । त्वं द्रष्टुमप्यनर्हा, दूरं सम्भाषणम् । इतः स्थानाद् दूरमपसर, मम दृष्टिपथं त्यज' । तदानीमेव च **रावणो**ऽपि तत्राऽऽगतो जगाद-'**सीते** ! मा कुपः, **मन्दोदर्य**हं च तव दासतामापन्नौ, प्रसादं कुरु' । **सीत**या चाऽन्यतो



मुखीभूय 'अन्तकस्तवाऽन्तिकमागतो मम हरणेन, तवाऽऽशा सर्वदा निष्फलैव स्यात्' । इत्येवं बहुश आक्रुश्यमानोऽपि कामार्त्तः पुनः पुनः प्रार्थयामास । अत्राऽवसर एव सूर्योऽस्तमुपागतः । रात्रिर्घोरा प्रावृतत् । कामक्रोधान्धो दुर्बुद्धी **रावणः सीता**यारुपसर्गं कर्तुं प्रचक्रमे । भयङ्कराः श्वापद-पिशाचादयो **रावण**विकृताः **सीता**समीपमीयुः । तथाऽपि सा पञ्चपरमेष्ठिनमस्कारं स्मरन्ती न भीता न वा **रावणं** भेजे ।

अथ **विभीषणः** प्रातर्निशावृत्तान्तं सर्वं विज्ञाय **रावण**मुपेत्य **सीतां** चोवाच-'त्वं सर्वं स्ववृत्तान्तमाख्याहि, मा भैषीः' । ततः **सीता** तं मध्यस्थं परिज्ञाय नम्रमुख्येव पित्रादिवृत्तान्तमारभ्य हरणान्तं सर्वं वृत्तं निवेदितवती । तन्निशम्य **रावणं** प्रणम्य **विभीषण** उवाच-'त्वया कृतमिदं कर्म कुलदोषाय । यावच्च **रामो** नो हन्तुमिह न समायाति तावदेव **सीतां** तत्र नय'' । तेन च क्रुद्धो **रावणो** विकत्थमानो **विभीषणे**न पुनः पुनर्बोध्यमानोऽपि तदनादृत्य **पुष्पके सीता**मारोप्य क्रीडापर्वतकादिकमदर्शयत् । रतिं याचमानो **रावण**स्तया च **राम**चरणाब्जमरालयाऽविगणितो रम्यस्थानेषु भ्रान्त्वा पुनस्ताम**शोक**वनिकायां मुक्तवान् ।

**विभीषण**श्च **रावणं** दुर्बोध्यं विज्ञाय कुलामात्यानाहूय **लङ्का**या भाविभयत्राणमपृच्छत् । तैः कृतमन्त्रश्च सुधी**र्विभीषणः सीता**निमित्तं रक्षःकुलक्षयं **राम**स्य **हनूमदा**दिसाहाय्यं च तैर्ज्ञात्वा पुरुषार्थे कृतनिश्चयो दुर्गे यन्त्रादिरोपणं चक्रे ।

❁ ❁ ❁

इतश्च कथमपि कालं गमयन् विरहार्त्तो **रामो लक्ष्मण**मनुशिष्य **सुग्रीव**मनुप्रेषितवान् । **लक्ष्मणं** च चापादिसज्जं वेश्मन्युप-

स्थितं विज्ञाय **सुग्रीवो**ऽन्तःपुरात् सद्य एव निर्गत्योपतस्थे । **लक्ष्मणे**न च क्रुद्धेन 'निःशङ्कं सुखं तिष्ठसि, प्रतिश्रुतं विस्मृतम् ? अधुनाऽपि **सीता**प्रवृत्तिमानेतुं प्रयतस्वे'ति निर्भर्त्सितः पादयोः पतित्वा प्रमादं मे क्षमस्वेति सम्प्रार्थितवान् सुग्रीवः । ततो **लक्ष्मण**मग्रे कृत्वोपगम्य नत्वा स्वान् सैन्यानादिदेश-'सर्वेऽपि यूयं गत्वा **सीता**मन्वेषयत' । तथाऽऽदिष्टाश्च ते द्वीपादिषु ययुः । **विराधो भामण्डलो**ऽपि च **सीता**हरणवृत्तान्तं निशम्य दुःखितः ससैन्य आगत्य **रामं** शुश्रूषमाणोऽस्थात् ।

**सुग्रीव**श्च स्वयं गच्छन् **कम्बुद्वीपे रावणा**त् पराजयं स्मृत्वा भीतभीतं **रत्नजटिन**मुपगम्योवाच-'किं नाऽभ्युत्थानं करोषि ?" ततो **रावणे**न युद्धे स्वविद्याहरणवृत्तान्तं निवेदयन्तं तमुप**रामं** नीतवान् । तेन च **सीता**वृत्तान्तं ज्ञात्वा मुदितस्तं **रत्नजटिन**माश्लिष्य **रामः** पुनः पुनः पप्रच्छ । तथा **रावण**हनने विहितसाहसं **लक्ष्मणं** निशम्य **जाम्बवा**नाह-'कोटिशिलोत्पाटी **रावण**हन्तेत्य**नन्तवीर्य**-मुनिनाऽऽख्यातं, तत्प्रत्ययार्थं कोटिशिलामुत्पाटय" । तत एवमस्त्वित्युक्तवन्तं **लक्ष्मणं** विमानेन यत्र कोटिशिलाऽस्ति तत्र नयन्ति स्म ते । ततो देवैः कृतसाधुवादं समुद्धृतकोटिशिलं दृष्ट्वा सञ्जातप्रत्ययाः **किष्किन्धा**यामुप**रामं** नीत्वोचुः कपिवृद्धाः-'युष्मत्तो **रावण**क्षयः, नीत्यनुसारेणाऽऽदौ समर्थो दूतः प्रेष्यः । स च गहनां **लङ्कां** गत्वा **विभीषणं सीता**र्पणाय कथयिष्यति, तेन बोधितेनाऽपि **रावणे**नाऽवज्ञातो दूतो द्रुतं त्वामुपागमिष्यति' ।

**रामे**णाऽनुमते च तद्वचसि **सुग्रीवः श्रीभूतिं** प्रेष्य **हनूमन्त**-माहूतवान् । **हनूमां**श्च **सुग्रीवा**दिपरिवृत्तं **राम**मुपगम्य नत्वा तस्थौ। **राम**श्च **सुग्रीव**वर्णितं स्वं **गव-गवाक्ष-जाम्बवदा**दिष्वात्मान-



मन्यतमं कथयन्तं **लङ्का**समुत्पाटने **रावणा**दिहनने **सीता**समानयने च विहितोत्साहं प्रशस्य **लङ्का**यां **सीता**न्वेष्यमाणमादिश्याऽभिज्ञाना-योर्मिकां दत्त्वा चूडामण्यभिज्ञानानयनाय चाऽनुशिष्याऽहं त्वद्विर-हार्त्तस्त्वां कथमपि धृतप्राणां **रावणं** हतं दर्शयिष्यामीति सन्दिष्टवान्।

**हनूमान**पि **लङ्का**तो मदागमनं यावद्भवताऽत्रैव स्थातव्यमिति **रामं** प्रार्थ्य विमानेन सपरिच्छदो **लङ्कां** प्रत्यचालीद् । ततो गच्छन् **महेन्द्र**पर्वते मातामहस्य **महेन्द्र**स्य **महेन्द्र**पुरनगरं दृष्ट्वाऽनपराध-मातृनिर्वासनं स्मृत्वा क्रुद्धो रणभेरीमवादयत् । ततश्च निर्गतेन सपुत्र**महेन्द्र**सैन्येन **हनूमत्**सैन्यस्य दारुणं युद्धमजनि । **महेन्द्र**पुत्रः **प्रसन्नकीर्तिर्हनूमता**ऽयुध्यत । ततः स्वामिकार्यविलम्बकृद् युद्धं निन्दयित्वा प्रारब्धनिर्वाहार्थं जयं मनसि ध्यात्वा रथादीन् विनाश्य **प्रसन्नकीर्तिं महेन्द्र**मपि च गृहीत्वा नत्वा चाऽऽख्यत्-'अहं ते दौहित्रोऽ**ञ्जना**सुतो **राम**कार्यार्थं यामि, किन्तु प्राक्कृतागसा योधितोऽसि, क्षमस्व, **राम**मुपगच्छ' । **महेन्द्रो**ऽपि तमाशीर्वचो-भिरभिनन्द्य **राम**मुपजगाम ।

अथाऽग्रे गच्छन् **हनूमान् दधिमुखा**द्रौ कायोत्सर्गस्थितौ महामुनी तदनतिदूर एव विद्यासाधनतत्पराश्चतस्रः कुमारिकाश्च दवसङ्कटे पतितान् दृष्ट्वा विद्यया सागरजलेन तत् शमयामास । तदैव च ताः सर्वाः तौ मुनी प्रदक्षिणीकृत्य **हनूमन्त**माहुः-'त्वया साधव उपसर्गात् साधु रक्षिताः, त्वत्साहाय्येन नः कालमप्राप्ताऽपि विद्या सिद्धा' । ततो **हनूमता** का यूयमिति पृष्टास्ताः कन्या अब्रुवन्-"**दधिमुख**पुराधीशस्य **गन्धर्व**राजस्य **कुसुममाला**कुक्षिजाः कन्या वयम् । मत्कृते व्यग्रं खेचर**मङ्गारक**मन्यं वाऽविगणय्य मुनेः **साहसगते**र्हन्ता ते जामाता भावीति विज्ञातवान् मत्पिता न तादृशं

कमपि प्राप्तवान् । अस्माभिस्तं ज्ञातुं विद्यासाधनमारब्धम् । **अङ्गारके**ण च तदसहमानेन विहित उपसर्गस्त्वया शमितः । षड्भिर्मासैः सिद्धियोग्या च विद्या त्वत्साहाय्यात् क्षणात् सिद्धा **मनोगामिनी** नाम । त्वं निष्कारणबन्धुरसि" । ततः स्वकीयं **लङ्का**-प्रवेशं **रामात्** **साहसगते**र्वधं च **हनूमत्**कथितं प्रत्याय मुदितास्ता गत्वा पितरं कथयामासुः । सोऽपि ताभिः सह द्रुतमेव सद्यो **राम**मुपाजगाम ।

**हनूमां**श्च **लङ्कां** प्राप्य **शालिकां** विद्यां दृष्ट्वा भोजनार्थं व्यात्तमुखास्तस्या मुखं गदापाणिः प्रविश्य तां विदार्य निर्ययौ । तया विद्याशक्त्या कृतं प्राकारं कर्परवद् भङ्क्त्वा तत्प्राकाररक्षं क्रुद्धं **वज्रमुखं** युद्धप्रवृत्तं सोऽवधीत् । ततः कोपाद् विद्याबलमाधाय तत्पुत्रीं **लङ्कासुन्दरीं** प्रहरन्तीमस्त्रैर्निरस्त्रां विधाय **हनूमां**स्तया कामार्त्तया दृष्ट उक्तश्च-'मया पितृवधक्रुधा मुधैव योधितोऽसि, त्वत्पितृघातकस्ते भर्त्ता भविष्यतीति मुन्युक्त्यनुसारेण वशगां मां स्वीकुरु' । ततस्तां गान्धर्वेण विवाहेन स सानुरागं स्वीकृतवान् । तया रममाणश्च तां रात्रिमतिवाह्य **हनुमाल्लङ्कासुन्दरी**मापृच्छय **लङ्कां** प्राविशत् । तत्र **विभीषण**स्य सद्म प्राप्य तेन सत्कृत आगमकारणं पृष्टश्च '**सीतां** मुञ्च, **राम**पत्नीहरणं हि विपत्तये' इत्युक्तवान् **हनूमान्** ।

पुरेत्थं बोधितोऽपि **रावणः** पुनरपि बोधयिष्यते मये'ति **विभीषणे**नोक्तश्च **देवरमणो**द्याने जगाम सः । **राम**ध्यानपरायणां विरहार्त्तां **सीतां** दृष्ट्वा तां प्रशस्य **राम**विरहं समर्थ्य **रावण**माक्रुश्य विद्यातिरोहितः **सीता**क्रोडेऽङ्गुलीयं पातयामास **हनूमान्** । तद् दृष्ट्वा च साऽत्यन्तं मुमुदे । **त्रिजटा** च तदैव विषण्णायाः



**सीतायाः** प्रमोदोद्गमं **रावणं** निवेदितवती । **रावण**श्च तां वशगामनुमाय **मन्दोदरीं** तां बोधयितुं प्रेरितवान् । **मन्दोदरी** च गत्वाऽऽवर्जयितुं **सीता**मुक्तवती-'रूपेण त्वमैश्वर्य-सौन्दर्याभ्यां च **दशग्रीवो**ऽप्रतिमौ, तद्**रावणं** भजस्व' । तच्छ्रुत्वा **सीता**ऽप्यवोचत्-'पापे ! कस्त्वद्भर्त्तुर्मुखं वीक्षेत ? **राम**स्य पार्श्वे मामिहाऽऽगतं **लक्ष्मणं** च **खरा**दीनिव सकुटुम्बं हतं **रावणं** च विद्धि । उत्तिष्ठ, अतः परं त्वया न वाच्यम्' । तयैवं तर्जिता सा **मन्दोदरी** सकोपा निजस्थानं ययौ ।

अथ **हनूमान्** प्रकटीभूय नत्वा कृताञ्जलिः **सीता**मब्रवीत्-'देवि ! दिष्ट्या **रामः सलक्ष्मणो** जयति । त्वत्प्रवृत्त्यर्थं **रामे**णा-ऽऽदिष्टोऽहमिहाऽऽगमम् । मयि तत्र गते **रामः** सपरिच्छद इहाऽऽगमिष्यति । ततः साश्रुनेत्रा **सीता** तमपृच्छत्-त्वं कोऽसि दुर्लङ्घ्यं सागरं कथं लङ्घितवानसि, मम दयितो **राम सलक्ष्मणः** प्राणिति कच्चित्, स क्वाऽऽस्ते, कथं कालं नयति ?' ततो **हनूमानु**वाच-'अहं **हनूमान्** **पवना**-ऽ**ञ्जन**योः पुत्रो विद्यया विमानेन सागरमुल्लङ्घ्येहाऽऽगतोऽस्मि । **राम**स्त्वद्वियोगार्त्तो **लक्ष्मणो**-ऽपि सौख्यशून्य एवाऽऽस्ते । **भामण्डला**द्याश्च विद्याधरास्तावुपास्ते। **सुग्रीव**दर्शितोऽहं तव प्रवृत्तिमानेतुं **रामे**ण स्वाङ्गुलीयकं समर्प्य प्रेषितोऽस्मि । त्वयाऽर्पितं चूडामण्यभिज्ञानं दृष्ट्वा मामत्राऽऽयातं प्रत्येष्यति प्रभुः' । ततो **हनूमदा**ग्रहेण **राम**प्रवृत्तिहर्षेण च सैकविंशत्यहोरात्रप्रान्ते भोजनं चकार । तथा चूडामण्यभिज्ञानं गृहीत्वेतः शीघ्रं गच्छ, अन्यथोपद्रवो भावी । अत्र त्वामागतं ज्ञात्वा राक्षसा हन्तुमागमिष्यन्तीति **हनुमन्त**मवोचच्च ।

ततो **हनूमान्** विहस्य कृताञ्जलिर्जगाद-'**राम-लक्ष्मण**योः पत्तिरहं, ममाऽग्रतो **रावणः** कः ? त्वामपि स्कन्धमारोप्य **रावणं** मथित्वा स्वामिनोऽन्तिकं नयामि' । ततो हसित्वा **सीता**ऽप्युवाच-'त्वयि सर्वं सम्भवति । किन्तु मे परपुरुषस्पर्शो न योग्यः । ततो गच्छ, यतस्त्वयि गते **रामो** युद्धोद्योगं करिष्यति' । ततो **हनूमानु**-वाच-'अहं यामि, किन्तु रक्षसां किञ्चित् स्वपराक्रमं दर्शयिष्यामि'।

तत ओम् इत्युक्त्वा **सीता** तस्य निजं चूडामणिं ददौ । सोऽपि नत्वा ततः प्रस्थाय तदेव **देवरमणो**द्यानं भङ्क्तुं प्रचक्रमे । ततो रक्ताशोकादिकं विनाशयन्तं **हनूमन्तं** हन्तुं तदुद्याने द्वारचतुष्टयारक्षा अधावन् । किन्तु **हनूमति** तेषामस्त्राणि न प्रसरन्ति स्म । **हनूमां**स्तदुद्यानवृक्षैरेव तेषां सर्वमस्त्रं सञ्जहार । तानारक्षांश्च ममन्थ । तदा तैरुद्यानारक्षसंहारं ज्ञात्वा **दशग्रीवेण** प्रेषितं सबल**मक्षकुमारं** प्रहरन्तं चिरं योधयित्वा **पावनि**स्तं पशुमिवाऽवधीत् । ततो भ्रातृवधं श्रुत्वाऽऽगतं कुपित**मिन्द्रजितं** शस्त्राशस्त्रि योधयित्वा **हनूमां**-स्तद्भटान् विनाशयामास । ततः सैन्यं निजास्त्रं च विफलं दृष्ट्वा स **रावणिर्हनूमते** नागपाशास्त्रं मुमोच । तथा हृष्टेन तेन **हनूमन्तं** दृढं बद्ध्वोप**रावण**मुपनीतवान् ।

ततो **रावणो मारुति**माह-'त्वया किमप्रियं कृतम् । **राम-लक्ष्मणौ** तु तपस्विनावाजन्म मामकीनेनाऽऽश्रितौ तुभ्यं किं दास्यतः ? तद्वाचा चेहाऽऽगतमात्रस्त्वं किं प्राणसंशयं प्राप्तोऽसि ? त्वं मम सेवकोऽपि दूतभावादवध्योऽसि, शिक्षार्थं च किञ्चिद् विडम्ब्यसे' । तच्छ्रुत्वा **हनूमानु**वाच-'न कदाऽपि तवाऽहं सेवकः, प्रत्युत मयैव सङ्कटे रक्षितोऽसि, न कोऽपि तव तादृशो यस्त्वां **लक्ष्मणा**त् त्रास्यते, दूरे **रामात्**' ।



तद्वाचा क्रुद्धो **दशानन** उवाच-'नूनं मर्तुकामोऽसि त्वं, किन्तु दूतत्वादवध्योऽसि, सम्प्रति रासभे समारोप्य पञ्चशिखो नगरे प्रतिपथं भ्राम्यसे' । तदुक्त्या क्रुद्धः **पावनि**र्नागपाशं भङ्क्त्वोत्पत्य **रावण**स्य किरीटं पदाघातेन कणशश्चूर्णयामास । हन्यतां गृह्यतामेष इति वदति **रावणे** च स पादैस्तत्पुरीं भङ्क्त्वोत्पत्य **राम**मुपेत्य चूडामणिं समार्पयत् । **रामश्च सीता**मिव तच्चूडामणिं मुहुर्मुहुर्हृदि स्पृशन्नारोपयामास । **हनूमांश्च रामेणा**ऽऽलिङ्गितः सर्वं **रावण**स्य **सीता**याश्च वृत्तान्तं शशंस ॥ ६ ॥

*इति सीताप्रवृत्त्यानयनो वर्णनात्मकः षष्ठः सर्गः ॥६॥*

## सप्तमः सर्गः

अथ स**लक्ष्मणो रामः सुग्रीवा**द्यैः परिवृतो **लङ्का**विजयाय नभसा प्रचचाल । **भामण्डल-विराध-हनूमदा**दयोऽपि कोटिशो विद्याधरेन्द्राः स्वस्वसैन्यै **रामं** परिवृत्य चेलुः । ससैन्यो गच्छंश्च **रामो वेलन्धर**पर्वते **वेलन्धरपुरं** प्राप । तत्र च **समुद्र-सेतू** द्वौ नृपौ **रामा**ग्रसैन्येनाऽयुध्येताम् । ततो **नलः समुद्रं नीलश्च सेतुं** बद्ध्वा **राम**स्याऽन्तिकमानयेताम् । **राम**श्च पुनरपि तौ निजे राज्ये स्थापयामास । ततः **समुद्र**स्तिस्रो निजकन्यका **लक्ष्मणा**य ददौ । तत्र निशामतिवाह्य **रामः सेतु-समुद्रा**नुसृतः प्रातः **सुवेला**द्रिं प्राप्य तत्र **सुवेलं** नाम नृपं जित्वा निशामुवास । प्रातः पुनः प्रस्थाय **लङ्का**समीपे **हंसद्वीपे हंसरथं** नृपं जित्वा तत्रैव कृतनिवासस्तस्थौ । **लङ्का** च **रामे** समीपस्थेऽनिष्टशङ्कया विक्षोभं प्राप । **हस्त-प्रहस्ता**दयो **रावण**स्य सहस्रशः सामन्ता युद्धाय संनह्यन्ति स्म । **रावण**श्च दारुणानि रणवाद्यानि कोटिशः किङ्करैर्वादयामास ।

ततो **विभीषणो रावणं** समुपेत्य नत्वा जगाद-'क्षणं प्रसीद, मम वचो विचारय, पुरा परदारापहारेण लोकद्वयविरोधिना कुलं कलङ्कितम् । तदद्य निजभार्यां मोचयितुं **रामः** समुपस्थितः । तदातिथ्याय **सीतां** समर्पय । **रामो** हि **सीतां** ग्रहिष्यत्येव । रक्षःकुलं चाऽशेषं त्वया सह निग्रहीष्यति । तत्पत्ति**र्हनूमान्**



दृष्टपराक्रमस्त्वया । **सीता**निमित्तं लोकोत्कृष्टां श्रियं मा परिहार्षीः' । तत **इन्द्रजि**दुवाच-'त्वमाजन्मभीरुः, इन्द्रस्याऽपि विजेतारं तातमेवं सम्भावयन् नूनं मुमूर्षुस्त्वम् । पुराऽपि त्वया **दशरथ**वधं प्रतिज्ञाय तदप्रतिपाल्य तातस्त्वया छलितः । इहाऽऽगतं **रामं** च भयमुत्पाद्य तातात् रक्षितुमिच्छसि, तन्मन्ये त्वं **राम**पक्षेऽसि । ततस्त्वं न मन्त्रयोग्यः' ।

तच्छ्रुत्वा **विभीषणः** पुनरुवाच-'नाऽहं शत्रुपक्षे, त्वमेव पुत्ररूपेण कुलनाशनः शत्रुरुत्पन्नः । पिता तवैश्वर्य-कामान्धः, त्वं च जन्मान्ध इव न किमपि वेत्सि । नृप ! अनेन पुत्रेण निजेन चरित्रेण चाऽचिरादेव विनङ्क्ष्यसि, त्वत्कृते मुधैव शोचामि' । तेन चाऽधिकं क्रुद्धो **रावणः** खड्गमाकृष्य **विभीषण**वधायोदस्थात् । **विभीषणो**ऽपि क्रुधा दीर्घं स्तम्भमुत्पाटय योद्धुमुत्तस्थौ । **कुम्भकर्ण इन्द्रजि**च्च मध्ये पतित्वा तौ युद्धाद् निवार्य द्विपौ गजशालामिव स्वं स्थानं नीतवान् ।

अथ **रावणे**नाऽग्निवदाश्रयनाश इति मत्पुर्या निर्याहीति निर्भर्त्सितो **विभीषण** उप**राम**मगात् । रक्षो-विद्याधराणां त्रिंशदक्षौहिण्यश्चाऽपि **लङ्केशं** विहाय **विभीषण**मनुजग्मुः । ततस्तमागच्छन्तं दृष्ट्वा **सुग्रीवा**द्याः क्षोभमुपाययुः । **विभीषणो**ऽपि दूतं प्रेष्य **रामा**य स्वमजिज्ञपत् । **राम**श्च **सुग्रीव**मुखं प्रैक्षत । ततः **सुग्रीव** उवाच-'यद्यप्येते आजन्म च्छलिनः, तथाऽप्यसाविहाऽऽयातु, परैरस्य शुभा-ऽशुभं भावं ज्ञास्यामि' ।

ततस्तदभिज्ञो **विशालो** नाम खेचर उवाच-'**विभीषणो** राक्षसेष्वेको महात्मा धार्मिकश्च । **सीता**र्पणायोपदिशन्नयं भ्रात्रा

निर्वासितस्त्वां शरणमागात्' । तच्छ्रुत्वा **रामो** द्वारपालेन **विभीषणं** प्रवेश्य प्रणमन्तं च ससम्भ्रमं परिषष्वजे। ततो **विभीषण** उवाच– 'दुर्नयं भ्रातरं त्यक्त्वा त्वामुपस्थितोऽस्मि, **सुग्रीव**वद् मां भक्तं विद्धि' । ततो **राम**स्तस्मै **लङ्का**राज्यं प्रतिपन्नवान् । **हंसद्वीपे** च दिनान्यष्टावतिवाह्य सैन्यैः परिवृतो **रामो लङ्कां** प्रति चचाल । तथा सेनया विंशतिं योजनानि पृथिव्या रुद्ध्वा सज्जोऽवतस्थे **रामः** ।

ततो **राम**सेना कलकलेन **रावण**सेनान्यो **हस्त-प्रहस्ता**द्याः सन्नह्य **रावणं** परिवव्रुः । ततो **रत्नश्रवसः** प्रथमः पुत्रो **भानुकर्णः** सन्नह्य रथमारुह्योपेत्य **रावण**स्य पारिपार्श्विकोऽभवत् । **इन्द्रजिद्-मेघवाहनौ** च **दशग्रीव**स्य द्वयोः पार्श्वयोस्तस्थतुः । अन्येऽपि पुत्राः कोटिशः सामन्ताः **शुक-मारीच-सुन्दा**दयोऽभ्ययुः । **रावण**श्च युद्धचतुरैरक्षौहिणीनामसङ्ख्यैः सहस्रैर्दिशः प्रच्छादयन् पुर्याः प्रचचाल । नानाशस्त्रप्रहरणाश्च **रावण**भटा विपक्षवीरान् नामग्राहं मुहुर्मुहुः पृच्छन्तो रणाय विचेरुः । ततो **रावणो** रणाय पञ्चाशद् योजनान्याच्छाद्य तस्थौ । तत्र च स्वनायकान् प्रशंसन्तः परनायकान् निन्दन्तो मिथो नाम कथयन्तोऽस्त्राण्यस्त्रैर्वादयन्तो द्वयोः सैन्याः कांस्यतालवद् मिमिलुः । ततो द्वयोः सैन्ययोः शस्त्राशस्त्रि दारुणे युद्धे प्रवृत्ते वानरै राक्षससैन्यमभञ्जि ।

ततो योद्धुमुद्यतौ **हस्त-प्रहस्तौ नल-नीला**भ्यां युयुधाते । **हस्तो नल**श्च प्रथमतो युध्यमानौ बाणान् ववृषतुः । तत्र **नलो हस्तं नील**श्च **प्रहस्त**मवधीत् । ततो **नल-नील**योरुपरिष्टाद् नभसः पुष्पवृष्टिर्बभूव । ततः क्रुधा **मारीचाद्याः** कपिभिरयुध्यन्त । परस्परं प्रहरत्सु च तेषु रविरस्तं ययौ । ततो द्वयोरपि सैन्यानि युद्धाद् निवृत्त्य स्वान् हतानहतांश्चाऽन्वेषयन्तोऽस्थुः । प्रातश्च पुनरपि



राक्षसभटा **राम**सैन्यैर्योद्धुमुपस्थिताः । **रावण**श्च मध्येसैन्यं गजरथमारुह्याऽरीन् तृणाय मन्यमानो रणभूमिमगात् । **राम**सैन्यानि च नभसि देवैर्दृश्यमानानि रणाय समाजग्मुः ।

अथ **रावण**हुङ्कारप्रेरितै रक्षःसैन्यैः कपिसैन्यानि बभञ्जिरे। तेन च क्रुद्धः **सुग्रीवो** धनुरादायाऽधिज्यं विधाय प्रबलैः सैन्यैर्महीं कम्पयन् चचाल । ततो मम विक्रमं पश्य, त्वमिहैव तिष्ठेति **सुग्रीवं** निषिध्य **हनूमान्** प्रस्थाय राक्षससैन्यं **मन्दराद्रिः** सागरमिवाऽमथ्नात् । ततो मेघवद् गर्जन् **माली हनूमते**ऽधावत् । द्वावपि मिथोऽस्त्राणि प्रहरन्तौ चिच्छेदाते । चिरं युद्ध्वा च **हनूमान् मालिनं** निरस्त्रं चक्रे । ततो **वज्रोदरः** समेत्य **हनूमन्त**मवोचत्–'एहि, मया युध्यस्व, मा स्म गाः' । तद्वचः श्रुत्वा क्रुद्धो **हनूमान्** सिंहनादं विधाय शरैस्तं छादयामास । देवेषु प्रशंसत्सु च **हनूमान्** युगपदस्त्राणि मुञ्चन् **वज्रोदर**मवधीत् । तेन च क्रुद्धो **रावण**पुत्रो **जम्बुमाली** युद्धाय **हनूमन्तं** डुढौके । क्रुद्धश्च **हनूमां**स्तं विरथं कृत्वा गुरुतरेण मुद्गरेण ताडयामास । **जम्बुमाली** च तेन प्रहारेण मूर्च्छितो भुवि पपात । ततो रोषाद् **महोदरो**ऽन्ये च राक्षसभटाः जिघांसवो **हनूमन्तं** शूकरं श्वान इव वेष्टयामासुः । तैर्भुजादिषु हन्यमानश्च **हनूमान्** क्षणादेव सूर्यस्तमांसीव तानभाङ्क्षीत् ।

ततः क्रुद्धः **कुम्भकर्णः** शूलमादाय कपीनमथ्नात् । तं च दृष्ट्वा **सुग्रीव-भामण्डला**द्या धावित्वा सिंहं व्याधा इव रुद्ध्वाऽस्त्राण्यमुञ्चन् । ततो मुनिवाक्यवदमोघं **स्वापनास्त्रं कुम्भकर्ण**स्तेष्वमुञ्चत् । **सुग्रीव**श्च स्वं सैन्यं निद्रायमाणं दृष्ट्वा **प्रबोधिनीं** महाविद्यां सस्मार । वानरभटाश्चोत्थाय **सुग्रीवा**धिष्ठिताः **कुम्भकर्ण**मुपाद्रवन् । **सुग्रीव**श्च गदया **कुम्भकर्ण**स्य रथं सारथिं वाहनानि च

दलयामास । ततो भूमिष्ठः **कुम्भकर्णो** हस्तेन मुद्गरमुद्यम्य **सुग्रीवा**याऽधावत । तस्याऽङ्गवातेन च कतिपये कपयः पेतुः । कपिभिरनिरुद्धः स **सुग्रीव**रथं मुद्गरेण चूर्णयामास । **सुग्रीव**श्च नभस्युत्पत्त्य महीयसीमेकां शिलां वज्री वज्रमिव **कुम्भकर्णा**य मुमोच । **कुम्भकर्ण**श्च मुद्गरेण तां शिलां चूर्णयामास । ततः **सुग्रीवो रावणा**नुजाय दण्डास्त्रं मुमोच । तेन ताडितश्च **कुम्भकर्ण** उर्व्यां पपात ।

भ्रातरि मूर्च्छिते च **रावणो**ऽत्यन्तं क्रुद्धः साक्षादन्तक इव स्वयमचालीत् । तत **इन्द्रजिद् रावणं** निषिध्य कपीन् निघ्नन् कपिसैन्यं प्रविवेश । तं च रणाय निमन्त्रयन्तं **सुग्रीवो मेघवाह**नं च **भामण्डलः** शरभः शरभमिवाऽऽयोधयितुमारेभाते । ते चत्वारश्च दिग्गजा इव गतागतैर्वसुन्धरां कम्पयन्तो बाणान् ववृषुः । तत **इन्द्रजिद्-मेघवाहनौ सुग्रीव-भामण्डलयो**र्नागपाशं मुमुचतुः । ततो नागपाशबद्धौ तौ निःश्वसितुमप्यशक्तावभूताम् ।

इतश्च लब्धसंज्ञेन **कुम्भकर्णे**न रोषाद् गदया ताडितः **पावनि**र्मूर्च्छितो भुवि न्यपतत् । तं च दोष्णाऽऽदाय **कुम्भकर्णो**ऽन्तःकक्षं न्यधत्त । ततो **विभीषणो राम**मुवाच-'तव सैन्ये सारभूतौ **भामण्डल-सुग्रीवौ रावण**पुत्राभ्यां बद्धौ यावद् न **लङ्कां** नीयेते, तावत् तावहं मोचयामि । तथा **कुम्भकर्णे**न दोष्णा बद्धो **हनूमान् लङ्का**मप्राप्त एव मोचनीयः । तान् विना नः सैन्यमवीरमिवेत्यनुजानीहि' । तस्मिन्नेवं वदत्येवाऽ**ङ्गदो** वेगाद् गत्वाऽऽक्षिप्य **कुम्भकर्णे**न युयुधे । क्रोधादुत्क्षिप्तबाहौ **कुम्भकर्णे हनूमान्** पञ्जरात् खग इवोत्पत्य ययौ । **विभीषण**श्च रथस्थो **भामण्डल-सुग्रीवौ** मोचयितुं **रावण**पुत्राभ्यां युयुधे । ततस्तौ **रावण**पुत्रौ



दध्यतुः-'एष पितृव्योऽस्माभिर्युद्धाय स्वयमभ्येति, तातकल्पेन तेन सह युद्धमनुचितमितीतोऽपसरामि । इमौ च शत्रू पाशबद्धौ नूनं मरिष्यत इतीहैवाऽऽसातां, यथा नो तातो नाऽन्वेति', एवं विचिन्त्य नेशतुः।

**विभीषण**श्च **भामण्डल-कपीश्वरौ** दृष्ट्वा तत्रैवाऽस्थात् । **राम-लक्ष्मणौ** च सचिन्तौ तस्थतुः । ततो **रामो गरुडे**शं पूर्वप्रतिपन्नवरं **महालोचनं** देवमस्मार्षीत् । स चाऽवधिना ज्ञात्वाऽभ्येत्य **रामाय सिंहनिनादा**ख्यां विद्यां मुसलं हलं रथं **लक्ष्मणा**य च **गारुडीं** विद्यां रथं विद्युद्वदनां गदां वारुणादीनि दिव्यान्यस्त्राण्युभयोश्छत्रे च ददौ । **लक्ष्मण**वाहनीभूतं गरुडं दृष्ट्वा च **सुग्रीव-भामण्डल**योः पाशनागास्तत्क्षणं प्रणेशुः । **राम**सैन्ये च सर्वतो जयजयारावो जज्ञे। रविश्चाऽस्तमुपेयाय ।

प्रातश्च **राम-रावण**सैन्यानि समराङ्गणं समीयुः । तेषां च शस्त्रास्त्रादिभिर्महारणः प्रावर्तत । तत्र च रक्षोबलैर्वानरबलमभञ्जि। तद् दृष्ट्वा च **सुग्रीवा**द्या राक्षससैन्येषु प्रविविशुः । तैश्चाऽऽक्रान्ता राक्षसा गरुडैर्नागा इव पलायामासुः । तेन क्रुद्धो **रावणो** रथस्थः स्वयं दधावे । तस्य च गच्छतोऽग्रे कोऽपि कपिवीरः स्थातुं न शशाक । तद्युद्धे प्रस्थितं **रामं विभीषणो** निषिध्य क्षणादेवैत्य **दशग्रीवं** रुरोध । तं दृष्ट्वा **रावण** उवाच-'त्वय्यद्याऽपि मम स्नेहः, तद् गच्छ, अद्य ससैन्यौ **राम-लक्ष्मणा**वेव हनिष्यामि । मया दत्ताभयस्त्वं समुपेत्य स्वस्थान एव तिष्ठ' ।

ततो **विभीषण** उवाच-'त्वां प्रत्यन्तक इव स्वयं चलितो **रामो** मया छलाद् निषिद्धः, अहं च त्वां बोधयितुकामो

युद्धव्याजादिहाऽऽगतः । अधुनाऽपि **सीतां** समर्पय, प्रसीद, मद्वचः कुरु । अहं मृत्युभयाद् राज्यलोभाद् वा न, किन्त्वपवादभयादेव **राम**मुपगतोऽस्मि । तत्**सीता**मर्पय, यथा पुनरेवाऽहं त्वां श्रयामि' । ततः क्रुद्धो **दशकन्धर**स्तं कटुवाक्यैर्निर्भर्त्स्य धनुरास्फालयामास । **विभीषणो**ऽपि प्रत्युक्त्वा स्वं धनुरास्फालयामास । ततो विविधान्यस्त्राणि वर्षन्तौ तौ मिथो युयुधाते । **इन्द्रजित्-कुम्भकर्णा**द्याश्चाऽपि स्वामिभक्त्याऽधावन्त ।

ततो **रामः कुम्भकर्णं लक्ष्मण इन्द्रजित**मपरे चाऽपरान् रुद्ध्वा सागरे नक्रैर्नक्रा इवाऽयुध्यन्त । एवमतिदारुणे युद्धे प्रवर्त्तमाने **इन्द्रजिल्लक्ष्मणा**य तामसास्त्रममुञ्चत् । तच्च **लक्ष्मण**स्तपनास्त्रेण वारयामास । ततो **लक्ष्मणो** नागपाशास्त्रं मुक्त्वा **इन्द्रजित**मबध्नात् । तेन चाऽऽक्रान्तसर्वाङ्गः स भूमौ निपपात । **विराधश्च लक्ष्मणा**ज्ञया तं स्वरथे निक्षिप्य स्वशिबिरमनैषीत् । **रामे**ण नागपाशास्त्रेण बद्धं **कुम्भकर्णं** च **भामण्डलो रामा**ज्ञया शिबिरमनैषीत् । अन्येऽपि **मेघवाहना**दयो **रामस्य** सैनिकैर्बद्धा निजे शिबिरे निन्यिरे । तद् दृष्ट्वा च क्रोध-शोकाभ्यामाक्रान्तो **रावणो विभीषणा**य शूलं मुमोच । तच्च **लक्ष्मणो** मध्य एव बाणैः कणशश्चकार । ततो विजयार्थी **रावणो धरणेन्द्र**प्रदत्ताम**मोघविजया**ख्यां महाशक्तिं सर्वजगद्भयावहां समुद्दध्रे।

ततो **रामो लक्ष्मण**मुवाच-'अस्माकमतिथिरेष **विभीषणो** हन्यते, आश्रितघातिनो नो धिक्' । तच्छ्रुत्वा च **लक्ष्मणो विभीषणा**ग्रे गत्वा स्थित्वा **रावण**माक्षिपत् । तं गरुडस्थं दृष्ट्वा **रावण** उवाच-'तुभ्यं शक्तिर्नोक्षिप्ता, मा मृथाः, अथवा म्रियस्व, यतस्त्वमेव मे हन्तव्यः' इत्युक्त्वा तां भ्रमयित्वा **लक्ष्मणा**य मुमोच । तां चाऽऽपतन्तीं **लक्ष्मणा**द्याः स्वैः स्वैरस्त्रैर्निवारयामासुः । किन्तु सा शक्तिरस्त्राणि तान्यविगणय्य **लक्ष्मणो**रःस्थले पपात । तया विभिन्नश्च **सौमित्रि**र्भूमौ पपात । कपिसैन्ये च महान् हाहारवो जज्ञे । तेन चाऽतिक्रुद्धो **रामो रावणं** जिघत्सुरिवाऽऽयोधयितुमारेभे। क्षणाच्च स तं **रावणं** विरथं चकार । **रावण**श्च रथान्तरमारुरोह । एवं **रामो रावणं** पञ्च वारान् विरथी चकार । **रावण**श्च हृद्यचिन्तयत्-भ्रातृस्नेहादयं स्वयं मरिष्यति, तद्युद्धेनाऽलम् । एवं विचार्य स द्रुतं **लङ्का**पुरीं जगाम । रविश्चाऽस्तमुपेयाय ।



❁ ❁ ❁

ततो **रावणे** गते **रामो लक्ष्मण**मुपेत्य तं भुवि पतितं दृष्ट्वा मूर्च्छितः **सुग्रीवा**दिकृतशीतोपचारेण लब्धसंज्ञो रुदन् बहु विललाप। क्रोधाद् **रावणं** प्रति धावमानश्च विनयात् **सुग्रीवा**द्यैः **'रावणो लङ्कां** गतो **लक्ष्मण**श्च विह्वल इति धैर्यमाधेहि, **लक्ष्मण**स्य संज्ञोपायं चिन्तये'ति प्रतिबोधितोऽपि भूयोऽपि विललाप । ततो **विभीषण** उवाच-'स्वामिन् ! अधैर्येणाऽलम्, अनया शक्त्या हतोऽपि नरो रात्रिं यावज्जीवति, तन्मन्त्र-तन्त्रादिना घातप्रतीकाराय यतनीयम्' । ततो **रामे**ण तथास्त्वित्युक्ते **सुग्रीवा**द्या विद्यया सप्तप्राकारान् चतुर्द्वारान् **राम-लक्ष्मण**योः परितो विचक्रुः । तत्र पूर्वद्वारे **सुग्रीवा**द्या, उदीच्या**मङ्गदा**द्याः, प्रतीच्यां **नीला**द्या, दक्षिणस्यां च **भामण्डला**द्या अस्थुः । एवं **राम-लक्ष्मणौ** मध्ये कृत्वा **सुग्रीवा**द्याः प्रजागर-परास्तस्थुः ।

कश्चिच्च **सीतायाः लक्ष्मण**स्य विपत्तिं प्रातः **रामस्य** च भ्रातृसौहृदाद् मरणमाचख्यौ । तेन च वज्रेणेव हता सा भूमौ मूर्च्छिता

पपात । विद्याधरीभिः कृतशीतोपचारा च लब्धसंज्ञोत्थाय करुणस्वरं मुहुर्मुहुर्विललाप । तां करुणं रुदतीं च काऽपि दयावती विद्याधर्या-ऽऽ**लोकिन्या** विद्ययाऽवलोक्योवाच-'देवि ! तव देवरः प्रभाते स्वस्थो भविष्यति, **रामे**ण सममेत्य च त्वामानन्दयिष्यति' । तद्वचसा स्वस्था च सा सूर्योदयं ध्यायन्ती जाग्रती तस्थौ । इतश्च **रावणो**ऽपि **लक्ष्मणो** हत इति जहर्ष । भ्रातृ-पुत्रादिबन्धं स्मृत्वा च भृशं रुरोद मुमूर्च्छ च ।

इतश्च **राम**सैन्ये प्राग्द्वाररक्षकं **भामण्डल**मुपेत्य कोऽपि विद्या-धरोऽब्रवीत्-'**रामं** दर्शय', **लक्ष्मण**जीवनौषधं कथयिष्यामि, युष्माकं हितोऽस्मि' । ततो **भामण्डले**न पाणिना बाहौ धृत्वा नीतो **रामं** नत्वाऽब्रवीत्-अहं **सङ्गीत**पुरेशस्य **शशिमण्डल**नृपस्य **सुप्रभाकु**-क्षिजः पुत्रः क्रीडार्थं सकलत्रश्चलितो नभसि **सहस्रविजय**नाम्ना विद्याधरेण दृष्टः । तेन कामविरोधाद् योधितशक्त्याऽऽहत्य भूतले पातितः **साकेत**पुर्यां **माहेन्द्रोदयो**द्याने भुवि लुठन् त्वद्भ्रात्रा-ऽतिकृपालुना **भरते**न दृष्टोऽहम् । गन्धाम्बुसेकाच्छक्त्या त्रातः सद्यो रूढव्रणो विस्मितो गन्धाम्बुमाहात्म्यमपृच्छम् ।

ततो **भरत** उवाच-'**विन्ध्य**नामा सार्थवाहो गजपुरादिहा-ऽऽगात् । तस्य चैको महिषो मार्गे भारत्रुटितोऽपतत् । नागरजनश्च तच्छिरसि पादं न्यस्य गतागतं चकार। तदुपद्रवेण स महिषो विपन्नोऽकामनिर्जरायोगात् **श्वेतङ्कर**पुरेशो नाम्ना **पवनपुत्रो** वायुकुमारः सुरोऽभूत् । स चाऽवधिना पूर्वं मृत्युं ज्ञात्वा क्रुद्धोऽस्मिन् पुरे जनपदे च नानाविधान् व्याधीन् व्यधत्त । किन्तु मन्मातुलस्य **द्रोणमेघ**नृ-पस्य गृहे देशे च व्याधिर्नाऽभूत् । तत्कारणं मया पृष्टश्च **द्रोणमेघो**ऽवदत्-'मम भार्या **प्रियङ्करा** पुराऽतिव्याधिपीडिताऽभूत्।



जाते गर्भे च सा तत्प्रभावाद् व्याधिमुक्ता **विशल्यां** नाम पुत्रीं सुषुवे । **विशल्या**स्नानजलेन च सिक्तो लोको निर्व्याधिरभूत् ।

एकदा च मया पृष्टः **सत्यभूतिशरणो** मुनिर्दिशति स्म यद्-'**विशल्या**याः पूर्वजन्मसुकृतफलमेतद् यदस्याः स्नानजलेन जनानां क्षतसंरोपणं शल्योपशमो व्याधिविनाशश्च । तथाऽस्या भर्त्ता **लक्ष्मणो** भावी । ततश्च तेन मुनिवचसा सम्यग्ज्ञानादनुभवाच्च **विशल्या** स्नानजलस्य प्रभावो मया निश्चितः' । एवमुक्त्वा **द्रोणमेघो** **विशल्या**स्नानजलं ममाऽऽर्पयद् येन मन्मही निर्व्याधिरभूत्। तत्स्नानजलेन मया सिक्तस्त्वमपि क्षणादेव सर्वपीडारहितोऽभूः । एवं **भरत**स्य मम विश्वासो जातः । तद् यावद् नोदेति भास्करस्तावदेव तज्जलमानीयताम्' ।

ततो **रामो** **भामण्डला**दीन् तज्जलानयनाय **भरतं** प्रति प्रेषितवान् । ते च विमानेन त्वरित**मयोध्यां** प्राप्य प्रासादे **भरतं** सुप्तं ददृशुः । ततो गीतेन तं प्रबोध्य तेन पृष्टाः सर्वं वृत्तमाख्यातवन्तस्ते । स च मया तत्र गतेनैतत्कार्यं सेत्स्यतीति तद्विमानमेवाऽधिरुह्य **कौतुकमङ्गलं** पुरं प्राप्य **द्रोणघनं** **विशल्यां** याचितवान् । स च **विशल्या**मुद्वाह्य स्त्रीसहस्रसहितामदत्त । **भामण्डल**श्च **भरतमयोध्या**यां मुक्त्वा सपरिवारो **विशल्या** सहितः समेत्य **विशल्यां** **लक्ष्मणा**न्तिकं मुमोच । तस्याश्च पाणिस्पर्शमाप्य **लक्ष्मणा**त् सहसा महाशक्तिर्निर्गता समुत्पन्ती श्येनेन वर्तिकेव **हनूमता** गृहीतोचे-'अहं **प्रज्ञप्ति**भगिनी **धरणे**न **रावणा**य प्रदत्ता प्रेष्यत्वमापन्नाऽस्मि, मां मुञ्च, न मे दोषः । **विशल्या**तपस्तेजः सोढुमशक्ता यास्यामि' ।

ततो **हनूमता** मुक्ता साऽन्तर्दधे । तथा **विशल्या** पुनरपि **लक्ष्मणं** पाणिना पस्पर्श, गोशीर्षचन्दनेन विलिलेप च । ततो रूढव्रणो **लक्ष्मण**स्तत्क्षणं प्रबुद्धो मुदितेन **रामे**णाऽऽलिङ्गितः । तथा **रामो** **विशल्या**वृत्तान्तं **लक्ष्मणा**य शशंस । तत्स्नानवारिणा च स्वान् परांश्च सिक्तवान् । **रामा**ज्ञया **लक्ष्मण**श्च कन्यासहस्रसहितां **विशल्यां** तदानीमेव परिणीतवान् । तथा विद्याधरेश्वरैः सोत्साहं महोत्सवश्चक्रे ।

❋ ❋ ❋

अथ **लक्ष्मणो** जीवित इति चरैर्विज्ञाय **रावणो** मन्त्रि-भिर्मन्त्रयाञ्चक्रे-'दैववैपरीत्याल्**लक्ष्मणो** जीवितो मम मनोरथश्च सर्वो विलुप्तः । तदधुना **कुम्भकर्णा**दयाः कथं मोचयितव्याः' । ततो मन्त्रिण ऊचुः-'**सीता**र्पणं विना **कुम्भकर्णा**दीनां मोक्षो-ऽसम्भवः, प्रत्युताऽनिष्टमेव भावि' । **रावण**श्च तानगणयित्वा **सामन्तं** दूतमनुशिष्योप**रामं** प्रेषितवान् । स च गत्वा द्वारस्थो नत्वा **सुग्रीवा**दिपरिवृतं **राघव**मुवाच-'**रावणो** निवेदयति यद् मद्बन्धुवर्गं मुञ्च, **सीतां** त्यज, मम राज्यार्धं च गृहाण, अन्यानि त्रीणि कन्यासहस्राणि च गृहाण, तावता तोषमेहि । अन्यथा जीवितेन सह सर्वमेव गमयिष्यसि' ।

ततो **राघवो**ऽब्रवीत्-'अर्थेन परस्त्रीभिश्च न मे प्रयोजनं, यदि **रावणः** सत्कृत्य **वैदेहीं** प्रेषयति, तदैव तद्बन्धुवर्गं मोक्ष्यामि, नाऽन्यथा' । ततः **सामन्तः** पुनरुवाच-'नैतत् तवोचितं, स्त्रीमात्रकृते सर्वविनाशो मूर्खतैव । एकवारं जीवितोऽपि **लक्ष्मणो**ऽन्ये त्वं च कथं जीविष्यसि ? एकोऽपि **दशग्रीवो** विश्वमपि हन्तुमीश्वरः । तदायतिं विचार्य **रावण**वचो मान्यम्' । ततः क्रुद्धो **लक्ष्मण** उवाच-'युद्धाय **रावणं** सन्नद्धं कुरु, एको **रावणः** किं करिष्यति ? तं हन्तुं मम भुजः कृतान्त इवोद्यतोऽस्ति' । **लक्ष्मणे**नैवं निर्भर्त्सितो



गदितुमनाः स दूतो वानरैर्गलहस्तेन निर्वासितो गत्वा **रावणा**य सर्वं वृत्तान्तं निवेदितवान् ।

अथ **रावणो** मन्त्रिणोऽपृच्छत्-'अधुना किं कार्यं तद् ब्रूत' । ततो मन्त्रिण ऊचुः-'**सीता**र्पणमेवोचितं, तथैव बन्धवो मुक्ताः स्युः' । तद्वचसा मर्माहतो **दशग्रीव**श्चिरं विचार्य **बहुरूपा**या विद्यायाः साधनं हृदि निधाय **शान्तिजिन**चैत्यं ययौ । तत्र स उपशान्तकषायः शान्तिस्नात्रं यथाविधि विधाय भक्त्या स्तुत्वा रत्नशिलास्थितोऽक्षमालां धारयंस्तां विद्यां साधयितुमारेभे ।

इतश्च **मन्दोदरी यमदण्डं** द्वारपालं समादिशत्-'सर्वोऽपि नागरोऽष्टाहानि जिनधर्मरतोऽस्तु । आज्ञाविराधको वध्यः स्यादिति **लङ्का**यां पटहघोषणां कुरु' । द्वारपालश्च तदादेशं प्रतिपालितवान् । **सुग्रीव**श्च चारैस्तज्ज्ञात्वा 'यावदेष विद्यां न साधयति, तावदेव हन्तव्य' इति **राम**मब्रवीत् । ततो ध्यानपरायणो **रावणो** निश्छलेन मया कथं निग्रहीतव्य इति **राम**वचः श्रुत्वाऽ**ङ्गदा**दयो गुप्तमेव गत्वा विविधानुपसर्गान् व्यधुः । किन्तु **रावणो** मनागपि ध्यानाद् ना-ऽचालीत् । ततोऽ**ङ्गदः**-'त्वया परोक्षे **सीता**ऽपहृता,किन्त्वहं तव पश्यत एव **मन्दोदरीं** हरामी'त्युक्त्वा रुदतीं **मन्दोदरीं** कचैर्गृही-त्वाऽकर्षत् । **रावण**स्तदपि न गणयामास । तदैव च **बहुरूपिणी** विद्या प्रादुर्भूय-'तव वशेऽस्मि, किं करवाणीति ब्रूहि, **राघवौ** कियन्मात्रौ' इत्यवोचत् । ततो **रावण** उवाच-'तव सर्वं साध्यं, सम्प्रति स्वं स्थानं गच्छ, स्मृता काले समागच्छेः' । एवं **रावणे**न विसृष्टा सा तिरोभूता । वानराश्च निजं शिबिरं जग्मुः ।

अथ **रावणो मन्दोदर्यङ्गद**वृत्तान्तं विज्ञाय क्रुद्धः स्नात्वा भुक्त्वा च **देवरमणं** वनं प्राप्य **सीता**मवोचत्-'मया चिरमनुनयः कृतः । अधुना त्वत्पति-देवरौ हत्वा त्वां बलाद् रमयिष्ये' ।

तच्छ्रुत्वा च मूर्च्छिता **सीता** भूमौ निपपात । कथञ्चित् संज्ञां लब्ध्वा च '**राम-लक्ष्मण**योर्मृत्युश्चेद् ममाऽनशनमस्त्वि'त्यभिग्रहमग्रहीत् । तच्छ्रुत्वा **रावण**श्चिन्तयामास-'अस्या **रामे** स्वाभाविकः स्नेहः । तन्मयाऽद्य यावद् न युक्तं कृतम् । अद्य चेदिमां मुञ्चामि तदा **राम**-भीतेन **रावणे**न **सीता** मुक्तेत्यपयशो मे भवेत् । ततो **राम-लक्ष्मणौ** बद्ध्वेहाऽऽनीयैनामर्पयिष्यामि । तदेतद् धर्म्यं यशस्यं च स्यात्' । एवं विचार्य स तां रात्रिमतिवाह्याऽशकुनान्यगणयन् युद्धार्थं चचाल ।

ततो द्वयोः सैन्ययोर्घोरे युद्धे प्रवृत्ते **लक्ष्मणो** राक्षसान् विधूय बाणै **रावणं** विव्याध । **रावण**श्च तत्पराक्रमं दृष्ट्वा साशङ्को **बहुरूपां** विद्यां स्मृत्वा स्वानि रूपाण्यनेकधा भयङ्कराणि विचक्रे । **लक्ष्मण**श्च सर्वतो **रावणा**नेव दृष्ट्वा स्मृतिमात्रेणोपस्थितै**र्नारायण**-शरैस्तान् जघान । **दशकन्धर**श्च तैस्ताडितोऽर्धचक्रित्वलिङ्गं चक्रं स्मृत्वा तद् नभसि भ्रमयित्वा **लक्ष्मणा**य मुमोच । तच्चक्रं च प्रदक्षिणीकृत्य **लक्ष्मण**स्य दक्षिणपाणाववतस्थे ।

ततो विषण्णो **दशग्रीवो** दध्यौ-'मुनेर्वचः सत्यं जातम् । **विभीषणा**दीनां च निर्णय उचित इति जाने । **विभीषण**श्च तं तादृशं प्रेक्ष्याऽद्याऽपि **सीतां** मुञ्चेति बोधयामास । ततः क्रुद्धो **रावणो**-ऽवोचत्-'किं रे ! चक्रमेव मेऽस्त्रम् ? मुष्टिनाऽपि सचक्रमेनं द्विषं हनिष्यामि' । तदैव च **लक्ष्मण**स्तेनैव चक्रेण कूष्माण्डवद् **रावण**स्य वक्षो विदारयामास । तदा च ज्येष्ठकृष्णैकादश्यामपराह्णे मृतो **रावण**श्चतुर्थं नरकं ययौ । दिवि च देवैर्जयजयारावपूर्वकं पुष्पवृष्टिर्विदधे । कपयश्च प्रमुदितास्ताण्डवं चक्रुः ॥ ७ ॥

*इति रावणवधवर्णनात्मकः सप्तमः सर्गः ॥७॥*

## अष्टमः सर्गः

अथ **विभीषणो** भयात् पलायितान् राक्षसान् ज्ञातिस्नेहादेव-माश्वासयन्नाह-एतौ **राम-लक्ष्मणा**वष्टमौ बलभद्र-वासुदेवौ शरणं निःशङ्कं भजध्वम्' । ततस्ते तौ भेजुः । तौ च तेषु प्रसादं चक्रतुः। **विभीषण**श्च भ्रातरं हतं दृष्ट्वा शोकसन्तप्तो मरणेच्छया निजां छुरिकां चकर्ष । भ्रातर्भ्रातरिति करुणं क्रन्दन्तं स्वकुक्षिचुम्बितच्छुरिकं तं **रामो** दध्रे । तथा **मन्दोदर्या**दिभिः सह **रावण**समीपे रुदन्तं तं **सलक्ष्मणो रामो** बोधयन्नाह-'**रावण** ईदृशपराक्रमो न शोच्यः, तेन सह समरे देवा अपि नाऽलम् । वीरमृत्युं गतोऽसौ सुकीर्तिपात्रमेव। तदस्यौर्ध्वदेहिकं समाचरत, रुदितैः कृतम्' । एवं तान् प्रबोध्य स **रामो** बद्धान् **कुम्भकर्णा**दीन् मोचितवान् । ततो **विभीषणा**दयः साश्रुनेत्राः सम्भूय **दशकन्धरा**ङ्गाग्निसंस्कारं व्यधुः । ततो **रामः सलक्ष्मणः कुम्भकर्णा**दीनाह-'वीराः ! पूर्ववत् स्वस्वराज्यं कुरुध्वं, भवद्राज्येनाऽस्माकं न प्रयोजनम् । वः क्षेममस्तु' तदा **कुम्भकर्णा**द्या जगुः । 'वयं मोक्षसाम्राज्यप्रदां प्रव्रज्यां ग्रहीष्यामः' ।

अत्राऽवसर एव **कुसुमायुधो**द्याने चतुर्ज्ञान्य**प्रमेयबलो** मुनिः समवससार । तस्य च रात्रौ केवलज्ञाने समुत्पन्ने देवास्तन्महिमानं चक्रुः । प्रातश्च **राम-लक्ष्मणौ कुम्भकर्णा**दयश्चोपेत्य नत्वा देशनां शुश्रुवुः । तच्छ्रुत्वा च परमं वैराग्यमापन्ना**विन्द्रजिद्-मेघवाहनौ**

देशनान्ते निजान् पूर्वभवान् पप्रच्छतुः । ततः स महामुनिरुवाच-'इह **भारते कौशाम्ब्यां** नगर्यामुत्पन्नौ दरिद्रौ भ्रातरौ युवां नाम्ना **प्रथम-पश्चिमौ** जातौ । अन्यदा **भवदत्त**मुनेर्धर्मं श्रुत्वा व्रतं गृहीत्वा निष्कषायौ विजहृतुस्तौ । ततोऽन्येद्युः **कौशाम्ब्या**मेव गतौ **नन्दिघोषं** नृपं वसन्तोत्सवे भार्य**येन्दु**मुख्या क्रीडन्तं ददृशतुः । तं दृष्ट्वा च **पश्चिमो** निदानमकार्षीत्-ईदृक्तपसाऽनयोरहमीदृक्क्रीडापरः पुत्रो भूयासमि'ति । मुनिभिर्निषिध्यमानोऽपि च स निदानाद् न न्यवर्त्तत । विपद्य च स **पश्चिम**स्तयो **रतिवर्धनः** पुत्रो बभूव । क्रमेण यौवनं प्राप्तः स राज्यमासाद्य रमणीभिः परिवृतः पितेव रेमे ।

**प्रथम**मुनिस्तु निर्निदानो विपद्य पञ्चमे कल्पे परमर्द्धिको देवो बभूव । स चाऽवधेर्भ्रातरं तत्रोत्पन्नं नृपं ज्ञात्वा तं बोधयितुं मुनिरूपधरः समेत्य **रतिवर्धने**नाऽर्पित आसने उपविश्य भ्रातृस्नेहात् तस्य स्वस्य च प्राग्भवं कथयामास । तेन सञ्जातजातिस्मरणो **रतिवर्धनः** प्रव्रज्य क्रमाद् विपद्य **ब्रह्म**लोके देवोऽभवत् । ततश्च्युत्वा च **विदेहे**षु **विबुद्ध**नगरे युवां भ्रातरौ जातौ प्रव्रज्या**ऽच्युत**कल्पं जग्मथुः । ततश्चाऽपि च्युत्वा प्रतिविष्णो **रावण**स्य पुत्रा**विन्द्रजिद्-मेघवाहना**वभूताम् । **रतिवर्धन**माता **चन्द्रमुखी** विपद्य युवयोरियं माता **मन्दोदरी** जाता । तद् निशम्य च **कुम्भकर्णा**दयस्तदैव व्रतं जगृहुः । **रामा**दयश्च मुनिं नत्वा समहोत्सवं **लङ्का**यां प्रविविशुः ।

तत्र च **पुष्पगिरि**शिखरस्थोद्याने **हनूमता** यथाख्यातां **सीतां** दृष्ट्वा द्वितीयं जीवितमिव निजोत्सङ्गे चकार रामः । तदैव चाऽऽकाशे प्रमोदात् **सिद्धगन्धर्वा**दय इयं महासती **सीता** जयत्विति जुघुषुः । **लक्ष्मण**श्च साश्रुनेत्रो **मैथिलीं** ननाम । **सीता** चाऽऽशीर्वादपूर्वकं **लक्ष्मणं** शिरस्याघ्रातवती । नमस्कुर्वन्तं



**भामण्डलं** चाऽपि साऽभिननन्द । **सुग्रीवा**दयश्चाऽपि स्वनामाख्यानपूर्वकं **सीतां** प्रणेमुः । ततो **रामः** स**सीतो भुवना-लङ्कार**गजमारुह्य **सुग्रीवाद्यैः** परिवृतो **रावणा**वासं गत्वा तदन्तःस्थं मणिस्तम्भसहस्रमण्डितं श्री**शान्ति**जिनचैत्यं प्रविवेश । **विभीषणा**र्पितैः पुष्पादिभिः **शान्ति**जिनमर्चयित्वा **विभीषण**स्य प्रार्थनया तद्गृहमेत्य तत्र देवार्चन-स्नान-भोजनादि चक्रे ।

ततो रत्नसिंहासनासीनं **राम**मुभे वस्त्रे परिधाप्य कृताञ्जलि**र्विभीषण** उवाच-'अहं ते पत्तिरस्मि, सर्वमिदं रत्नादिकं **राक्षसद्वीपं** च गृहाण । त्वदाज्ञया ते राज्याभिषेकं कुर्महे, प्रसीद, मामनुगृहाण' । ततो **राम** उवाच-'मया पुरा **लङ्का**राज्यं तुभ्यं दत्तं, तत् किं विस्मरसि ?' एवं निवार्य **राम**स्तं तदैव **लङ्का**राज्येऽभिषिच्य **सीता**दिभिरन्वितो **रावण**गृहं जगाम । तत्र च विद्याधरा **राम**स्याऽऽज्ञया तेनोद्वोढुं प्रागङ्गीकृताः **सिंहोदरा**दीनां कन्या आनैषुः । ततः स्वस्वाङ्गीकृताः कुमारीर्यथाविधि समहोत्सवं **राम-लक्ष्मणौ** परिनिन्यतुः । तथा तत्र भोगानुपभुञ्जानौ **सुग्रीवाद्यैः** सेव्यमानौ तौ षडब्दीं व्यतीयतुः ।

अत्राऽन्तरे च **विन्ध्यस्थल्यामिन्द्रजिद्-मेघवाहनौ** सिद्धिं गच्छतुः । तच्च **मेघरथा**ख्यं तीर्थं जज्ञे । **नर्मदा**यां नद्यां च **कुम्भकर्णः** सिद्धिं प्राप । तच्च तीर्थं **पृष्टरक्षित**नाम्ना ख्यातमासीत् ।

❀ ❀ ❀

इतश्चा**ऽयोध्या**यां **राम-लक्ष्मण**योर्वार्त्तामप्यजानन्त्यौ तन्मातरौ भृशं दुःखिते तस्थतुः । तदा च **धातकीखण्डा**दागतो **नारदः** कुतो दुःखिते युवामिति ते पप्रच्छ । ततो**ऽपराजिता** वनगमनादि-

**विशल्या**नयनान्तं वृत्तान्तं निवेद्य तदूर्ध्ववृत्ताज्ञानाद् हा वत्सेत्येव **सुमित्रा**मपि रोदयन्ती करुणं रुरोद । ततो **नारद**स्ते उवाच-'युवां सुस्थिते भवतं, युष्मत्पुत्रमुपगम्य तावानेष्यामि' । तयोरेवं प्रतिज्ञाय किम्वदन्त्या ज्ञातवृत्तो **नारदो** नभसा **लङ्का**यां **राम**मुपेयाय । सत्कृत्य किमत्राऽऽगा इति **रामे**ण पृष्टश्च तन्मातृदुःखवृत्तान्तमाख्यातवान् । तेन तत्क्षणं समुत्सुको **रामो विभीषण**मुवाच-'मातॄणां दुःखं विस्मृत्य त्वद्भक्त्येहाऽधिकमस्थाम् । अद्य तत्र यास्यामस्तदनुमन्यस्व ।

ततो **विभीषणो** नत्वोवाच-'षोडशाहान्यत्र तिष्ठ, यावत् स्वैः शिल्पिभी रम्याम**योध्यां** करोमि' । **रामे**णैवमस्त्विति प्रोक्तश्च सोऽ**योध्यां** स्वर्गपुरीनिभां चक्रे । तदा **रामे**ण सत्कृत्य विसृष्टो **नारदो** गत्वाऽ**पराजिता**दीनां पुत्रागमनवृत्तान्तमकथयत् । **राम**श्च षोडशेऽह्नि सान्तःपुरः **सलक्ष्मणः पुष्पकं** विमानमारुह्य **विभीषणा**दिभिरनुस्रियमाणोऽ**योध्यां** प्राप ।

**भरत**श्च दूरादपि **रामा**दीन् दृष्ट्वा गजारूढः सानुजो-ऽभ्याजगाम । **भरते** आगच्छति च **रामा**ज्ञया **पुष्पकं** भूमिं प्राप । आदौ च **भरतः** सानुजो गजादुत्ततार । **राम-लक्ष्मणा**वपि च सोत्कण्ठौ **पुष्पका**दुत्तेरतुः । साश्रुनेत्रं पादयोः प्रणतं **भरतं** च समुत्थाप्य मूर्ध्नि मुहुर्मुहुश्चुम्बन् समालिलिङ्ग । **शत्रुघ्न**मपि च पादयोः पतितमुत्थाप्य स्ववाससा परिमृज्य परिरेभे । **लक्ष्मणो**ऽपि प्रणमन्तौ **भरत-शत्रुघ्नौ**-भुजौ प्रसार्याऽऽलिलिङ्ग । कृतत्वरो **राम**श्च त्रिभिरनुजैः सार्द्धं **पुष्पक**मारुह्याऽ**योध्या**प्रवेशाय समादिदेश । समहोत्सवं पुरीं प्रविश्य च **पुष्पका**दुत्तीर्य **सलक्ष्मणो रामो** मातृसदनं गत्वा सर्वा मातॄः प्रणनाम । ताभिश्चाऽऽशीर्वचोभिर-



भिनन्द्यत । **सीता**द्याश्चाऽ**पराजिता**मन्याः श्वश्रूश्च प्रणेमुः । ताश्च शुभाशिषं ददुः ।

अथाऽ**पराजिता लक्ष्मणं** मुहुर्मुहुः पाणिना स्पृशन्ती मूर्ध्नि चुम्बन्ती चैवमुवाच-'वत्स ! दिष्ट्या दृष्टोऽसि अधुना पुनर्जातोऽसि, यद् विदेशं गत्वा विजयं प्राप्येहाऽऽगमः । तवैव परिचर्यया **रामः सीता** च वनवासभवानि कष्टानि व्यतिनिन्यतुः । ततो **लक्ष्मण** उवाच-'तातेनेव **रामेण** त्वयेव **सीत**या च लालितोऽहं वनेऽपि सुखमस्थाम् । युष्मदाशीर्भिरेव वैरिसागरं तीर्त्वा सपरिवारो **राम** इहाऽऽययौ ।

अथ **भरतो**ऽ**योध्या**यां महोत्सवमकारयत् । एकदा च **रामं** प्रणम्य सोऽवोचत्-'आर्य ! त्वदाज्ञयेयत्कालं राज्यं मया धृतं, पित्रा सह तदैवाऽहं प्राव्रजिष्यं यदि भवदाज्ञाऽर्गला नाऽभविष्यत् । तदिदानीं मां व्रतायाऽनुमन्यस्व, स्वं राज्यं गृहाण, त्वयि प्राप्ते भवोद्विग्नोऽहमतः परं स्थातुं नोत्सहे' । ततो **रामः** साश्रुस्तमाह-'वत्स ! मैवं वोचः, त्वमेव राज्यं कुरु, वयमिह त्वय्युत्सुका एवा-ऽऽगताः । राज्येन सहाऽस्माकं त्यजन् पुनर्विरहव्यथां किं ददासि? ततस्तिष्ठ, ममाऽऽज्ञां पूर्ववत् पालय' । एवमाग्रहपरं **रामं** ज्ञात्वा नत्वा चलितो **लक्ष्मणे**नोत्थाय पाणिना धृतः । तथा **सीता**द्या अपि व्रताय कृतनिश्चयं यान्तं **भरतं** ज्ञात्वा ससम्भ्रमं तत्राऽऽजग्मुः ।

तथा व्रताग्रहं विस्मारयितुकामास्ता **भरतं** जलक्रीडार्थं प्रार्थयामासुः । स च विरक्तोऽपि तासामनुरोधेन सान्तःपुरः क्रीडासरसि चिक्रीड । जलाद् निर्गत्य च **भरत**स्तत्तीरेऽस्थात् । **भुवनालङ्कारो** गजश्च स्तम्भमुत्पाट्य तत्राऽऽययौ । **भरत**दर्शनाद् मदान्धोऽपि सोऽमदोऽभवत् । **भरतो**ऽपि तं दृष्ट्वा परमां प्रीतिं

ययौ । **राम-लक्ष्मणौ** चोपद्रवकारिणस्तस्य गजस्य बन्धनाय ससामन्तौ तत्राऽऽशूपेयतुः । तथा स करी **रामा**ज्ञया स्तम्भेऽनीयत हस्तिपकैः । तदैव चाऽऽगतावुद्याने समवसृतौ **देशभूषण-कुलभूषण**मुनी वन्दितुं सपरिच्छदा **रामा**दयस्तत्रोपगत्य नेमुः । तथा **रामो** मम गजो **भुवनालङ्कारो भरत**दर्शनात् कथममदोऽजनीति पप्रच्छ ।

अथ केवली **देशभूषणो** मुनिराख्यत्-'पुरा **ऋषभ**प्रभुणा समं चत्वारः सहस्रा राजानः प्राव्रजन् । ते च कृतमौनेऽनाहारे प्रभौ विहरति निर्विण्णा वनवासिनस्तापसा जाताः । तेषु **प्रह्लादन-सुप्रभ**नृपपुत्रौ तापसौ **चन्द्रोदय-सूरोदयौ** भवं भ्रेमतुः । **चन्द्रोदयो गजपुरे हरिमतेश्चन्द्रलेखा**यां भार्यायां **कुलङ्करः** पुत्रोऽजनि । **सूरोदयो**ऽपि **गजपुर** एव **विश्वभूति**विप्रस्या**ऽग्निकुण्डा**यां भार्यायां **श्रुतिरति**स्तनयो जातः । **कुलङ्क**रश्च नृपस्तापसाश्रमं गच्छन्नवधिज्ञानिना**ऽभिनन्दन**मुनिनोक्तः-'तत्र पञ्चाग्नितपस्तप्यमानेन तपस्विना होतुमानीतस्य काष्ठस्य मध्ये सर्पस्तिष्ठति, स च पूर्वभवे **क्षेमङ्क**रस्तव पितामहः । तत् काष्ठं दारयित्वा तं यत्नादाकृष्य रक्ष'। तच्छ्रुत्वा व्याकुलः स गत्वा तत् काष्ठं दारयित्वा तदन्तःस्थं सर्पं दृष्ट्वा विस्मितो यावत् प्रव्रज्यामादित्सते स्म, ताव**च्छ्रुतिरति**स्तमेवमाह-'अयं न वेदविहितो धर्मः, यदि तवाऽऽग्रहस्तदाऽन्तिमे वयसि दीक्षाऽऽदेया । सम्प्रति खेदेनाऽलम्' ।

स राजाऽपि तद्वचसा भग्नदीक्षोत्साहो मया किमत्र कर्त्तव्यमिति चिन्तयन् स्थितः । तद्राज्ञी **श्रीदामा** च पुरोधोऽनुरक्ता मामेष ज्ञातवानित्याशङ्कत । तथा यावदेव आवां न हन्ति तावदेवैनं



हन्मीति पुरोधोऽनुमता विषं दत्त्वा **कुलङ्क**रममारयत् । **श्रुतिरति**रपि च मृतः । तावुभावपि चिरं भवं भ्रेमतुः ।

अन्यदा च **राजगृहे कपिल**द्विजस्य **सावित्र्यां** पत्न्यां तौ युग्मतो **विनोद-रमणा**ख्यौ पुत्रावभूताम् । **रमण**श्च वेदमध्येतुं देशान्तरं गत्वाऽधीतवेदो रात्रौ **राजगृह**मागत्याऽकालोऽसाविति बुद्ध्या बहिरेव स्थितो यक्षमन्दिरे सर्वसाधारणोऽस्वाप्सीत् । तदानीं च तत्र **विनोद**भार्या **शाखा दत्ते**न द्विजेन समं कृतसङ्केताऽऽगात् । **विनोदो**ऽपि च तामनु तत्राऽऽगतः । सा च **दत्तं** मत्त्वा **रमण**मुत्थाप्य तेन रेमे । **विनोद**श्चाऽसिमाकृष्य तं निर्विशङ्कं जघान। तदा **शाख**या **रमण**च्छुरिकया **विनोदो**ऽपि हतः । स च **विनोद**जीवश्चिरं भवं भ्रान्त्वा **धना**ख्य इभ्यपुत्रोऽभवत् । **रमण**श्चाऽपि भवं भ्रान्त्वा **धन**स्यैव **लक्ष्मी**कुक्षिजन्मा **भूषणो** नाम पुत्रो बभूव ।

स च **धना**ज्ञया द्वात्रिंशदिभ्यकन्याः परिणीय ताभिः क्रीडन् स्वसद्मतले स्थितश्चतुर्थे प्रहरे रात्रौ **श्रीधर**मुनेरुत्पन्ने केवले देवैरारब्धमुत्सवं ददर्श । तेन सञ्जातधर्ममतिः सद्मन उत्तीर्य मुनिं वन्दितुं चलितो मार्गे सर्पेण दष्टः । ततः स शुभपरिणामाच्छुभगतीर्भ्रान्त्वाऽत्र **जम्बूद्वीपे विदेहे रत्नपुरे**ऽ**चल**चक्रिणो **हरिणी**कुक्षिजो धर्मरतः **प्रियदर्शना**ख्यः पुत्रोऽभूत् । प्रविव्रजिषुरपि स पित्रनुरोधात् त्रीणि कन्यासहस्राणि परिणीयाऽपि संविग्नो गृहवासेऽपि वर्षाणां चतुष्षष्टिसहस्राणि परं तपश्चरित्वा **ब्रह्म**लोके देवोऽभवत् ।

**धनो**ऽपि संसारं भ्रान्त्वा **पोतनपुरे**ऽ**ग्निमुख**द्विजस्य **शकुना**-कुक्षिजो **मृदुमतिः** पुत्रोऽभवत् । स दुर्विनीतत्वाच्च पित्रा गृहाद् निर्वासितो धूर्तो भ्रमन् सर्वकलाकुशलो भूत्वा पुनरपि गृहमगात् ।

तत्र स द्यूतपरायणो देवकेभ्यो दिने दिने भूरि धनं जित्वा **वसन्तसेन**या वेश्यया सह भोगान् भुक्त्वाऽन्ते प्रव्रजितो **ब्रह्म**लोकेऽमरोऽभवत् । ततश्च्युत्वा च पूर्वभवमायादोषाद् **वैताढ्ये भुवनालङ्कारो** नाम गजो बभूव । **प्रियदर्शन**जीवोऽपि **ब्रह्म**लोकात् परिच्युत्य भवतो भ्राताऽयं **भरतो** बभूव । तद्दर्शनाच्च जातजातिस्मृतिरसौ गजः सद्यो गतमदो जज्ञे ।

एवं पूर्वभवान् श्रुत्वाऽधिकं विरक्तो **भरतो** नृपसहस्रेण समं व्रतमादाय मोक्षमियाय । सहस्रं ते राजानश्चाऽपि चिरं व्रतं पालयित्वा नानालब्धिसम्पन्ना अनुरूपं पदं प्राप्तवन्तः । स गजोऽपि वैराग्याद् द्विविधं तपो विधायाऽनशनं प्रपद्य विपद्य **ब्रह्म**लोके देवोऽभवत् । **कैकेय्य**पि व्रतं गृहीत्वा चिरं निरतीचारं पालयित्वाऽव्ययं पदं प्राप ।

❀ ❀ ❀

अथ **भरते** प्रव्रजिते राजानो भक्तितो **रामं लक्ष्मणो**ऽयं वासुदेवो भवद्भिरभिषिच्यतामिति प्रार्थयामासुः । **रामा**दिष्टाश्च ते तथैव चक्रुः । **राम**स्याऽपि च ते बलभद्रत्वाभिषेकं चक्रुः । द्वावपि तावष्टमौ बलभद्र-वासुदेवौ राज्यमपाताम् । ततो **रामो विभीषणा**य कुलक्रमागतं **रक्षोद्वीपं, सुग्रीवाय कपिद्वीपं, हनूमते श्रीपुरं, विराधाय पाताललङ्कां, नीलाय ऋक्षपुरं, प्रतिसूर्याय हनुपुरं, रत्नजटिने देवोपगीतपुरं, भामण्डलाय वैताढ्ये रथनूपुरं** पुरमन्येभ्योऽप्यन्यद् नगरं च प्रदाय **शत्रुघ्न**मुवाच-'वत्स ! यद् रोचते तं देशमुररीकुरु' ।

ततो **मथुरां** मे प्रयच्छेति तेन प्रार्थितो **राम** उवाच-'वत्स ! सा पुरी दुःसाध्या, तत्र **मधो**र्नृपस्य **चमरेण** पुराऽर्पितं शूलं दूरादेव



शत्रुसैन्यं विनाश्य पुनस्तत्करे समभ्येति' । ततः **शत्रुघ्न** उवाच-'अहं तव भ्राताऽस्मि, मया युद्धे तस्य कस्त्राता ? ततो मह्यं **मथुरां** पुरीं प्रयच्छ । अहं स्वयमेव **मधोः** प्रतीकारं करिष्यामि' । ततो **राम**स्तदाग्रहं ज्ञात्वाऽशिषत्-'शूलरहितः प्रमत्तश्च **मधु**स्त्वया योधनीयः' । तथाऽक्षय्यबाणौ तूणौ दत्वा **कृतान्तवदनं** नाम सेनापतिं सहैवाऽदिशत् । **लक्ष्मणो**ऽपि चाऽग्निमुखान् बाणान् **अर्णवावर्त्तं** धनुश्च तस्य विजयमाशंसन् ददौ ।

अथ **शत्रुघ्नः** प्रस्थाय निरन्तरैः प्रयाणै**र्मधु**मुपेत्य नदीतटेऽवात्सीत् । तत्र प्रथमं प्रेषिताश्चराश्चैत्य **शत्रुघ्न**मवोचन्-'यद् **मथुरा**-पूर्वदिक्स्थे **कुबेरो**द्याने **मधुः** पत्न्या **जयन्त्या** सह क्रीडापरोऽस्ति, तच्छुलं चाऽधुना शस्त्रागारेऽस्ति, तेन युद्धस्य समुचितोऽयं कालः । 'ततश्छलज्ञः **शत्रुघ्नो** निशि **मथुरां** प्रविशन् **मधुं** बलैरुरुधे । तत्र युद्धे च **शत्रुघ्नः** प्रथमं **मधु**पुत्रं **लवणं** जघान । ततः क्रुद्धो **मधु**-र्धावित्वा **शत्रुघ्ने**न सह युयुधे । तयोः शस्त्राशस्त्रि युद्धे प्रवृत्ते **शत्रुघ्नो लक्ष्मण**प्रदत्तो**ऽर्णवावर्त्तं** धनुरग्निमुखान् बाणांश्चाऽस्मार्षीत् । तेन च शार्दूलं व्याध इव स **मधुं** जघान । तद्बाणप्रहारविह्वलो **मधु**रचिन्तयत्-'शूलं मम पाणौ नाऽगात्, **शत्रुघ्न**श्च न हतः । तन्मम जन्म मुधा गतं यज्जिनेन्द्रो नाऽर्चितश्चैत्यानि न कारितानि, पात्रेषु च न दत्तम्' । एवं ध्यायन् भावदीक्षितो नमस्कारपरायणः स **मधु**-र्विपद्य **सनत्कुमारे** महर्द्धिको देवोऽभवत् । तच्छूलं च देवतारूपं **चमरा**न्तिकमुपेत्य च **शत्रुघ्ना**च्छलपूर्वकं **मधु**हननं शशंस ।

अथ मित्रवधात् क्रुद्धः स्वयं चलितः क्व यासीति **गरुडे**शेन **वेणुदारि**णा पृष्टः स्वमित्रहन्तारं **मथुरा**स्थं **शत्रुघ्नं** हन्तुं यास्यामीति **चमरो**ऽवदत् । ततो **वेणुदारी** पुनरुवाच-**लक्ष्मणे**नाऽर्धचक्रिणा

**धरणेन्द्राद् रावणे**न लब्धा शक्तिर्निर्जिता, **रावणो**ऽपि हतः, **शत्रुघ्न**श्च **लक्ष्मणा**देशाद् युद्धे **मधुं** जघान' । तत**श्चमरेन्द्र** उवाच-'**लक्ष्मणे**न **विशल्या**प्रभावेण जिता शक्तिः, तस्याश्चा ब्रह्मचारिण्या **विशल्या**याः स प्रभावोऽधुना नष्टः । ततस्तं मित्रघातकं हन्तुं यास्यामी'त्युक्त्वा रोषा**च्छत्रुघ्न**महीं गत्वा तत्र सर्वं लोकं सुस्थं ददर्श । ततः स प्राक् प्रजोपद्रवेणैतं **मधु**रिपुमुपद्रवामीति विचार्य तत्प्रजासु विविधान् व्याधीन् व्यधात् । कुलदेवतया व्याधिकारणं ज्ञात्वा च **शत्रुघ्नो**ऽ**योध्या**यामुप**राम-लक्ष्मणं** जगाम । तदानीं चाऽऽगतौ **देशभूषण-कुलभूषण**मुनी **राम-लक्ष्मण-शत्रुघ्ना** उपेत्य वन्दितवन्तः ।

तदा केन हेतुना **शत्रुघ्नो मथुरां** प्रत्याग्रहीति **रामे**ण पृष्टो **देशभूषणो** मुनिरुवाच-'**मथुरा**यां **शत्रुघ्न**जीवोऽनेकश उत्पद्य **श्रीधरो** नाम रूपवान् मुनिसेवको विप्रोऽभूत् । स चाऽन्यदा **ललिता**ख्यया राजमहिष्या मार्गे दृष्टो रन्तुं स्वान्तिके आनायितः । तदानीमेव चाऽतर्कितो नृपः समाजगाम । तदा क्षुभितया **ललित**या चौरो-ऽसाविति पूच्चक्रे । नृपेण च स विप्रो धृतः । नृपादेशाच्च स वधस्थानं नीतः प्रतिज्ञाव्रतः **कल्याण**मुनिना मोचितः प्रव्रज्य तपस्तप्त्वा दिवं प्राप । ततश्च्युत्वा **मथुरा**यामेव **चन्द्रभद्र**नृपस्य **काञ्चनप्रभा**कुक्षिजो**ऽचला**ख्यो नृपस्याऽतिवल्लभो बभूव । स च **भानुप्रभा**द्यैः सपत्नभ्रातृभिरष्टभी राजाऽयं मा भूदिति हन्तुमारेभे । ततो मन्त्रिभिर्विचार्य नंष्ट्वाऽन्यतो गत्वा भ्रमन् वने महता कण्टकेन विद्धः पथि क्रन्दन् **श्रावस्ति**वासिना पितृनिर्वासितेनाऽङ्कनाम्ना काष्ठभारिणा दृष्टोऽपनीतकण्टकः कृतः ।



ततः सोऽ**चलो**ऽ**ङ्कं** कण्टकं प्रदायोवाच-'त्वया साधु कृतम् । **मथुरा**पुर्यां यदाऽ**चलं** नृपं श्रृणोषि, तदा तत्र समागच्छेः, त्वं परमोपकार्यसि' । ततोऽ**चलः कौशाम्ब्यां** गतः **सिंह**गुरो**रिन्द्रदत्त**नृपं धन्वाभ्यासपरं ददर्श । ततः **सिंहेन्द्रदत्त**योः स्वधानुष्कत्वमदर्शयत् । तत **इन्द्रदत्त**स्तस्मै **दत्तां** नाम कन्यां देशं च ददौ । स चाऽ**चलो**ऽ**ङ्गा**दिकान् देशान् साधयित्वा **मथुरां** प्राप्याऽग्रजान् **भानुप्रभा**दीनष्टौ युद्धे बद्ध्वा गृहीतवान् । **चन्द्रभद्र**श्च तन्मुक्त्यै मन्त्रिणोऽ**चला**न्तिके प्रैषीत् । ते च मन्त्रिणोऽ**चल**वृत्तान्तं विज्ञाय गत्वा शीघ्रमेव **चन्द्रभद्रा**याऽऽचख्युः । तेन हृष्ट**श्चन्द्रभद्रो**ऽ**चलं** पुरीं प्रवेश्य तं क्रमेण लघीयांसमपि निजराज्ये निवेशितवान् । पित्रा निर्वास्यमानांश्च तान् **भानुप्रभा**दिकान् भ्रातॄन् कथञ्चिद**चलो** रक्षित्वा गुप्तसेवकांश्चकार ।

एकदा चाऽ**चलो** नटरङ्गस्थोऽ**ङ्कं** द्वारपालेन हन्यमानं निजान्तिकं समानीय तज्जन्मभूमिं **श्रावस्तीं** तस्मै ददौ । ततो द्वावपि तौ सम्भूय मित्रे राज्यं चक्राते। अन्ते **समुद्राचार्य**समीपे प्रव्रज्य विपद्य **ब्रह्म**लोके देवोत्तमौ जातौ। ततश्च्युत्वाऽ**चल**जीवः **शत्रुघ्नो**ऽभूत् । तत्प्राग्जन्ममोहवशादयं **मथुरा**ग्रही । **अङ्क**जीवोऽपि ततश्च्युत्वाऽयं सेनापतिः **कृतान्तवदनो** जातः' । एवमुक्त्वा तौ मुनी विजहृतुः, **रामा**दयश्च स्वं स्वं स्थानं जग्मुः ।

इतश्च **प्रभापुर**पुरेशस्य **श्रीनन्दन**स्य **धारिणी**कुक्षिजाः **सुरनन्द-श्रीनन्द-श्रीतिलक-सर्वसुन्दर-जयन्ता-ऽमर-जयमित्राः** सप्त पुत्राः क्रमादभवन् । **श्रीनन्दन**श्च मासजातं सुतं राज्ये न्यस्य **प्रीतिकर**गुरोस्तैः सुतैः सह प्रावाजीत् । तत्र **श्रीनन्दनो** मोक्षमियाय । **सुरनन्दा**दयश्च तपःप्रभावाज्जङ्घाचारणलब्धयो विहरन्तो **मथुरा**-

पुरीं जग्मुः । ततस्ते प्रावृषि शैलगुहागृहमधिवास्य षष्ठाऽष्टमादितपः-परायणा उत्पत्य दूरदेशेषु पारणं कुर्वन्ति स्म । तत्प्रभावाच्च **मथुरा**यां **चमर**कृता व्याधयः शमं जग्मुः ।

अन्यदा च ते पारणायाऽ**योध्यां** प्राप्याऽ**र्हद्दत्त**श्रेष्ठिनो गृहे भिक्षार्थं प्राविशन् । स श्रेष्ठी च तान् सावज्ञं नत्वा दध्यौ-'इमे नेहत्याः साधवः, वर्षास्वपि विहरमाणाः केऽप्यन्ये साधवः, किममून् पृच्छामि' ? तस्यैवं ध्यायतस्तद्वध्वा ते प्रतिलम्भिताः । ततो **द्युते**राचार्यस्य वसतिं गतास्तेनाऽभ्युत्थाय सगौरवं वन्दिताः । किन्त्वकालचारिण इति मत्वा साधुभिर्न वन्दिताः । **द्युति**ना च दत्तासनास्ते पारणं व्यधुः । **मथुरा**पुर्या आयाताः सम्प्रति तत्र यास्याम इत्याख्याय च ते समुत्पत्य स्वं स्थानं ययुः । **द्युति**ना जङ्घाचारणानां तेषां गुणस्तुतिं श्रुत्वा कृतावज्ञाः साधव पश्चात्तापं चक्रुः । तच्छ्रुत्वाऽ**र्हद्दत्तो**ऽपि पश्चात्तापं कुर्वन् कार्तिकशुक्लसप्तम्यां **मथुरां** गत्वा चैत्यानि वन्दित्वा तान् सप्तर्षीनपि वन्दित्वा स्वयं कृतमवज्ञादोषं क्षमयामास ।

**शत्रुघ्नो**ऽपि च सप्तर्षिप्रभावाच्छान्तव्याधिं देशं ज्ञात्वा कार्तिकपूर्णिमायां **मथुरा**मियाय । तान् नत्वा मद्गृहे भिक्षां गृह्यता-मिति प्रार्थयामास । राजपिण्डो न कल्पते इति तैः प्रत्युक्तश्च किञ्चित्कालमत्र स्थीयतामिति पुनः प्रार्थयामास **शत्रुघ्नः** । ततः प्रावृट्कालोऽयं गतः, तत्तीर्थयात्रया विहरिष्यामः । त्वं गृहिणां गृहे गृहे-ऽर्हद्बिम्बं कारयेः, तेनाऽस्यां पुर्यां जातुचिद् न व्याधिर्भावीत्युक्त्वा समुत्पत्य ते सप्तर्षयोऽन्यत्र ययुः । **शत्रुघ्नो**ऽपि तथाऽकरोत् । लोकोऽपि निरामयो जातः । तथा स तेषां सप्तर्षीणां रत्ननिर्मिताः प्रतिमा **मथुरा**पुर्यां चतसृष्वपि दिक्षु चक्रे ।



इतश्च **वैताढ्ये** दक्षिणश्रेण्यां **रत्नपुरे** पुरे **रत्नरथ**नृपस्य **चन्द्रमुखी**कुक्षिजा **मनोरमा**ख्या पुत्री प्राप्तयौवना जाता । कस्येयं कन्या दातव्येति चिन्तापरे नृपे **नारद** आगत्य **लक्ष्मण**योग्येय-मित्यब्रवीत् । तेन च गोत्रवैरतः कुपिता **मनोरमा** भ्रूसंज्ञया भृत्यान् **नारद**कुटनायाऽऽदिशत् । **नारद**श्च तान् जिघांसून् विज्ञाय पक्षीव समुत्पत्य **लक्ष्मण**मुपगम्य पटे लिखित्वा तां कन्यां दर्शयामास, स्ववृत्तान्तं च सर्वं शशंस । **लक्ष्मण**श्च तद्रूपदर्शनात् क्षणाज्जातानु-रागो **रामे**ण समं रक्षोविद्याधरैः परिवृतस्तत्राऽऽययौ । **लक्ष्मणे**न पराजितश्च **रत्नरथ**स्तस्मै **मनोरमां रामा**य च **श्रीदामां** नाम कन्यां ददौ । **राम-लक्ष्मणौ** च सर्वां **वैताढ्य**दक्षिणश्रेणीं जित्वा-ऽ**योध्या**मागत्य महीं पालयन्तौ तस्थतुः । तदा **लक्ष्मण**स्य षोडशान्तःपुरस्त्रीसहस्रं बभूव । तासु च **विशल्या-रूपवती-वनमाला**दयोऽष्टौ महिष्योऽभवन् । पुत्राश्च तस्य सार्धे द्वे शते अभूवन् । तेष्वष्टौ **श्रीधरा**दयो महिषीभवा आसन् । **राम**स्य च चतस्रः **सीता**द्या महिष्योऽभवन् ।

❀ ❀ ❀

एकदा च **सीता** ऋतुस्नाता रात्रिशेषे विमानाच्च्युतौ शरभौ मुखे प्रविशन्तौ स्वप्नं ददर्श । तज्ज्ञात्वा च **रामो**ऽवदत्-'तव वीरौ सुतौ भाविनौ, किन्तु विमानाच्छरभौ च्युताविति न मम मोदाय' । तदा **सीता** धर्मस्य तव च माहात्म्यात् सर्वं शुभं भावीत्युक्त्वा गर्भं दधार । सा च पूर्वतोऽपि प्रियतमा सगर्भा **राम**स्याऽधिकं प्रिया-ऽभूत् । तेनेर्ष्यालवः सपत्न्यश्छलपरायणा ऊचुः-'**रावणः** कीदृशो-ऽभूदिति लिखित्वा दर्शय' ।

ततो मया **रावणः** सर्वाङ्गेन न दृष्टः, किन्तु तच्चरणावेव दृष्टाविति कथं तं लिखामीत्युक्तवती । ततस्तत्पादावप्यालिखेति ताभिः कृताग्रहा **रावण**पादावालिलेख । तदवसरे च तत्रोपस्थितो **राम**स्ताभिरूचे-'तव प्रिया **सीता**ऽद्याऽपि **रावण**स्य स्मरति, **सीत**या लिखितमेतद् **रावण**पदद्वयं पश्य, **सीता** तस्यैव नाथत इति जानीहि'। तत्तथा दृष्ट्वाऽपि धीरो **रामो**ऽनुपलक्षितः **सीता**यां तथैव वर्त्तते स्म । सपत्न्यश्च निजैर्दासीजनैः **सीता**यास्तं दोषं जने प्राकाशयन् ।

अथ वसन्ते **रामः सीता**मब्रवीत्-'**सीते** ! गर्भखेदितां त्वां विनोदयितुमिव मधुलक्ष्मीरिहोपस्थिता । ततोऽधुना **महेन्द्रोदयो**द्यानं रन्तुं व्रजामः । **सीता**ऽप्युद्यानभवैर्नानापुष्पैर्मे देवतार्चनरूपो दोहदः पूर्यतामित्यूचे । ततस्तत्क्षणमेव **रामो** देवानां पूजामकारयत्। सपरिच्छदश्च **महेन्द्रोदयो**द्यानं जगाम । तत्र चाऽर्हत्पूजोत्सवमयं मधूत्सवं सुखासीना **सीता** ददर्श ।

तदवसरे च सा स्फुरितं दक्षिणनेत्रं साशङ्का **राघवाय** निवेदयामास । नेदं साध्विति **रामेण** कथिते च **सीतो**वाच-'**रक्षोद्वी**पवासादद्याऽपि मे दुर्विधिर्न तुष्टः, त्वद्वियोगदुःखादधिकं किमसौ दास्यति, निमित्तं हि नाऽन्यथा भवति' । ततो **राम**स्तामुवाच-'खेदं मा वह, सुखा-ऽसुखे कर्माधीने अवश्यमेव भोक्तव्ये' । ततो गच्छ, मन्दिरे देवार्चनं कुरु, पात्रेभ्यो दानं प्रयच्छ'। **सीता**ऽपि तच्छ्रुत्वा सदनमेत्य **रामेण** यथोक्तं सर्वं तथैव चक्रे ।

अथ राजधानीमहत्तरा यथाभूतपुरीवृत्तान्तनिवेदका **विजया**दय उपेत्य नत्वा कम्पमानास्तस्थुः । न तु किमपि विज्ञापयामासुः । ततो **राम**स्तानभयं प्रदाय निवेदनायाऽऽदिशत् । ततस्तेषु मुख्यो महत्तरो **विजयो** विज्ञपयामास-'देव ! देव्यां प्रवादोऽस्ति, **जानकी**



कामुकेन **रावणे**न हृत्वैकैव नीता, तद्गृहे चिरमवात्सीच्च । ततश्च **सीता** रक्ता विरक्ता वा तेनाऽवश्यं दूषिता भवेत् । तदेतं प्रवादं मा सहस्व' ।

ततो **रामः** कलङ्कितां **सीतां** निश्चित्य दुःखात् तूष्णीको धैर्यमालम्ब्य तानुवाच-'भवद्भिः साधु व्यज्ञपि, स्त्रीमात्रकृतेऽहमयशो न सहिष्ये' । एवं प्रतिज्ञाय तान् विसृज्य **रामो** रात्रौ प्रच्छन्नो गृहाद् बहिर्गत्वा पदे पदे **सीता**पवादं श्रुत्वा गृहमागत्य भूयोऽपि तच्छ्रवणार्थं चरानादिश्य दध्यौ-'मया यत्कृते रक्षःकुलक्षयः कृतः, तस्याः किमिदमागतम् ? **सीता** महासती, परस्त्रीलम्पटो **रावण**श्चेति जाने । कुलं च मे निष्कलङ्कम् । हा ! **रामः** किं करोतु ?' तदा चरा बहिर्गत्वा श्रुत्वा **सीता**पवादं **राम**स्य सपरिच्छदस्याऽब्रुवन् । तेन क्रुद्धो **लक्ष्मणो**ऽवोचत्-'ये हेतुभिर्दोषान् कल्पयित्वा सतीं **सीतां** निन्दन्ति, तेषामहमन्तकोऽस्मि' ।

ततो **राम** उवाच-'पुरा मम महत्तरैरिदं निवेदितं, स्वयं च श्रुतं, चरैरपि समर्थितम् । **सीता**याः स्वीकारवत् तत्त्यागेन जनो माऽपवादीत्' । ततो **लक्ष्मणः** पुनरुवाच-'लोकवचसा **सीतां** मा त्यज । अनिरुद्धमुखो हि जनो यथा तथाऽपवदिता' । ततो **रामः** पुनरुवाच-'सत्यमेतत्, लोकः सदाऽपीदृशः। किन्तु सर्वलोकविरुद्धं त्याज्यमेव' । एवमुक्त्वा **रामः** सेनापतिं **कृतान्तवदनं** सगर्भाऽपि **सीता**ऽरण्ये क्वाऽपि त्यज्यतामित्यादिशत् । **सीता**त्यागो नोचित इति रुदन् निवेदयन् **लक्ष्मणो रामे**ण नाऽतः परं त्वया वाच्यमिति निषिद्धो नीरङ्गीच्छन्नमुखः स्वगृहं जगाम ।

ततो दोहदानुसारेण **सम्मेत**यात्राव्याजेन **सीतां** नीत्वाऽरण्ये त्यजेति **कृतान्तवदनं रामो**ऽन्वशात् । सेनापतिरपि **सम्मेत**यात्रार्थं

**रामा**ज्ञां निवेद्य **सीतां** रथे समारोप्य द्रुतं प्रस्थितवान् । शकुनेषु दुर्निमित्तेष्वपि निर्विशङ्का रथस्था **सीता** दूरं मार्गं जगाम । ततो **गङ्गासागर**मुत्तीर्य **सिंहनिनादके** वने गत्वा **कृतान्तवदनः** किञ्चिद् विचारयंस्तस्थौ । तं च साश्रुं खिन्नमुखं प्रेक्ष्य कथमित्थं सशोक इव स्थितोऽसीति **सीता** पप्रच्छ । ततः सेनापतिरुवाच-'देवि ! राक्षसगृहवासापवादाल्लोककृताद् भीतेन **रामेण** वने त्याजिताऽसि । अस्मिन् श्वापदाकीर्णे वने मया त्यक्ता स्वप्रभावेणैव जीविष्यसि' । तच्छ्रुत्वा मूर्च्छिता **सीता** भुवि पपात । सेनापतिरपि **सीता** मृतेति मत्वा रुरोद ।

ततो वनवातेन लब्धसंज्ञा सेतोऽ**योध्या** कियद् दूरे ? **रामः** कुत्र तिष्ठति ? इति सेनान्यमपृच्छत् । ततः सेनानीरुवाच-'दूरेऽ**योध्या,** अनया पृच्छया किम् ? अव्याहताज्ञस्य **राम**स्य वार्त्तयाऽलम्' । एवं श्रुत्वाऽपि **राम**भक्ता सा सेनापतिमुवाच-'भद्र! **राम**स्येदं मद्वाचिकं कथयेः-यदि ममाऽपवादभीतस्त्वं, तर्हि परीक्षां कथं नाऽकृथाः ? शङ्कास्थाने हि सर्वोऽपि दिव्यं लभते। मन्दभाग्याऽहं वने स्वकर्माण्यनुभोक्ष्ये । किन्तु त्वं विवेकस्य कुलस्य चाऽनुरूपं नाऽकार्षीः । यथा दुर्जनगिरा मामत्याक्षीः, तथा मिथ्यादृशां वाचा जिनधर्मं मा त्याक्षीः' । एवमुक्त्वा मूर्च्छिता भूमौ पतितोत्थायाऽवोचत्-'हा ! मया विना **रामः** कथं जीविष्यति ? हा हताऽस्मि, **रामा**य स्वस्ति **लक्ष्मणा**य चाऽऽशिषं कथयेः । शिवास्ते पन्थानः सन्तु । वत्स ! **राम**मुपैहि' । सेनानीः **कृतान्तवदन**श्चैवंविधे विपरीतवृत्तौ प्रियेऽपि यैवंविधा तदियमेव सतीशिरोमणिरिति चिन्तयन् प्रणिपत्य **सीतां** मुक्त्वा कथञ्चित् परावृत्तवान् ॥ ८ ॥

*इति सीतापरित्यागवर्णनात्मकोऽष्टमः सर्गः ॥८॥*

## नवमः सर्गः

अथ भीता **सीता** वने इतस्ततो भ्राम्यन्ती स्वं निन्दन्ती रुदती पदे पदे स्खलन्ती च गच्छन्ती पुरत आगच्छद् महासैन्यं दृष्ट्वाऽभीतैव नमस्कारपरायणा तस्थौ । सैनिकाश्च प्रत्युत का नाम दिव्यरूपेयं भूस्थितेति वदन्तो बिभयाञ्चक्रुः । **सीता**या रुदितं श्रुत्वा च स्वरज्ञस्तच्चमूनृप इयं सगर्भा काऽपि महासतीत्यवोचत्। तथा **सीतायाः** समीपं गतः । **सीता** चाऽऽशङ्किता स्वं नेपथ्यं समर्पितवती । ततो दयालुः स नृप उवाच-'त्वं मनागपि मा भैषीः, एतानि भूषणानि तवाऽङ्ग एव तिष्ठन्तु । का त्वं कस्त्वामिहाऽत्याक्षीत्, तदाख्याहि, मा स्म शङ्किष्ठाः, त्वद्दुःखेन दुःखितोऽस्मि' । तन्मन्त्री **सुमति**श्चाऽपि **सीता**मुवाच-'**गजवाहन**नृपस्य **बन्धु**देवीकुक्षिजन्मा तनयो **वज्रजङ्घो**ऽयं **पुण्डरीक**पुरेशो महार्हतो महासत्त्वः परस्त्रीसहोदरः । गजान् ग्रहीतुमत्रैत्य कृतप्रयोजनश्च व्रजन्नत्राऽगात् । तन्निजदुःखमाख्याहि' ।

ततो विश्वस्य **सीता**ऽशेषतः स्ववृत्तान्तं निवेदितवती । ततो निश्छलो नृपो जगाद-'त्वं मे स्वसाऽसि, यत एकं धर्मं प्रपन्ना मिथो बन्धवः स्युः' । तन्मम **भामण्डल**स्य भ्रातुरिव गृहे समेहि । स्त्रीणां हि पतिगृहादन्यद् भ्रातृगृहमेव स्थानम् । **रामो**ऽपि हि त्वां लोकापवादभयादेवाऽत्याक्षीद् न तु स्वयम् । विरहातुरः स

त्वामचिरादेवाऽन्वेषयिष्यति' । एवं निर्विकारेण तेनोक्ता तथाऽस्त्वित्युक्त्वा तेनाऽऽनीतां शिबिकां **सीता** समारुरोह । **पुण्डरीकपुरं** गत्वा च तद्दर्शिते गृहेऽहर्निशं धर्मशीला तस्थौ ।

इतश्च सेनापतिर्गत्वा **रामाय सीता**त्यागवृत्तान्तं वाचिकं च शशंस । तदाकर्ण्य मूर्च्छया भुवि पतितं **रामं लक्ष्मणः** ससम्भ्रममेत्य चन्दनजलेनाऽभ्यषिञ्चत् । उत्थाय विलपन्तं च तं **लक्ष्मण** उवाच-'सा तस्मिन् वनेऽद्याऽपि स्वप्रभावादेव रक्षिता भवेत्, तत्स्वयं गत्वा तामन्विष्याऽऽनीयतां, यावत् सा त्वद्विरहे न विपद्यते' । तच्छ्रुत्वा तेन सेनापतिना विद्याधरैश्च सह व्योमयानेन **राम**स्तद् वनं प्राप । सर्वतोऽन्विष्याऽपि तां **सीता**मप्राप्य व्याघ्रादिना सा भक्षिता भवेदिति चिन्तया दुःखितो निवृत्त्य स्वपुरीमागतवान् **रामः** । **सीता**गुणगानपूर्वकं नागरैर्निन्द्यमानस्तस्याः प्रेतकार्याणि विधाय तामेवाऽनिशं हृदि चिन्तयंस्तस्थौ ।

इतश्च **सीता पुण्डरीक**पुरे युग्मिनौ नाम्नाऽ**नङ्गलवणं मदनाङ्कुशं** च सुतौ सुषुवे । **वज्रजङ्घ**श्च प्रमुदितस्तयोर्जन्ममहोत्सवं नामकरणं च चकार । तौ च धात्रीभिर्लाल्यमानौ क्रमेण वर्धमानौ विद्याग्रहणयोग्यौ जातौ । तदा च **सिद्ध**पुत्रः **सिद्धार्थो**ऽणुव्रती कलाकुशलस्त्रिसन्ध्यमपि **मेर्व**द्रौ चैत्ययात्रासु नभोगामी भिक्षार्थं **सीता**सदनमियाय । तया भक्ताद्यैर्भक्त्या भोजितः पृष्टश्च सुखविहारिकमुक्तवान् । **सीता** चाऽपि तेन पृष्टा पुत्रजन्म यावत् सर्ववृत्तान्तमाचख्यौ । ततो दयालु निमित्तज्ञः **सिद्धार्थ** उवाच-'मुधा खेदं मा गाः, तव मनोरथं शीघ्रमेवैतौ **लवणा-ऽङ्कुशौ** पूरयिष्यतः । तेनैवमाश्वासिता **सीता** सानुनयं तं स्वपुत्राध्यापनाय स्वगृह एव धारयामास । स च **सिद्धार्थो** भव्याविति सर्वाः



कलास्तौ तथाऽध्यापयामास यथा तौ देवानामपि दुर्जयावभूताम् । एवं तावधीतसकलकलौ यौवनं प्रपेदाते ।

ततो **वज्रजङ्घो लवणे**न **लक्ष्मीवती**कुक्षिजां **शशिचूलां** पुत्रीं द्वात्रिंशतमन्या अपि च कन्या उदवाहयत् । **अङ्कुशा**य च स **पृथ्वीपुर**पतेः **पृथु**नृपाद**मृतवती**कुक्षिजां **कनकमालिकां** ययाचे । किन्त्वज्ञातवंशाय पुत्री कथं दीयतामिति तेनोक्तः क्रोधात् तमभ्यषेणयत् । ततः तत्पक्षाश्रितं **व्याघ्ररथं** युद्धे बद्ध्वाऽग्रहीत् । ततः **पृथुः** स्वमित्रं **पोतन**पतिं साहाय्यायाऽऽजुहाव । **वज्रजङ्घो**ऽपि स्वपुरुषैर्युधि स्वपुत्रानानाययत् । तैर्वार्यमाणावपि च **लवणा-ऽङ्कुशा**वपि चलितौ । ततोऽन्येद्युर्द्वयोः सैन्ययोर्युद्धे प्रवृत्ते **पृथु**-सैन्यैर्**वज्रजङ्घ**सैन्यं पराजितम् । तेनाऽतिक्रुद्धौ **लवणा-ऽङ्कुशौ** निरङ्कुशौ गजाविवाऽधावताम् । ताभ्यां चौजस्विभ्यां यावत् **पृथुः** ससैन्योऽपि नाऽभज्यत तावदेवमूचे-'अपरिज्ञातवंशाभ्यामप्यावाभ्यां ख्यातवंशा यूयं कथं पलायध्वे ?'

तच्छ्रुत्वा निवृत्त्य **पृथु**रुवाच-'अनेन विक्रमेण मया युवयोर्वंशो व्यज्ञायि' । एवमुक्त्वा स तदैवाऽ**ङ्कुशा**य **कनकमालां** प्रदाय **वज्रजङ्घे**न सह सन्धिं चकार । शिबिरं न्यस्य तत्र स्थिते **वज्रजङ्घे** च **नारदः** समाजगाम । तेन सत्कृत्य **पृथु**प्रतिज्ञातम**ङ्कुशा**य कन्यादानमूचे च । तथा **लवणा-ऽङ्कुश**योर्वंशं **पृथु**तोषायाऽऽख्याहीति प्रार्थितश्च । ततो **नारदो** विहस्य भगवन्त**मृषभ**मारभ्य लोकापवादात् **सीता**त्यागान्तं सर्वमुदन्तं शशंस । तच्छ्रुत्वा हसित्वाऽ**ङ्कुश** उवाच-'**अयोध्ये**तः कियद् दूरे ?' षष्ट्यधिकं शतयोजनमिति मुनिनोक्तश्च तत्र गत्वा **राम-लक्ष्मणौ** द्रष्टुं **वज्रजङ्घ**मुवाच ।

**वज्रजङ्घो**ऽपि तद्वाचं प्रतिपद्य तं **कनकमाल**या समहोत्सवं पर्यणाययत् ।

ततो **वज्रजङ्घ-पृथु**भ्यां समन्वितौ **लवणा-ऽङ्कुशौ** बहून् देशान् साधयन्तौ **लोकपु**रमीयतुः । ततो युद्धे तन्नृपं **कुबेरकान्तं** जित्वा **लम्पाक**देशेषु तन्नृप**मेककर्णा**ख्यं **विजयस्थल्यां भ्रातृशता**ख्यं च नृपं वशगं विचक्राते । ततो **गङ्गामु**त्तीर्य **कैलास**स्योत्तरां दिशं गच्छन्तौ **नन्दनचारू**णां देशानां जयं विधाय **ऋष-कुन्तला**दींश्च देशानधिकृत्य **सिन्धोः** परकूलं प्राप्याऽऽर्या-ऽनार्यांश्च नृपान् साधयामासतुः । ततो निवृत्त्य **पुण्डरीक**पुरमेत्य स्वगृहं नागरैः प्रशस्यमानौ प्रविश्य **सीता**याश्चरणौ प्रणेमतुः । **सीता** च तयोः साशिषं मूर्ध्नि चुचुम्ब ।

❀ ❀ ❀

अथ तौ **वज्रजङ्घ**मूचतुः-'त्वया सहाऽ**योध्या**ऽभियातव्या, ततोऽनुतिष्ठ, तथा **लम्पाक-ऋषा**दिनृपान् आज्ञापय । येनाऽद्या-ऽऽवयोर्माता त्यक्ता तस्य विक्रमः प्रेक्षणीयः'।

तच्छ्रुत्वा रुदती वारयन्ती च **सीतो**चे-**रावण**स्य हन्तारौ देवैरपि दुर्जयौ **राम-लक्ष्मणौ** पूज्यौ विनयादेवाऽवलोकनीयौ' । ततस्तावूचतुः-'त्वत्त्यागिनि शत्रुभूते को विनयः ? तव पुत्रावावा-मिति लज्जाकरं वचो गत्वा तस्याऽग्रे कथं स्वयं कथयिष्यावः ? तस्य पितुरपि कुलद्वययशस्करं युद्धाह्वानमेव युज्यते' । एवमुक्त्वा तौ ससैन्यानुपा**योध्यं** योद्धुकामावूषतुः । द्विषद्बलं पुराद् बहिरायातं श्रुत्वा च विस्मितौ कृतस्मितौ च **राम-लक्ष्मणौ** । ततो **लक्ष्मणः** केऽमी मर्त्तुकामाः समापेतुरित्युक्त्वा **रामे**ण सह **सुग्रीवादि**भिः परिवृतो युद्धे चचाल ।



इतश्च **भामण्डलो नारदा**त् तच्छ्रुत्वा **सीता**मुपेत्य सर्वं वृत्तं विज्ञाय त्वत्त्यागमिव रभसा पुत्रयोर्वधं **राघवौ** मा कार्ष्टामित्युक्त्वा तां स्वविमानेऽधिरोप्य **लवणा-ऽङ्कुशयोः** स्कन्धावारं जगाम । ताभ्यां च मातुलोऽयमिति **सीत**या कारितपरिचयाभ्यां नमस्कृतस्तौ शिरसि चुम्बित्वाऽङ्कमधिरोप्य च सहर्षमूचे-'मम भगिनी वीरपत्नी सम्प्रति युवाभ्यां वीरसूरपि, वीरपुत्रौ वीरौ युवां पितृ-पितृव्याभ्यां युद्धं मा कार्ष्टम् । **रावण**स्याऽपि हन्त्रोस्तयोर्युवाभ्यां युद्धं कथम्?'

तच्छ्रुत्वा तावूचतुः-'स्वसेव कातरं वचो मा वोचः । तातयोर्न कोऽपि प्रतिमल्ल इत्यावामपि विद्वहे, तद्युद्धं त्यक्त्वा तयोर्ह्रिये कथं भविष्यावः ?' एवं ब्रुवतोरेव तयोर्द्वयोः सैन्ययोर्युद्धं प्रववृते । **भामण्डल**श्च **सुग्रीवा**द्यैर्विद्याधरैरनयोर्भूचरं सैन्यं हतं स्यादिति शङ्कया युधि ययौ । तौ कुमारावपि च युद्धायोत्तस्थाते । **सुग्रीवा**द्या विद्याधराश्च युध्यमाना युधि **भामण्डलं** दृष्ट्वा काविमाविति पप्रच्छुः । ततो **राम**पुत्राविमाविति विज्ञाय गत्वा **सीतां** प्रणम्य भुवि समुपविविशुः ।

इतश्च वीरौ **लवणा-ऽङ्कुशौ** क्षणेनाऽपि **राम**सैन्यं हतविद्रुतं विधाय **रामं लक्ष्मणं** चेयतुः । तौ दृष्ट्वा चाऽन्योन्यमूचतुः-'काविमौ ? निसर्गादनयोर्मनः स्निह्यति' । एवमुक्तवन्तं **रामं लवणो लक्ष्मणं** चा**ऽङ्कुशो**ऽवोचताम्-'**रावण**स्याऽपि जेतारं वीरयुद्ध-श्रद्धालुरहं त्वां दिष्ट्याऽद्राक्षम् । **रावणे**नाऽप्यपूरिता ते युद्धेच्छैष पूरयिष्यामि । त्वं च मम तत् पूरयिष्यसि' । ततो **राम-लक्ष्मणौ लवणा-ऽङ्कुशौ** च स्वं स्वं धनुरास्फालयामासुः । ततो **राम**स्य **कृतान्तवदनो लवण**स्य **वज्रजङ्घो लक्ष्मण**स्य **विराधो**ऽ**ङ्कुश**स्य

च **पृथुः** सारथयो रथं चतुरं भ्रमयामासुः । ते च चत्वारो द्वन्द्वयोधिनो विविधं प्रजह्रुः ।

तत्र **रामो** विविधैरायुधैर्युद्ध्वा युद्धान्तेच्छू रथमरिं प्रति वाह्येत्युक्तवान् । ततोऽश्वो न शक्तोऽहमपि च द्विषो बाणाघातैरसमर्थ इति सारथिनोक्तो **रामो**ऽप्यभाषिष्ट-'ममाऽपि वज्रावर्त्तं धनुः शिथिलायते, मुशलरत्नं हलरत्नं चाऽपि शत्रुदलनेऽक्षमं जातम् । सदा शत्रुनाशकानां ममाऽस्त्राणां केयं दुरवस्था सम्प्राप्ता ?' एवमेवाऽ**ङ्कुशे**न युद्ध्यमानस्य **लक्ष्मण**स्याऽपि मोघास्त्रता जाता । अत्राऽवसरे च **लक्ष्मणो**ऽ**ङ्कुशे**नोरसि बाणेन ताडितो मूर्च्छितो रथेऽपतत् । रथमादायाऽ**योध्यां** प्रति चलिते **विराधे** च लब्धसंज्ञः साक्षेपमूचे-'**विराध** ! किं नवमकृथाः ? वीरस्यैतदनुचितम् । तद्रथं शीघ्रं तत्रैव नय, यथा चक्रेण द्विषः शिरश्छिनद्मि । एवमुक्तो **विराधो**ऽ**ङ्कुशं** प्रति रथमानैषीत् ।

**लक्ष्मण**श्च तिष्ठ तिष्ठेति वदन् चक्रं गृहीत्वा भ्रमयित्वा चाऽ**ङ्कुशा**य मुमोच । अस्त्रैर**ङ्कुशेना**ऽनेकशस्ताडितमपि सर्वात्मनाऽप्रतिहतं तच्चक्रं वेगेनाऽऽपत्याऽ**ङ्कुश**स्य प्रदक्षिणां विधाय पक्षी स्वनीडमिव पुन**र्लक्ष्मण**हस्तौ समागात् । तेन पुनर्मुक्तमपि तच्चक्रं तथैव पुनस्तत्पाणिमेवाऽऽगमत्। ततो विषण्णौ **राम-लक्ष्मणौ**-'किमावां न, किन्त्विमावेव बलभद्र-वासुदेवावि'ति दध्यतुः ।

अत्राऽवसरे **नारदः सिद्धार्थे**न सह तत्रोपेत्य खिन्नं स**लक्ष्मणं राम**मुवाच-'हर्षस्थाने किमयं विषादः ? पुत्रात् पराजयो हि वंशोद्योतनाय । इमौ न शत्रू, किन्तु **सीता**कुक्षिजन्मानौ पुत्रौ **लवणा**ऽ**ङ्कुशौ** त्वां द्रष्टुं युद्धव्याजेनाऽत्राऽऽगतौ । तत्रेदमभिज्ञानं यच्चक्रं



नाऽनयोः प्रबभूव । पुरा **भरत**स्य चक्रमपि **बाहुबलौ** मुधाऽभूत् । ततो **नारदः** पुनः **सीता**यास्त्यागमारभ्य पुत्रयुद्धान्तं सर्वं वृत्तमाशशंस । **राम**श्च तच्छ्रुत्वा विस्मय-लज्जा-खेद-मोदसमाकुलो मूर्च्छितश्चन्दनजलेन सिक्तो लब्धसंज्ञ उदश्रु**र्लक्ष्मणे**न सह पुत्रवात्सल्यात् तयोरन्तिकं जगाम । तौ च **लवणा-ऽङ्कुशौ** विनीतौ सद्यो रथादवतीर्य निरस्त्रौ पितृ-पितृव्ययोः पादेषु पेततुः ।

**राम**श्च तावालिङ्ग्य क्रोडे कृत्वा शिरसि चुम्बन् शोकस्नेहसमाकुल उच्चै रुरोद । **लक्ष्मण**श्चाऽपि तौ निजोत्सङ्गमारोप्य शिरसि चुम्बन् साश्रुर्बाहुभ्यां परिरेभे । एवमेव **शत्रुघ्नो**ऽपरे च नृपाः प्रमोदन्ते स्म। **सीता** तु पुत्रयोर्विक्रमं पित्रा सह तयोः सङ्गमं च दृष्ट्वा हृष्टा विमानेन **पुण्डरीक**पुरं ययौ । **वज्रजङ्घ**नृपोऽपि **भामण्डला**ख्यातो **राम-लक्ष्मणौ** पत्तिरिव ननाम । **राम**श्च त्वं मे **भामण्डल**समोऽसि, यो मे पुत्राववर्धयस्त्वमिमामवस्थामनैषीश्चेत्युक्त्वा **पुष्पका**रूढस्ताभ्यां पुत्राभ्यां सह पुरीं प्रविश्य नागरैर्दृश्यमानः स्तूयमानश्च गृहं गत्वोत्ततार, महान्तमुत्सवं च कारयामास ।

❀ ❀ ❀

अथ **रामं लक्ष्मण-सुग्रीवा**द्याः सम्भूय व्यजिज्ञपन्-'त्वया विरहिता परदेशे स्थिता **सीता**ऽमूभ्यां कुमाराभ्यां विनाऽतिकष्टेन जीवति, यद्यादिशसि, तर्ह्यद्य तामिहाऽऽनयामः, अन्यथा पति-पुत्रवियुक्ता सा विपत्स्यते' । ततो **रामः** किञ्चिद् विचार्योवाच-'**सीता**या आनयने लोकापवादो महाविघ्नः । **सीता** सतीति जाने। ततस्सा सर्वलोकसमक्षं दिव्यं करोतु, शुद्ध्या च तया सह मे पुनर्गृहवासो-ऽस्तु' । तत एवमस्त्वित्युदित्वा पुर्या बहिर्मण्डपान्

तदन्तर्मञ्चश्रेणीश्च कारयामासुः । तेषु च भूपा नागरादयश्चो-पाविशन् । **सुग्रीव**श्च **रामा**ज्ञयोत्थाय स्वयं **पुण्डरीक**पुरे गत्वा नत्वा च **वैदेही**मुवाच-'त्वत्कृते **रामे**ण प्रेषितं **पुष्पक**मधिरुह्य **राम**समीपमुपैहि' ।

ततः **सीत**याऽरण्यत्यागदुःखं मेऽद्याऽपि न शाम्यति, तत् पुनर्दुःखान्तरप्रदं **रामं** कथं यामीत्युक्तः पुनर्नत्वा तव शुद्धये पौरादिभिः सह **राघवो** मञ्चारुढोऽस्तीत्युक्तवान् । ततः पूर्वत एव शुद्धिकाङ्क्षिणी **जानकी** विमानमारुह्याऽ**योध्यां** जगाम । **माहेन्द्रोदयो**द्यानं प्राप्य च तत उत्ततार । **लक्ष्मणे**नोपेत्य दत्तार्घा च नृपैरपि नमश्चक्रे । ततः सनृपो **लक्ष्मण** उवाच-'देवि ! निजां पुरीं निजं गृहं च प्रवेशात् पावय' । प्राप्तशुद्धिरिमां पुरीं गृहं च प्रवेक्ष्यामि, नाऽन्यथाऽपवादः शाम्यतीति **सीता**प्रतिज्ञां भूभुग्भिर्विज्ञाय **रामो**ऽप्युपेत्य **जानकीं** न्यायनिष्ठुरमुवाच-'तद्गृहे वसन्त्या **रावणे**न चेद् न भुक्ता तदा सर्वलोकानां समक्षं दिव्यं कुरु' ।

ततः **सीतो**वाच-'त्वत्तः परोऽपरो न विज्ञः । किन्तु मे दोषमज्ञात्वा महावने मामत्यजः । पूर्वं दण्डं विधाय पश्चात् परीक्षणं करोषि, तथाऽपि तत्राऽऽरुढाऽहम्' । तेन विलक्षो **राम** उवाच-'न ते दोषोऽस्तीति जाने, किन्तु जनापवादनिवारणायेदमुच्यते' । ततः **सीतो**वाच-'मया दिव्यपञ्चकं वह्निप्रवेश-मन्त्रिततण्डुलभक्षण-तुलारोहण-तप्तकोशपान-फालग्रहणरूपं स्वीकृतम्' । अत्राऽवसरे नभःस्थः **सिद्धार्थो नारदो** लोकश्च तुमुलं निवार्योवाच-'भो ! **राम** ! **सीते**यं निश्चयेन महासती । तदत्र संशयं जातुचिद् नाऽकार्षीः' । ततो **राम** उवाच-'लोकाः ! काऽपि मर्यादा वो नाऽस्ति, यद्दोषमुद्भाव्य युष्माभिरेवेयं पुरा दूषिता, पुरतश्चाऽन्यद्



ब्रूध्वे। स तदा कथं सदोषाऽधुना च निर्दोषा जाता ? तत्प्रत्ययाय **सीता** वह्निं प्रविशतु' । एवमुक्त्वा **रामो** हस्तशतत्रयं गर्तं खानयित्वा पुरुषद्वयदघ्नं चन्दनेन्धनैरपूरयत् ।

अत्राऽवसरे च **वैताढ्यो**त्तरश्रेणिवर्त्तिनो **हरिविक्रम**नृपस्य कुमारोऽष्टशतनारीपति**र्जयभूषणः** **किरणमण्डला**ख्यां पत्नीं **हेमशिखा**ख्येन मातुलेन समं सुप्तां दृष्ट्वा तां निर्वास्य स्वयं प्राव्रजत् । सा **किरणमण्डला**ऽपि विपद्य **विद्युद्दंष्ट्रे**ति राक्षसी जाता। **जयभूषण**श्चाऽ**योध्या**या बहिरेत्य प्रतिमया तस्थौ । तं च सा राक्षस्युपाद्रवत् । तन्मुनेः केवले समुत्पन्ने चोत्सवार्थं शक्रादयः समाजग्मुः । देवाश्च **सीता**यास्तत् प्रेक्ष्य शक्रमाहुः-'लोकस्य मुधा-ऽपवादेनाऽद्य **सीता** वह्नौ प्रवेक्ष्यति' । ततः इन्द्रः पत्त्यनीकपतिं **सीता**सामीप्यायाऽऽदिश्य स्वयं मुनेः केवलज्ञानोत्सवं चकार ।

अथ **राम**स्य निदेशाद् भृत्याश्चन्दनभृतं तद्गर्त्तं परितो ज्वालयामासुः । तमग्निं दृष्ट्वा **रामो** दध्यौ-'अहो ! अत्यन्तविषमं ममेदं समुपस्थितं यदियं महासती निःशङ्का नूनमग्निं प्रवेक्ष्यति, भाग्यस्येव दिव्यस्य विषमागतिः । मया सहाऽस्या निर्वासो, **रावणे**न हरणं, वने त्यागो भूयश्चैतद् मया कृतम्' । एवं चिन्तयति **रामे सीतो**पाग्नि स्थित्वा सर्वज्ञं स्मृत्वा च सत्यापनं चक्रे-'सर्वे श्रृण्वन्तु, यद्यहं **रामा**दन्यमचीकमे, तदाऽयमग्निर्मां दहतु, अन्यथा तु जलमिवाऽयं सुखस्पर्शो भवतु' । एवमुक्त्वा सा स्मृतनमस्कारा तस्मिन् वह्नौ झम्पां ददौ । किन्तु यावत् सा प्रविशति तावदग्नि-र्विध्यातः, गर्तश्च स्वच्छसलिलसम्भृतो वापीभावमापन्नः । **सीता** च जले कमलोपरि सिंहासनस्थिता लक्ष्मीव देवप्रभावतो बभौ ।

अत्राऽवसरे च समुद्रजलमिव सर्वतः सावर्त्तमुच्छलद् वाप्या जलमुञ्चानपि मञ्चानाप्लावयितुमारेभे । विद्याधराश्च भयोद्भ्रान्ताः समुत्पत्य नभसीयुः । भूचराश्च 'महासति **सीते** ! पाही'ति चुक्रुशुः । **सीता** चोच्छलितं तदम्भः पाणिभ्यामवालयत् । तत्प्रभावतश्च तज्जलं पुनर्वापीप्रमाणमभूत् । सा वापी चोत्पलादिभिः शोभिता मणिसोपान-मनोहरा रत्नबद्धोभयतटा च जाता । **नारदा**द्याश्च नभसि **सीता**शील-प्रशंशिनो ननृतुः पुष्पाणि ववृषुश्च । अहो ! **राम**पत्न्या यशस्करं शीलमिति महान् लोकप्रघोषोऽभूत् । **लवणा**-ऽ**ङ्कुशौ** च मातु-स्तत्प्रभावं दृष्ट्वा प्रमुदितौ हंसाविव तरन्तौ तत्समीपमाप्तौ **जानक्या** मूर्ध्न्याघ्राय पार्श्वयोरुपवेशितौ । **लक्ष्मणा**दयश्च गत्वा **सीतां** सभक्ति नमश्चक्रुः ।

**राम**श्च **सीता**मुपगम्य पश्चात्ताप-लज्जानतो रचिताञ्जलि-रुवाच-'स्वभावादप्यसद्दोषोद्घोषकाणां नागराणामनुरोधात् त्यक्ताऽसि, देवि ! तत् सहस्व । वने त्यक्ता च स्वप्रभावत एव त्वमजीवः । एकं दिव्यमासीत्, तदप्यहं नाऽज्ञासिषम् । मम तत् सर्वं क्षान्त्वा **पुष्पक**मध्यास्य वेश्म गत्वा प्राग्वद् मया सह रमस्व' ।

ततः **सीतो**चे-'न ते न वा लोकस्य कश्चन दोषः, किन्तु मत्पूर्वकर्मणामेव । तत्तादृशकर्मोच्छेदकारिणीं प्रव्रज्यामेव निर्विण्णा ग्रहीष्यामि' । एवमुक्त्वा सा स्वमुष्टिना केशानुत्खाय जिनेश्वरः शक्रस्येव **राम**स्याऽर्पयामास । तेन मूर्च्छितश्च **रामो** यावद् नोत्तस्थौ तावत् **सीता जयभूषण**मुनेरन्तिकं ययौ । स मुनिश्च **जानकीं** विधिवद् दीक्षित्वा **सुप्रभा**ख्यगणिनीपरिवारे तां तपःपरायणां चकार ॥ ९ ॥

*इति सीताशुद्धि-व्रतग्रहणवर्णनात्मको नवमः सर्गः ॥९॥*

## दशमः सर्गः

अथ **रामं** चन्दनजलेन सिक्तं लब्धसंज्ञं 'क्व **नु सीता,** लुञ्चितकेशामपि तां मे प्रियां दर्शयत यदि यूयं न मुमूर्षवः, दुःस्थिते मयि किं यूयं सुस्थिता' इत्युक्त्वा चापं गृह्णन्तं तं नत्वा **लक्ष्मणो**ऽब्रवीत्-'आर्य ! किमिदं, लोकः खलु तव किङ्करः । यथा त्वं दोषभीतः **सीता**मत्याक्षीः, तद्यथा सा भवभीता सर्वमत्यजत् । भवतः प्रत्यक्षमेवैतत् सा केशान् स्वयमुत्पाट्य **जयभूषण**-मुनिसमीपे विधिवद् दीक्षां जग्राह । तस्य मुनेश्चेदानीमेव केवलमुत्पन्नम् । तज्ज्ञानमहिमा तवाऽप्यवश्यकर्त्तव्योऽस्ति । **सीता**ऽपि व्रतिनी सतीमार्गमिव मुक्तिमार्गं दर्शयन्ती तत्रैवाऽऽस्ते' ।

ततो **रामः** स्वस्थः सन्नुवाच-'मम प्रिया परिव्रज्यामाददे तत् साधु'। एवमुक्त्वा सपरिवारः केवलिनं **जयभूषण**मुपगम्य नत्वा देशनां श्रुत्वाऽन्ते च पप्रच्छ-'भगवन् ! अहमात्मानं भव्यमभव्यं वा न वेद्मि, तदाख्याहि, प्रसीद' । ततः केवलिना 'त्वं भव्योऽसि, अनेनैव जन्मनोत्पन्नकेवलः सिद्धिं यास्यसी'त्युक्तः पुनरपि स पप्रच्छ-'प्रव्रज्यया मोक्षः, सा च सर्वत्यागेन, किन्तु **लक्ष्मणो** मम दुस्त्यजः' । ततो मुनिराह-'तव बलसम्पदोऽवश्यं भोक्तव्याः, अन्ते च सङ्गं त्यक्त्वा प्रव्रज्य मोक्षमेष्यसि' । ततो **विभीषणो** नत्वाऽपृच्छत्-'केन कर्मणा **रावणः सीता**मपजहार, **लक्ष्मण**श्च तं

जघान। तथा **सुग्रीव-भामण्डल-लवणा-ऽङ्कुशाः** अहं च केन कर्मणा **रामे**ऽनुरक्ताः ?' ततो मुनिः प्राह-

अथ **भरतार्धे** दक्षिणे **क्षेमपुरे** नगरे **नयदत्त**स्य वणिजः **सुनन्दा**कुक्षिजन्मानौ **धनदत्त-वसुदत्तौ** पुत्रावभूताम् । तयोश्च **याज्ञवल्क्यो** द्विजो मित्रमभूत्। तस्मिन्नेव पुरे च वणिजः **सागर-दत्त**स्य **गुणधरः** पुत्रः पुत्री च **गुणवत्या**स्ताम् । **सागरदत्ते**न **धनदत्ता**य दत्ता **गुणवती** । तन्मात्रा **रत्नप्रभ**या च साऽर्थलोभतः **श्रीकान्ता**येभ्याय गुप्तं दत्ता । **याज्ञवल्क्य**स्तु तज्ज्ञात्वा स्वमित्रयो-राख्यत्। ततो **वसुदत्तो** निशि गत्वा **श्रीकान्त**मवधीत्। **श्रीकान्ते**ना-ऽपि च खड्गेन **वसुदत्तो** हतः। तौ च **विन्ध्या**टव्यां कुरङ्गौ जातौ। **गुणवत्य**पि मृत्वा तत्र मृगी जाता। तस्याः कृते तत्राऽपि तौ युद्ध्वा विपद्य परस्परवैरेणैवं बहून् भवान् भ्रेमतुः ।

**धनदत्त**श्च भ्रातृवधपीडितो निर्धर्मो भ्रमन् रात्रौ क्षुधितः साधून् दृष्ट्वा भोजनं ययाचे। तेष्वेको मुनिर्जगाद-दिवाऽपि मुनीनां भक्तादिसङ्ग्रहो न भवति, तवाऽपि च रात्रौ भोजनादिकं नोचितम्। ईदृशेऽन्धकारेऽन्नादौ जीवसंपर्कं को वेत्ति ?' एवं तेन बोधितः स श्रावको भूत्वा विपद्य **सौधर्मे** त्रिदशो भूत्वा ततश्च्युत्वा **महापुर**नगरे **मेरो-र्धारणी**कुक्षिजन्मा नाम्ना **पद्मरुचिः** श्रेष्ठी परमश्रावको-ऽभवत्। स चैकदाऽश्वारूढो गोकुलं गच्छन् जरवृषभं पथि पतितं मुमूर्षुं दृष्ट्वा कृपयोत्तीर्य तस्य कर्णमूले पञ्चपरमेष्ठिनमस्कारं ददौ। स वृषभश्च विपद्य नमस्कारप्रभावात् तत्रैव **छत्रच्छाय**नृपस्य **श्रीदत्ता**कुक्षिजो **वृषभध्वजो** नाम पुत्रो बभूव ।

स्वेच्छया भ्रमंश्च तां जरद्वृषभभूमिं गतः प्राग्जन्मस्थान-दर्शनाज्जातिस्मरणमाप्य तत्र चैत्यमकारयत्। तस्यैकभित्तौ तं मुमूर्षुं



जरद्गवं तत्कर्णान्ते नमस्कारदायिनं तं पुरुषं तत्समीपे सपर्याणं हयं च लेखयित्वाऽऽरक्षानादिशत्-'यः परमार्थतश्चित्रं विदन् दृश्येत स शीघ्रं मम ज्ञाप्यः' । एवमुक्त्वा स स्वं वेश्म ययौ। तत्र चैकदा वन्दनायाऽऽगतः **पद्मरुचिः** श्रेष्ठी जिनं वन्दित्वा भित्तिचित्रं दृष्ट्वा सर्वमेतद् मम सम्वदतीति विस्मित उवाच। आरक्षैस्तद् विज्ञाय च **वृषभध्वज**स्तत्रोपेत्य किं चित्रवृत्तान्तं वेत्सीति तं **पद्मरुचि**म-पृच्छत्। स च पुरा गवेऽस्मै मुमूर्षवे नमस्कारदानं, तत्केना-ऽप्यभिज्ञेनेह लिखितोऽस्मीत्युवाच ।

ततो **वृषभध्वज**स्तं नत्वोवाच-'योऽयं जरद्गवः सोऽहं नमस्कारप्रभावतो राजपुत्रोऽभवं, त्वमनेन प्रकारेण महान् कृपालुरसि, अन्यथा तिर्यग्योनेर्मम का गतिर्भवेत्? ततस्त्वं सर्वथा मे गुरुः स्वामी दैवतं चाऽसि, सर्वमिदं मम प्राज्यं राज्यं भुङ्क्ष्व'। एवमुक्त्वा स **वृषभध्वजः पद्मरुचि**ना सहैव श्रावकव्रतं पालयन् विजहार। चिरं श्रावकत्वं पालयित्वा विपद्य **चेशान**कल्पे महर्द्धिकौ देवौ जातौ । ततश्च्युत्वा च **पद्मरुचिर्मेरोः** पश्चिमतो **वैताढ्ये नन्दावर्ते** नगरे **कनकाभा**कुक्षिजो **नन्दीश्वर**तनयो **नयनानन्द**नामा-ऽभूत्। तत्र राज्यं भुक्त्वा परिव्रज्य **माहेन्द्रे** देवो जातः। ततश्च्युत्वा च **प्राग्विदेहे**षु **क्षेमा**पुर्यां **विपुलवाहन**नृपस्य **पद्मावती**कुक्षिजन्मा **श्रीचन्द्रो** नाम तनयो जातः । राज्यं भुक्त्वाऽन्ते **समाधिगुप्त**स्य मुनेरन्तिके प्रव्रज्य **ब्रह्म**लोकेन्द्रो जातः । ततश्च्युत्वा चाऽयं **रामो** बलभद्रो जातः । **वृषभध्वज**जीवश्चैष **सुग्रीवः** ।

**श्रीकान्त**जीवश्च **मृणालकन्द**नगरे **शम्भो**र्नृपस्य **हेमवती**भवो **वज्रकण्ठो** नाम तनयो बभूव । **वसुदत्त**जीवश्च **शम्भु**नृप-पुरोहितस्य **विजयस्य रत्नचूडा**कुक्षिजन्मा **श्रीभूतिः** पुत्रो बभूव।

**गुणवत्य**पि तस्य **श्रीभूतेः सरस्वती**कुक्षिभवा **वेगवती** नाम तनया जाता। सा प्राप्तयौवना प्रतिमास्थं जनैर्वन्द्यमानं **सुदर्शनं** मुनिं निरीक्ष्य सोपहासमवदत्-'अहो ! अयं साधुः पुरा स्त्रिया सह क्रीडन् दृष्टः, साऽन्यत्राऽनेन प्रेषिता, तं कथं वन्दध्वम् ?' तच्छ्रुत्वा च सर्वोऽपि लोकः कलङ्कोद्घोषपूर्वकं तं मुनिं विप्लावयितुमारेभे। स मुनिश्च यावदयं कलङ्को नोत्तरिष्यति तावत् प्रतिमां न पारयिष्यामीत्यभिजग्राह। ततश्च देवतारोषाद् **वेगवत्या** मुखमुच्छूनं (सशोथं) जातम्। साधुवृत्तान्तं ज्ञात्वा च पित्राऽपि भृशं निर्भर्त्सिता। सा च पितू रोगाच्च भीता तस्य मुनेरग्रे सर्वलोकसमक्षमुच्चैरुवाच-'त्वं सर्वथा निर्दोषोऽसि, दोषोऽयमलीको मयैवाऽऽरोपितः, तत् क्षमस्व'। तच्छ्रुत्वा च लोकस्तं मुनिं पुनरप्यानर्च। **वेगवती** च तत्प्रभृति श्राविका जाता। **शम्भु**नृपश्च तां रूपवतीं दृष्ट्वा ययाचे। **श्रीभूति**श्च मिथ्यादृशे नैषा दातव्येति तं प्रत्युवाच। **शम्भु**श्च तं निहत्य तां बलाद् बुभुजे। सा च भवान्तरे ते वधाय भूयासमिति शापं दत्तवती। **शम्भु**ना विमुक्ता च सा **हरिकान्ता**व्रतिनीपार्श्वे प्रव्रज्य विपद्य **ब्रह्म**लोकं ययौ।

ततश्च्युत्वा च सा **शम्भु**जीवस्य **रावण**स्य वधाय पूर्वनिदानवशाज्जाता **सीतेयं जनकनन्दिनी**। तस्याः **सुदर्शन**मुनेरलीकदोषारोपाल्लोकेनाऽलीकोऽयं कलङ्कोऽधिरोपितः। **शम्भु**जीवश्च भवं भ्रान्त्वा **कुशध्वज**द्विजस्य **सावित्र्यां प्रभासो** नाम नन्दनो भूत्वा **विजयसेन**मुनेरन्तिके प्राव्राजीत्। एकदा च **सम्मेत**यात्रां प्रस्थितं विद्याधरेन्द्रं परमर्द्धिकं **कनकप्रभं** दृष्ट्वाऽनेन तपसाऽहमीदृक् परमर्द्धिर्भूयासमिति निदानं व्यधात्। ततो विपद्य



तृतीयकल्पे समुत्पद्य ततश्च्युत्वा विद्याधरेन्द्रस्तवाऽग्रजोऽभूत्। **याज्ञवल्क्य**श्च भवं भ्रान्त्वा त्वं **विभीषणो**ऽभूः।

**श्रीभूति**श्च नृपेण हतो दिवं गत्वा च्युत्वा **सुप्रतिष्ठ**पुरे विद्याधरः **पुनर्वसु**र्जातः। स च कामार्त्तः **पुण्डरीक**विजये **त्रिभुवनानन्द**चक्रिणः कन्या**मनङ्गसुन्दरी**मपजहार। चक्रिप्रेषितैर्विद्याधरैर्युध्यमानस्य तस्य विमानाद**नङ्गसुन्दरी** क्वाऽपि निकुञ्जे पपात। **पुनर्वसु**श्च प्रव्रज्य तत्प्राप्त्यै निदानं कृत्वा विपद्य दिवं गत्वा च्युत्वा चाऽयं **लक्ष्मणो** जातः। **अनङ्गसुन्दरी** च वने स्थितोग्रं तपः कुर्वन्ती विहितानशनाऽजगरेण जग्रसे। समाधिना मृत्वा सा द्वितीये कल्पे देवीभावमाप्य ततश्च्युत्वा **विशल्या लक्ष्मण**स्य महिष्यभूत्। **गुणवती**भ्राता **गुणधर**श्च भवं भ्रान्त्वा **कुण्डलमण्डितो** राजपुत्रो भूत्वा चिराय श्रावकत्वं पालयित्वा विपद्यैष **भामण्डलो** बभूव।

इतश्च **काकन्द्यां वामदेव**द्विजस्य **श्यामला**कुक्षिजातौ **वसुनन्द-सुनन्दनौ** द्वौ पुत्रावभूताम्। एकदा तयोर्गेहे स्थितयोर्मासोपवासी मुनिराययौ। स च ताभ्यां भक्तितः प्रतिलम्भितः। तद्दानधर्मेण स विपन्न **उत्तरकुरु**षु युग्मिनौ भूत्वा विपद्य **सौधर्मे** सुरौ जातौ। ततः च्युत्वा **काकन्द्या**मेव **रतिवर्धन**नृपस्य **सुदर्शना**यां **प्रियङ्कर-शुभङ्करौ** तनयौ अभूतौ। चिरं राज्यं पालयित्वा विपद्य **ग्रैवेयके** सुरौ भूत्वा च्युत्वा चेमौ **लवणा-ऽङ्कुशौ** जातौ। तयोर्माता **सुदर्शना** च चिरं भवं भ्रान्त्वा **सिद्धार्थ** एष तयोरध्यापकः।' एवं मुनिवचः श्रुत्वा बहवः संवेगं ययुः। तदैव च **राम**चमूपतिः **कृतान्तवदनः** प्राव्राजीत्।

❋ ❋ ❋

अथ **रामो जयभूषणं** प्रणम्य **सीताया:** समीपं गत्वा दध्यौ-'असौ सुकुमाराङ्गी कथं तपःक्लेशं सहिष्यते ? यद् वा यस्याः सतीत्वं भङ्क्तुं **रावणो**ऽपि नाऽलं सा व्रतेऽपि दृढप्रतिज्ञा भाविनी'। एवं विचार्य **सीतां** ववन्दे । अन्येऽपि च **लक्ष्मणा**दयस्तां ववन्दिरे । ततः सपरिवारो **रामो**ऽ**योध्यां** ययौ । **सीता-कृतान्तवदनौ** चोग्रं तपस्तेपाते । **कृतान्तवदन**श्च विपद्य **ब्रह्म**लोकं ययौ । **सीता** च षष्टिं वर्षाणि विविधं तपो विधाय त्रयस्त्रिंशदहोरात्रीमनशनं कृत्वा मृता च द्वाविंशतिसागरोपमायुर**च्युते**न्द्रोऽजायत ।

इतश्च **वैताढ्ये काञ्चनपुरे** नगरे विद्याधरेन्द्रः **कनकरथः** कन्ययो**र्मन्दाकिनी-चन्द्रमुख्योः** स्वयंवरे सपुत्रान् **राम-लक्ष्मणा**दीनाह्वयत् । भूपेषु तत्राऽऽसीनेषु च **मन्दाकिनी** स्वयं **लवणं चन्द्रमुखी** चाऽ**ङ्कुशं** वृतवती । तेन क्रुद्धा **लक्ष्मण**स्य पुत्राः सार्धे द्वे शते युद्धायोत्तस्थिरे । तच्छ्रुत्वा **लवणा-ऽङ्कुशा**वूचतुः-को नामैभिर्योत्स्यते ? भ्रातरौ ह्यवध्याः । यथा तातयोर्न कोऽपि भेदः, तथाऽस्माकमपि कोऽपि भेदो माऽस्तु' । **लक्ष्मण**पुत्राश्चरेभ्यस्तज्ज्ञात्वा विस्मिताः स्वं निनिन्दुः । संवेगमाप्ताश्च पितरावापृच्छ्य **महाबल**मुनेरन्तिके व्रतं जगृहुः । तदानीं कृतविवाहौ **लवणा-ऽङ्कुशौ** च **राम-लक्ष्मणा**भ्यां सहाऽ**योध्या**माजग्मतुः ।

इतश्च स्वपुरे हर्म्यतले स्थितो **भामण्डल**श्चिन्तयामास-'श्रेणिद्वयं वशे कृत्वाऽऽत्तदीक्षोऽन्ते विहृत्य पूर्णमनोरथः स्याम्' । एवं विचारयतश्च तस्य शिरसि दिवो विद्युत् पपात । तेन मृत्वा च स **देवकुरु**षु युगलधर्मिषु जातः ।

इतश्च **हनूमां**श्चैत्रे चैत्यवन्दनाय **मेरुं** गतस्ततो निवृत्तश्चाऽस्तं गच्छन्तं सूर्यं दृष्ट्वा दध्यौ-'यथोदयस्तथाऽस्तमपि भवत्येव, तत्राऽयं सूर्य एव दृष्टान्तः । सर्वमेव नश्वरम्' । एवं विचिन्त्य स्वपुरमागत्य राज्ये पुत्रं न्यस्य **धर्मरत्न**मुनिपार्श्वे सार्धसप्तशतनृपैः सह प्राव्राजीत् । तत्पत्न्यश्च **लक्ष्मीवती**व्रतिनीपार्श्वे दीक्षिता अस्थुः । **श्रीशैल**श्च ध्यानाग्निना कर्माणि भस्मसात् कृत्वा शैलेशीं प्राप्याऽव्ययं पदं जगाम।



**रामश्च हनूमन्तं** प्रव्रजितं ज्ञात्वा दध्यौ-'भोगसुखं हित्वा किमयं कष्टप्रदां दीक्षामाददे' । **सौधर्मे**न्द्रश्चाऽवधेस्तज्ज्ञात्वा सभायामूचे-'अहो ! कर्मगतिश्चित्रा, चरमदेहोऽपि **रामः** स्वयं धर्मं हसति, विषयजं सुखं च प्रशंसति । अथवा ज्ञातं, यदनयो **राम-लक्ष्मण**योः कोऽपि गाढतरः स्नेहः, यो भवानिर्वेदकारणम्'। ततः कौतुकाद् द्वौ देवौ तयोः स्नेहं परीक्षितम**योध्या**मागत्य **लक्ष्मण**स्य सद्मनि मायया सर्वमन्तःपुरं करुणस्वरमाक्रन्दद् दर्शयामासतुः । हा **राम**ेत्यादि बहु विलपन्तीरन्तःपुरवधूः प्रेक्ष्य विषण्णो **लक्ष्मणो**ऽवदत्-'मम जीवितस्याऽपि जीवितं भ्राता मृतः। छलघातिना कृतान्तेन किं कृतम् ? एवं वदतश्च **लक्ष्मण**स्य वचसा सह जीवितं निर्ययौ', तं च मृतं दृष्ट्वा मिथस्तौ सुरौ विषण्णावूचतुः-'अहो ! आवाभ्यां किमिदं कृतम् ! विश्वाधारोऽसौ नरः किमावाभ्यां हतः'! एवं स्वं निन्दन्तौ तौ स्वं कल्पं जग्मतुः ।

**लक्ष्मणं** च मृतं दृष्ट्वा तदन्तःपुरस्त्रियः सपरीवाराश्चक्रन्दुः । तच्छ्रुत्वा च **राम**स्तत्रोपेत्योवाच-'अज्ञानात् किममङ्गलमारब्धम् ? अहं जीवन्नेवाऽस्मि, ममाऽनुजोऽप्येष जीवत्येव । कोऽपि रोगोऽमुं बाधते, तत्प्रतिक्रिया विधेया' । एवमुक्त्वा स वैद्यान् निमित्तज्ञांश्चाऽऽहूय मन्त्र-तन्त्राणां प्रयोगं कारयामास । तद्वैफल्ये च मूर्च्छां प्राप्य कथञ्चिल्लब्धसंज्ञो **राम** उच्चैर्विललाप । **विभीषणा**द्या अपि हताः स्म इति वदन्तो विमुक्तकण्ठं रुरुदुः । **कौशल्या**द्या मातरोऽपि वधूभिः सह भूयो भूयोऽपि मूर्च्छां गच्छन्त्यः करुणं चक्रन्दुः ।

ततो **रामं** नत्वा **लवणा**-ऽ**ङ्कुश**ावूचतुः-कनीयस्तात-मृत्युनाऽद्य भवादतिभीतौ स्वः । मृत्युरकस्मादेवाऽऽपतति, तत् परलोकाय मूलत एव यतनीयम् । अतो दीक्षायै अनुमन्यस्व, अतः परं नस्तदेव युक्तम्' । एवमुक्त्वा **रामं** नत्वाऽ**मृतघोष**मुनेस्तावुभौ दीक्षां गृहीत्वा क्रमाच्छिवपदमीयतुः ।

**राम**श्च भ्रातुः पुत्रयोश्च वियोगेन मूर्च्छामाप्य लब्धसंज्ञो मोहाद् बहु विललाप । ततो **विभीषणा**द्याः कथञ्चन **राम**मेत्य गद्गदस्वर-मूचुः-'धीरेषु धीरो वीरेषु च वीरस्त्वमधैर्यं मुञ्च । **लक्ष्मण**स्य समयोचितमङ्गसंस्कारपूर्वकमौर्ध्वदेहिकं कुरु' । तेन च कुपितो **राम**स्तान् निर्भर्त्स्योन्मत्तवत् तद्विरहं बहूक्त्वा **लक्ष्मण**मंसे समारोप्याऽन्यत्र जगाम । तस्य च विफलं स्नानादिकारयतस्तस्य स्नेहोन्मत्तस्य विस्मृतान्यक्रियस्य षण्मासी व्यतीयाय । तं तथाभूतं श्रुत्वा च विद्विष **इन्द्रजित्-सुन्द**पुत्रा अन्ये च जिघांसवः समेत्य सैन्यैर**योध्यां** रुरुधुः । **रामो**ऽपि **लक्ष्मण**मङ्के कृत्वा **वज्रावर्त्तं** धनुरास्फालयत् ।

तदा चाऽऽसनकम्पेन **माहेन्द्राद्** देवैः सह **जटायू** **राम**मुपाययौ । **इन्द्रजित्**पुत्रादयश्चाऽपि देवा **रामं** गृह्या इति वदन्तो दुद्रुवुः । अत्र देवैः कृतसहायः स**विभीषणो रामो** नो हन्तेति भीता लज्जिताश्च ते परं संवेगमाप्याऽ**तिवेग**स्य मुनेः पार्श्वे प्राव्रजन् । **जटायु**श्च देवो **राम**स्य पुरः स्थित्वा शुष्कं तरुमम्भसा सिषेच । अश्मनि गोमयादि क्षिप्त्वा कमलिनीं रोपयामास । मृतवृषभेण लाङ्गुलेन चाऽकालेऽपि बीजान्युवाप । यन्त्रे च तैलार्थं वालुका निधाय पीलयामास' । ततो **राम**स्तमुवाच-'किं वृथा प्रयतसे' । ततः स्मित्वा **जटायु**रप्युवाच-'यद्येतावद् वेत्सि तर्हि मृतकं किं स्कन्धे वहसि ?'



ततो **लक्ष्मण**शरीरमालिङ्ग्य **राम**स्तमाह-'किममङ्गलं भाषसे, मम दृष्टिपथं त्यज' । एवं वदति **रामे कृतान्तवदनो** देवो-ऽवधेर्ज्ञात्वा **राम**बोधार्थं समाययौ । सः स्कन्धे स्त्रीमृतकं कृत्वोप-**रामं** विचरन् **रामेण** किमुन्मत्त इव स्कन्धे स्त्रीमृतकं वहसीत्युक्तः प्रत्युवाच-'किममङ्गलं वदसि, ममैषा प्रेयसी, त्वं किं स्वयं मृतकं वहसि ?' मयोह्यमानां मे भार्यां चेद् मृतां जानासि तर्हि निजस्कन्ध-स्थितं शवं किं न जानासि' । तेनैवं दर्शितैस्तैस्तैर्निमित्तैर्लब्ध-स्वास्थ्यो **रामो** दध्यौ-'किं सत्यं ममाऽनुजो न जीवति ?' ततस्तौ **जटायु-कृतान्तौ** प्राप्तबोधाय **राम**ाय स्वं कथयित्वा निजं स्थानं जग्मतुः ।

**राम**श्च निजानुजस्य प्रेतकार्यं विधाय दीक्षेच्छुः **शत्रुघ्नं** राज्यदानायाऽऽदिशत् । **शत्रुघ्न**श्च भवोद्विग्नोऽहमपि व्रतं ग्रहीष्या-मीति राज्यं नाऽङ्गीचकार । ततो **रामो लवण**सुतायाऽ**नङ्गदेवा**य राज्यं प्रदाय **मुनिसुव्रत**वंशस्य **सुव्रत**स्य मुने**रर्हद्दास**श्रावकोपदिष्टस्य समीपं गत्वा **शत्रुघ्न-सुग्रीव-विभीषण-विराधा**दिभिः सार्धं व्रतमाददे । **रामे** च निर्गते नृपाणां षोडश सहस्राणि भववैराग्याद् व्रतमाददिरे । सप्तत्रिंशत् सहस्राणि स्त्रियश्च **श्रीमत्याः** श्रमणाया व्रतं जगृहतुः । **राम**श्च पूर्वाङ्गश्रुतपवित्रितो गुरोः समीपे षष्ठ्यब्दीं यावद् विविधाभिग्रहरतस्तपांसि तेपे ।

❀ ❀ ❀

अथ **रामो** गुर्वनुज्ञया प्रच्छन्नैकविहारोऽटव्यां गिरिकन्दरे प्रयातवान् । तस्यां रात्रौ च ध्यानमग्नस्य तस्याऽवधिज्ञानमुत्पेदे । तेन च विश्वं करामलकवत् पश्यन्ननुजं देवाभ्यां हतं नरकं प्राप्तं च ज्ञात्वा दध्यौ-'अहं पूर्वजन्मनि **धनदत्तो लक्ष्मण**स्तु **वसुदत्तः** ।

तत्राऽप्यसावकृतकृत्यो विपद्याऽस्मिन् भवे ममाऽनुजो जातः । अत्राऽप्यस्य कौमारे वर्षशतं, मण्डलित्वे वर्षाणि शतत्रयं चत्वारिंशच्च, दिग्विजये सार्धैकादश सहस्राः, राज्ये षष्टिवर्षाणीति मिलित्वा द्वादशवर्षसहस्राण्यायुरविरतस्य नरकावहं जातम् । अत्र देवयोर्न दोषः । कर्मणां हि विपाक एवेदृशः' । एवं चिन्तयन् **रामः** कर्मभेदाय विशेषतस्तपः-समाधिपरायणोऽभूत् ।

अथ **रामः** षष्ठोपवासान्ते **स्यन्दनस्थले** नगरे पारणाय युगमात्रदत्तदृष्टिः प्रविवेश । पौरैरुपढौकितानाहारानगृह्णन् धर्म्याहारासक्तो नृपगृहं गतवान् । तत्र **प्रतिनन्दि**नृपेणोचितमन्नादिकं प्रतिलम्भितं भुक्तवान् । देवैश्च तत्र वसुधारादिपञ्चकं विदधे । **राम**श्च पुनस्तदरण्यं गत्वा पुरक्षोभः स्वस्य संघट्टश्च मा भूदित्यभिग्रहो जग्राह-'भिक्षाकालेऽत्रैव वने चेद् भिक्षा लप्स्यते, तदा पारणं कार्यं नाऽन्यथे'ति । तादृशाभिग्रहपरश्च समाधिमापन्नः प्रतिमाधरस्तस्थौ ।

अथैकदा दुःशिक्षितेनाऽश्वेन जविना ह्रियमाणः **प्रतिनन्दि**नृपः समागतवान् । **नन्दनपुण्या**ख्यसरसः पङ्के चाऽश्वो मग्नः । अनुपदं तस्य सैन्यं चाऽऽगतम् । तमश्वं पङ्कादुद्धृत्य शिबिरं विधाय च स्नात्वा सपरिच्छदो नृपो भोजनं चक्रे । तदा च पारितध्यानो **रामः** पारणेच्छया तत्राऽऽगतवान् । नृपश्चाऽभ्युत्थाय भक्तपानैस्तं प्रत्यलाभयत् । कृतपारणे च **रामे** नभसो रत्नवृष्टिरभूत् । **राम**स्य देशनां श्रुत्वा च ते **प्रतिनन्द्या**दयः श्रावका बभूवुः । तदारभ्य **राम**श्चिरं वनदेवताभिः पूज्यमानस्तत्रैव तस्थौ । भवविच्छेदकामश्च मासोपवासादिनिरतो नानासनो दुस्तपं ध्यानस्थस्तपस्तेपे ।

अन्यदा च **रामः** कोटिशिलां शिलां पुरा **लक्ष्मणे**नोत्तोलितां प्राप्य तामध्यास्य रात्रौ प्रतिमाधरः शुक्लध्यानान्तरं प्राप । अवधिना



तज्ज्ञात्वा च **सीतेन्द्रो** दध्यौ-'यदयं भवी भवेत् तदा तेन योगो भवतु मम, तदस्योपसर्गं विदधामि, यथाऽयं देवो मत्सुहृत् स्यात्'। एवं विचिन्त्योप**राम**मागत्य ऋतुसमुद्धमुद्यानं **सीता**रूपं स्त्रीजनानपि च विकृत्योचे-'प्रिय ! तव प्रिया **सीता**ऽहमिहोपस्थिताऽस्मि, त्वामनुरक्तं त्यक्त्वाऽहं प्राव्रजम् । पश्चाच्च ममाऽत्यन्तं पश्चात्तापोऽभूत् । अद्य चाऽऽभिर्विद्याधरकुमारीभिः प्रार्थिताऽहं-प्रसीद, स्वं पतिं **रामं** याचे, नो नाथीकुरुष्व । त्वं च परिव्रज्यां मुक्त्वा **राम**स्य महिषी भव, वयं च त्वदादेशात् तस्य पत्न्यो भविष्यामः । तदमूः स्वीकुरु, त्वया सह प्राग्वद् रंस्ये' । एवं वदति **सीतेन्द्रे** च विकृतास्ताः स्त्रियः कामोद्दीपकं सङ्गीतं चक्रुः । किन्तु **राम**मुनिर्मनागपि नाऽक्षुभ्यत् ।

अथ माघस्य शुक्लद्वादश्यां रात्रेरन्तिमे प्रहरे **राम**स्याऽमलं केवलमुत्पन्नम् । तदा **सीतेन्द्रो**ऽन्ये च देवास्तस्य विधिपूर्वकं केवलज्ञानमहिमानं चक्रुः । **राम**श्च धर्मदेशनां विदधे । देशनान्ते च **सीतेन्द्रे**ण क्षमयित्वा नत्वा च **लक्ष्मण-रावण**गतिं पृष्टो **रामो**ऽब्रवीत्-**रावणो**ऽधुना **शम्बूके**न सह चतुर्थे नरके **लक्ष्मण**श्च स्तः। नरकायुरनुभूय तौ **प्राग्विदेहे विजयावत्यां** नगर्यां **सुनन्द**स्य **रोहिणी**भवौ तनयौ **जिनदास-सुदर्शनौ** भूत्वाऽर्हद्धर्मं पालयिष्यतः। ततः **सौधर्मे** त्रिदशौ भूत्वा च्युत्वा च **विजयापुर्यां** श्रावकौ भूत्वा विपद्य **हरिवर्षे** पुरुषभावमाप्य मृत्वा देवलोकं गमिष्यतः । ततः च्युत्वा तस्यामेव **विजया**पुर्यामार्त्त**राजो लक्ष्मी**कुक्षिजौ **जयकान्त-जयप्रभौ** कुमारौ जिनोक्तं संयमं पालयित्वा **लान्तके** देवौ भविष्यतः ।

तदा च त्वमप्य**च्युता**च्च्युत्वाऽत्रैव **भारते सर्वरत्नमति**र्नाम चक्री भविष्यसि । तौ च च्युत्वे**न्द्रायुध-मेघरथा**ख्यौ ते पुत्रौ भाविनौ । त्वं तु प्रव्रज्य **वैजयन्तं** गमिष्यसि । **इन्द्रायुध**स्तु **रावण**जीव**:** शुभं गतित्रयं भ्रान्त्वा तीर्थकरनामकर्माऽर्जयिष्यति । ततो **रावण**जीवस्तीर्थकरो, भवाँश्च **वैजयन्ता**च्च्युतस्तस्य गणधरो भावी । ततस्तौ मोक्षं यास्यतः । **लक्ष्मण**जीवस्तु भवत्पुत्रो **मेघरथः** शुभा गतीर्भ्रान्त्वा **प्राग्विदेहे पुष्करद्वीपे रत्नचित्रा**यां नगर्यां चक्रिश्रियं भुक्त्वा क्रमेण प्रव्रज्य तीर्थकरो भूत्वा निर्वाणमेष्यति' ।

एवं श्रुत्वा च **सीतेन्द्रो रामं** प्रणम्य ततो यत्र नरके **लक्ष्मण**स्तत्र गत्वा विकृतैः सिंहादिरूपै**र्लक्ष्मणे**न सह **रावण-शम्बूकौ** युध्यमानौ ददर्श । परमाधार्मिकाश्च नैवं युध्यमानानां वो दुःखं भावीति भाषमाणास्तानग्निकुण्डेषु तप्ततैलकुम्भ्यां भाष्ट्रे च बलाद् निदधुः । तेषां तद् दुःखं दृष्ट्वा **सीतेन्द्रो**ऽसुरानुवाच-'किं रे ! न जानीथ, यदिमे पुरुषश्रेष्ठा आसन् ? दूरमपयात । एतान् मुञ्चत' । एवं तानसुरान् निवार्य स**शम्बूक-रावणा**वुवाच-'युवाभ्यां तथाकृतं येनेमं नरकं प्राप्तौ, तथा पूर्ववैरं परिणामं दृष्ट्वाऽपि किं न मुञ्चतम् ?' तावेवं निषिध्य स **राम**केवलिना कथितं **लक्ष्मण**स्य **रावण**स्य च बोधार्थमाचख्यौ । ततस्तावूचतुः-'दयालो ! त्वया साधुकृतम् । त्वच्छुभोपदेशेनाऽस्माकं दुःखविस्मृतिर्जाता । पुराकृतकर्मभिर्नो दीर्घो नरकवासः । स केन नामाऽपनेष्यते?'

ततस्तदुक्त्या दयार्द्रः **सीतेन्द्रः** प्रत्युवाच-'त्रीनपि युष्मानितो नरकाद् दिवं नेष्यामि' । एवमुक्त्वा तांस्त्रीनपि पाणिनोद्दध्रे । किन्तु ते कणशो विशीर्य पारदवत् क्षणात् पाणेः पेतुः । एवं पुनः पुनर्जाते **सीतेन्द्रं** ते ऊचुः-'एवं नोऽधिकमेव दुःखं जायते । तदस्मान् मुञ्च,



दिवं याहि' । ततः **सीतेन्द्र**स्तान् मुक्त्वा **रामं** नत्वा शाश्वतार्हत्तीर्थयात्राकृते **नन्दीश्वरा**दिषु जगाम । गच्छंश्च **देवकुरुषु भामण्डल**-जीवं दृष्ट्वा प्राक्स्नेहवशात् तं सम्यक् प्रतिबोध्य **सीतेन्द्रो** निजं कल्पमियाय ।

**राम**श्चोत्पन्ने केवले वर्षाणां पञ्चविंशतिं भव्यान् प्रबोध्याऽऽयुश्च वर्षाणां पञ्चदशसहस्त्राणि व्यतीत्य कृतकृत्यः शैलेशीं प्रतिपद्याऽव्ययं पदं प्रपेदे ॥ १० ॥

*इति रामनिर्वाणगमनवर्णनात्मको दशमः सर्गः ॥१०॥*

## एकादशः सर्गः

**वप्रा-विजययोः सूनुराह्लिका चारदेशकः ।**
**कर्मपङ्कनिमग्नानां जीयाद् बन्धुर्जिनो नमिः ॥ १ ॥**

अथेह **जम्बूद्वीपे पश्चिमविदेहे भरत**क्षेत्रे **कौशाम्ब्यां** नगर्यां कृतकृत्यः **सिद्धार्थो** नाम नृपो बभूव । सर्वाद्भुतगुणविराजितः स भवाद् विरज्य **सुदर्शन**मुनेर्दीक्षामुपाददे । कतिपयैः स्थानकैश्च तीर्थकृन्नामकर्मोपार्ज्य सम्यग् व्रतं पालयित्वा विपद्य सोऽ**पराजिते** कल्पे महर्द्धिकोऽमरोऽभवत् ।

इतश्चाऽस्मिन्नेव **जम्बूद्वीपे**ऽत्रैव **भरते मिथिला**यां नगर्यां चैत्य-प्राकारादिविराजितायां परमश्रीसम्पन्नो **विजयो** नाम नृपोऽभवत् । तस्य च शीलगुणमण्डिता **वप्रा** नाम भार्याऽऽसीत् । तस्याश्च कुक्षौ **सिद्धार्थ**जीवस्त्रयस्त्रिंशस्सागरोपममायुः पूरयित्वाऽऽश्विनपूर्णिमायामश्विनीनक्षत्रे जगत्त्रये कृतोद्योतोऽ**पराजिता**च्च्युत्वाऽवातरत् । निशाशेषे च सुखसुप्ता **वप्रा**देवी तीर्थकृज्जन्मसूचकांश्चतुर्दश महास्वप्नान् दृष्टवती । पूर्णे समये च श्रावणकृष्णाष्टम्यामश्विनीनक्षत्रे सा नीलकमलाङ्कं स्वर्णवर्णं सुतमसूत ।

दिक्कुमारिकाश्चाऽऽगत्य विधिवत् सूतिकर्माणि चक्रुः । शक्रश्च प्रभुं यथाविधि **मेरुं** नीत्वा सर्वैरिन्द्रादिदेवैः सह स्नात्रं विधिवद् विधायाऽर्चयित्वा नत्वा स्तुत्वा च पुनरादाय **वप्रा**स्वामिन्याः पार्श्वे



मुमोच । ततो यथाविधि रक्षादिकं विधाय निजं धाम जगाम । **विजयो**ऽपि प्रमुदितः कारामोक्षणादिपूर्वकं प्रभोर्जन्मोत्सवं विदधे । 'अस्मिन् गर्भस्थे प्रासादारूढां **वप्रां** दृष्ट्वाऽरयो नेमुरि'ति **नमि**रिति नाम चक्रे ।

प्रभुश्च शक्रादिष्टाभिर्धात्रीभिः पाल्यमानश्चन्द्र इव दिने दिने वर्धमानः शैशवं व्यतीत्य प्राप्तयौवनः पञ्चधनूच्छ्रितः पित्रोरुपरोधाद् राजकन्यां पर्यणैषीत् । जन्मतः सार्धवर्षसहस्रद्वयमतीत्य पित्रा दत्तं राज्यं कर्मभोगफलं मत्वाऽऽददे । राज्यग्रहणात् पञ्चसु वर्षसहस्रेषु यातेषु **लोकान्तिका**मरैस्तीर्थं प्रवर्त्तयेति प्रार्थितः प्रभुः **सुप्रभं** नाम पुत्रं राज्ये निवेश्य जृम्भकदेवापृतैर्द्रव्यैर्वार्षिकदानं प्रददौ । ततः **सुप्रभा**दिभिर्नृपैः शक्राद्यैर्देवैश्च परिवृतो **देवकुरु**नाम्न्या शिबिकया **सहस्राम्र**वणं ययौ प्रभुः । आषाढकृष्णनवम्यामश्विनीनक्षत्रेऽपराह्णे कृतषष्ठो नृपसहस्रेण समं प्राव्राजीत् । तत्कालोत्पन्नचतुर्थज्ञानश्च प्रभुर्द्वितीयेऽह्नि **वीरपुरे दत्त**नृपगृहे पायसेन पारणं चकार । तत्र च तदानीं देवैर्वसुधारादिपञ्चकं **दत्ते**न च प्रभुपादन्यासस्थाने रत्नपीठं च चक्रे ।

❊ ❊ ❊

अथ **नमि**प्रभुर्नवमासान् यावद् विहृत्य दीक्षास्थानं **सहस्राम्र**वणं प्राप्य षष्ठेन प्रतिमास्थो बकुलस्याऽधस्तस्थौ । घातिकर्मक्षयाच्च मार्गशुक्लैकादश्यामश्विनीनक्षत्रे प्रभोरुज्ज्वलं केवलमुत्पन्नम् । तत्र च देवैर्यथाविधि अशीत्यग्रधनुःशतोच्छ्रिताशोकद्रुमभूषितं समवसरणं विचक्रे । तत्र चाऽशोकं प्रदक्षिणीकृत्य तीर्थाय नम इति वदन् प्रभुः पूर्वद्वारा प्रविश्य पूर्वरत्नसिंहासने

प्राङ्मुखः समुपाविशत् । अन्यासु दिशास्वपि च व्यन्तरै रत्नसिंहासनस्थानि प्रतिबिम्बानि विचक्रिरे । ततो यथास्थानं चतुर्विधे सङ्घे समुपविष्टे शक्रेण स्तुतो **नमि**प्रभुर्धर्मदेशनामकरोत् ।

'संसारोऽसारः, धनं तरङ्गवदस्थिरं, शरीरमपि विद्युदिव क्षणनश्वरम् । तद्धीमांस्तेष्वास्थां विहाय मुमुक्षुर्यतिधर्माय यतेत । तद्विधानेऽशक्तश्चेद् द्वादशविधश्रावकधर्माय सम्प्रयतेत । श्रावको हि धर्म्यैर्मनो-वाक्-कायजैः कर्मभिरहोरात्रं नयेत् । ब्राह्मे मुहूर्त्ते समुत्थाय परमेष्ठिनः स्तुवन्, किंधर्मा ? किंकुलः ? किंव्रतश्चाऽस्मीति स्मरन्, शुचिः पुष्पादिभिर्देवदेवं सम्पूज्य यथाशक्ति प्रत्याख्याय देवगृहं गच्छेत् । तत्र प्रविश्य विधिना जिनं त्रिःप्रदक्षिणीकृत्य पुष्पादिभिः पूजयित्वा स्तुवीत । ततो गुरुमुपगम्य प्रतिपत्तिपूर्वकं प्रत्याख्यानं प्रकाशयेत् । प्रतिपत्तिश्च गुरोस्तद्दर्शनेऽभ्युत्थानं, तदा-गमेऽभिगमनं, शिरस्यञ्जलिकरणं, स्वयमासनदानमासनाभिग्रहो, भक्त्या वन्दना पर्युपासनं तद्गमनेऽनुसरणं च प्रोक्तम् । ततस्ततः प्रतिनिवृत्त्य स्वस्थानं गत्वा धर्माविरोधेन यथोचितमर्थं चिन्तयेत् ।

ततो मध्याह्निकीमर्चां विधाय कृतभोजनादि विद्वद्भिः शास्त्रार्थमर्म विचारयेत् । पुनश्च सन्ध्याकाले देवार्चनं विधाया-ऽऽवश्यकं कृत्वा स्वाध्यायं कुर्यात् । ततः समुचिते काले देव-गुरून् स्मरन् प्रायेणाऽब्रह्मत्यागी निद्रामल्पामेव भजेत् । निद्राभङ्गे च मुनीनां तन्निषेधाद् योषिदङ्गानामसारत्वं चिन्तयेत् । स्त्रियो हि यकृदादिभृता नाडीबद्धा बही रम्याश्चर्मप्रसेविका इव । स्त्रीशरीरस्य चेद् बहिरन्तर्विपर्यासो भवेत् तदा कामुकस्तस्यैव गृध्रादिभी रक्षणं कुर्यात् । कामो हि स्त्रीशस्त्रेण विश्वं जिगीषति । तदस्य सङ्कल्पयोनेर्मूलं सङ्कल्पमेवोत्खनामीत्येवं चिन्तयेत् ।



बाधकस्य दोषस्य प्रतिक्रियां विचारयेत् । दोषमुक्तेषु मुनिषु च प्रमोदं वहेत् । स्थिरचित्तश्च सर्वजीवेषु भवस्थितिर्दुःस्थेति चिन्तयेत् । तेषु स्वाभाविकसुखं मोक्षमेवाऽन्वेषयेत् । यत्र हि जिनो देवो, दया धर्मो, मुनयो गुरवस्तच्छ्रावकत्वं को विमूढो नेच्छेत् । जिनधर्मरहितश्चक्र्यपि मा भूवं, दरिद्रोऽपि दासोऽपि च जिनधर्मा-नुरक्तः स्यामिति दध्यात् ।

निःसङ्गो जीर्णवस्त्रो मलिनाङ्गो माधुकरीं वृत्तिं सेवमानो मुनिचर्यां कदा प्राप्नुयामिति भावयेत् । दुर्जनसङ्गं त्यजन्, गुरुं सेवमानो, योगमभ्यस्यन् कदा भवच्छेदाय प्रभवेयम् । रात्रौ पुराद् बहिः कृतकायोत्सर्गः प्रतिमास्थः कदा स्याम् । वने पद्मासनासीन उत्सङ्गकृतमृगशावको मृगैः कदा मुखे आघ्रातः स्याम् । रिपौ मित्रे, तृणे स्त्रैणे, स्वर्णे ग्राध्नि, मणौ मृदि, मोक्षे भवे च कदा समतामतिः स्यामि'त्येवं गुणश्रेणिमधिरोढुमपवर्गमिच्छुः सदा भावयेत् । एवमाहोरात्रिकीं चर्यामप्रमत्तोऽनुतिष्ठन् यथावदुक्तवृत्तपरायणो गृहस्थो-ऽपि विशुध्यति' इतीमां प्रभोर्देशनां श्रुत्वा प्रबुद्धा बहवो जनाः प्राव्रजन् ।

तत्र च प्रभोः **कुम्भा**दयः सप्तदश गणधरा अभवन् । प्रभोर्देशनान्ते च **कुम्भो** देशनां चकार । शक्राद्याश्च देशनान्ते प्रभुं नत्वा स्वं स्वं धाम ययुः ।

❋ ❋ ❋

तत्तीर्थे च समुत्पन्ने त्र्यक्षश्चतुर्मुखः स्वर्णवर्णो वृषरथ-श्चतुर्भिर्दक्षिणैर्भुजैर्मातुलिङ्ग-शक्ति-मुद्गरा-ऽभययुतो वामैश्च तावद्भि-र्भुजैर्नकुल-पर्शु-वज्रा-ऽक्षसूत्रधरो **भृकुटि**र्यक्षः, श्वेताङ्गी हंसवाहना

दक्षिणाभ्यां बाहुभ्यां वरद-खड्गधरा वामाभ्यां च बीजपूरधरा **गान्धारी**देवी च द्वे शासनदेवते प्रभोः सदा सन्निहिते अभूताम् । ताभ्यां सहितश्च स्वामी नवमासोनं सार्धं वर्षसहस्रद्वयं यावद् वसुन्धरां विजहार ।

तदानीं च **नमि**प्रभोः परिवारे साधूनां विंशतिः सहस्राणि, साध्वीनां चैकचत्वारिंशत्सहस्री, चतुर्दशपूर्वभृतां सार्धं शतचतुष्टयम्, अवधिज्ञानिनां षट्शताधिकं सहस्रं, मनःपर्ययिणां षष्ट्यधिका द्वादशशती, केवलज्ञानिनां षोडशशतानि, जातवैक्रियलब्धीनां पञ्च सहस्री, वादलब्धिमतामेकं सहस्रं, श्रावकाणां लक्षमेकं सप्ततिः सहस्राणि च श्राविकाणां चाऽष्टचत्वारिंशत्सहस्रसहिता त्रिलक्षी चाऽभवन् ।

अथ मोक्षकालं ज्ञात्वा **नमि**प्रभुः **सम्मेता**द्रिमुपेत्य मुनिसहस्रेण सममनशनं प्रपेदे । मासान्ते वैशाखकृष्णदशम्यामश्विनीनक्षत्रे च तै-र्मुनिभिः समं प्रभुः परमं पदं प्राप ।

प्रभोश्च कौमारे सार्धं वर्षसहस्रद्वयं, राज्ये वर्षाणां पञ्चसहस्री, व्रते च सार्धं वर्षसहस्रद्वयमित्ययुतवर्षाण्यायुः । **मुनिसुव्रत**-निर्वाणाच्च वर्षाणां षट्सु लक्षेष्वतीतेषु श्री**नमि**प्रभोर्निर्वाणमभूत् ।

अथ शक्राद्याः समेत्य सपरिच्छदस्य प्रभोर्निर्वाणकल्याणकं शरीराग्निसंस्कारपूर्वकं चक्रुः । यथावत् स्वस्थानं जग्मुश्च ॥११॥

*इति श्रीनमिनाथचरितवर्णनात्मकः एकादशः सर्गः ॥११॥*

## द्वादशः सर्गः

### हरिषेणचक्रिचरितम्

अथेह **भरते नरपुरे** नगरे **नराभिरामो** नृपोऽभूत् । स च क्रमेण भवविरक्तः प्रव्रज्यां प्रपद्य मृतः **सनत्कुमार**कल्पे महर्द्धिको देवोऽभवत् । तथा **पञ्चाल**देशे **काम्पील्य**पुरे **महाहरि**नामनृपस्य **मेरा**या महिष्याः कुक्षौ **नराभिराम**जीवस्ततश्च्युत्वा चतुर्दश-महास्वप्नसूचितश्चक्रधरोऽवातरत् । पूर्णे समये च सा **हरिषेणा**ख्यं कनकाभं सुतमसूत् । पञ्चदशधनून्नतः स यौवराज्येऽभिषिक्तः पैतृकं राज्यं शशास ।

एकदा च तस्याऽस्त्रशालायां चक्ररत्नं प्रादुरभूत् । अन्यान्यपि च पुरोधःप्रभृतीनि रत्नानि तस्य जातानि । स च चक्रमनुसरन् प्राच्यां **मगधेशं** साधयित्वा दक्षिणस्यां **वरदामेशं** वशगं विधाय पश्चिमायां **प्रभासेशं** सुरं चाऽसाधयत् । ततः **सिन्धुं** प्राप्य **सिन्धुदेवीं** वशगां विधाय **वैताढ्यकुमारं कृतमालदेवं** चाऽसाधयत् । ततः सेनापतिना पश्चिमं **सिन्धुनिष्कुटं** साधयित्वा तेनोद्घाटितद्वारां **तमिस्रा**गुहां यथाविधि प्रविवेश सः । एवं पद्मयो**न्मग्न-निमग्ने** नद्यावुत्तीर्य स्वयमुद्घटितोत्तरद्वारा ततो विनिर्गत्याऽऽ**पाता**ख्यान् म्लेच्छान् जित्वा **क्षुद्रहिमवत्**कुमारमाज्ञावर्तिनमकरोत् सः । ततः काकिण्या **ऋषभकूटे** स्वनामोत्कीर्य प्रस्थाय सेनान्या **गाङ्गं**

पूर्वनिष्कुटं साधयित्वोभयश्रेणिवर्तिभिर्विद्याधरैर्दत्तदण्डो **नाट्यमालं** चाऽसाधयत् । ततः सेनापतिनोद्घाटितां **खण्डप्रपातां** प्रविश्य पूर्ववत् ततो निर्गत्य च सेनान्या **गाङ्गं** पश्चिमनिष्कुटं जित्वा **गङ्गा**यां निवासं चकार चक्री । तत्रोत्कृष्टपुण्यप्रभावेण स्वयंसिद्धै**र्गङ्गामुख-मागध**वासिभिर्नवभिर्निधिभिः समृद्धः सम्पूर्णचक्रवर्ती षट्खण्ड-**भरते**श्वरः **काम्पील्य**पुरमाजगाम । देवैर्नरैश्च तस्य समहोत्सवं चक्रवर्तित्वाभिषेकश्चक्रे । द्वादशवत्सरान् यावत् पुरे महोत्सवः प्रावृतत् । स च नृपैः सेवितो धर्माबाधया भोगान् बुभुजे ।

अथाऽन्यदा भवविरक्तो राज्यं त्यक्त्वा स **हरिषेणः** प्राव्राजीत् । तस्य च कौमारे वर्षाणां सपादशतत्रयी, मण्डलित्वेऽपि तावदेव, जये च सार्धं वर्षशतं, चक्रित्वे चाऽष्टौ सहस्राण्यष्टौ शतानि पञ्चाशच्च, व्रते च सार्धं शतत्रयमित्ययुतवर्षाण्यायुः । स तीव्रं व्रतं सम्यक् परिपाल्य क्षीणकर्मोत्पन्नकेवलज्ञानः परमं पदं प्राप ॥ १२ ॥

*इति हरिषेणचक्रिचरितवर्णनात्मको द्वादशः सर्गः ॥१२॥*

## त्रयोदशः सर्गः

### जयचक्रिचरितम्

**नमेर्जिनेश्वरस्यैव काले जातस्य चक्रिणः ।**
**जयाख्यस्येह चरितं पुण्यं श्रव्यमथोच्यते ॥ १ ॥**

अथाऽस्य **जम्बूद्वीपस्यैरवते** वर्षे **श्रीपुरे** नगरे **वसुन्धरो** नृप आसीत् । स च प्रियायाः **पद्मावत्या** मृत्युना भवोद्विग्नो **विनयन्धरं** पुत्रं राज्ये निवेश्य **मनोहर**वने **वरधर्म**मुनेस्तत्त्वं श्रुत्वा प्रबुद्धः प्रव्रज्य चिरं व्रतं पालयित्वा विपद्य सप्तमे कल्पे देवत्वमाप ।

इतश्च **मगधे राजगृहे** इक्ष्वाकुवंशे **विजयो** नाम नृपो बभूव। तस्य **वप्रा**ख्याया महिष्याः कुक्षौ **शुक्रा**च्च्युत्वा **वसुन्धर**जीवो-ऽवातरत् । पूर्णे समये च सा चतुर्दशमहास्वप्नसूचितं **जयं** नाम स्वर्णवर्णं पुत्रं सुषुवे । स च द्वादशधनून्नतः पित्रा राज्ये निवेशितः। तस्य शस्त्रागारे च चक्रिलाञ्छनं चक्ररत्नं समुत्पन्नम् । अन्यानि च त्रयोदशरत्नानि जज्ञिरे । दिग्जयार्थं चक्रमनुसरंश्च स पूर्वस्यां **मागधेशं** दक्षिणस्यां **वरदामेशं** पश्चिमायां **प्रभासेशं सिन्धुं वैताढ्यकुमारं कृतमालदेवं** सेनापतिना **सिन्धु**पश्चिमनिष्कुटं च क्रमशो वशीचक्रे स्वयम् । यथापूर्वं **तमिस्रां** प्रविश्य ततो निर्गत्य चाऽऽ**पातान्** म्लेच्छान् जित्वा **क्षुद्रहिमवत्कुमारं** वशगं विदधे । ततः काकिण्या **ऋषभ**कूटे स्वं नाम लिखित्वा सेनान्या **गाङ्गं** प्राङ्निष्कुटं विजित्य

प्रस्थितो **गङ्गां** जित्वा विद्याधरेन्द्रान् **खण्डप्रपात**द्वारस्थं **नाट्यमालं** चाऽजयत् सः। ततो **वैताढ्याद्** निर्गत्य सेनान्या **गाङ्गं** पश्चिमनिष्कुटं साधयित्वा **गङ्गा**यामावासं विधाय नवाऽपि निधीन् वशगान् विधाय वलितश्चक्री निजं पुरं प्राप्तवान्। देवैर्नृपैश्च तस्य समहोत्सवं चक्रित्वाभिषेकश्चक्रे। षट्खण्डां पृथिवीं भुक्त्वा च क्रमेण भवविरक्तः परिव्रज्यां प्रतिपन्नवान्।

तस्य चक्रिणो **जय**स्य कौमारे वर्षाणां शतत्रयी, मण्डलित्वेऽपि च तावदेव, दिग्जये शतं, चक्रित्वे चैकोनविंशतिशती, व्रते च चत्वारि शतानि व्यतीतानि। तदेवं वर्षत्रयसहस्रायुः स व्रतं परिपाल्य क्षीणकर्मोत्पन्नकेवलः परमं पदमियाय ॥ १३ ॥

*इति श्रीजयचक्रिचरितवर्णनात्मकः त्रयोदशः सर्गः ॥१३॥*

**रामलक्ष्मणदशानना नमिस्तीर्थकृच्च हरिषेणचक्रभृत्।**
**चक्रभृच्च जय इत्यमुत्र षट् वर्णिताः श्रुतिसुखाय सन्तु वः ॥ १ ॥**

इति कलिकालसर्वज्ञश्री**हेमचन्द्राचार्य**विरचित**त्रिषष्टिशलाकापुरुषचरित**स्य
तपोगच्छाधिपति-शासनसम्राट्-बालब्रह्मचारि-श्रीकदम्बगिरि-
तालध्वज-राणकपुर-कापरडाद्यनेकतीर्थोद्धारकाचार्यवर्य-
श्रीमद्विजय**नेमिसूरीश्वर**पट्टालङ्कार-
समयज्ञ-शान्तमूर्त्याचार्यवर्यश्रीविजय**विज्ञानसूरीश्वर**पट्टधर-
सिद्धान्तमहोदधि-प्राकृतविशारदाचार्यवर्यश्रीविजय**कस्तूरसूरीश्वर**शिष्यरत्न-
प्रख्यातव्याख्यातृ-कविरत्न-श्रीविजय**यशोभद्रसूरीश्वर**शिष्यरत्न-
श्रीविजय**शुभङ्करसूरीश्वर**कृते
**गद्यात्मकसारोद्धारे** सप्तमे पर्वणि
**समाप्तं रामादिषट्शलाकापुरुषचरितप्रतिबद्धं सप्तमं पर्व ॥७॥**



# कठिनशब्दार्थः

## षष्ठं पर्व

### प्रथमः सर्गः

| | |
|---|---|
| छागः | બોકડો |
| सञ्चयः | ઢગલો |
| उन्नतः | ઊંચું |
| अब्दः | વર્ષ |
| शिबिका | પાલખી |
| वसुन्धरा | પૃથ્વી |
| पादपः | ઝાડ, વૃક્ષ |
| निबन्धनम् | કારણ |
| यानम् | વાહન |
| दीपिका | દીવડી, નાનો દીવો |
| वात्या | વાયુનો સમૂહ |
| मातुलिङ्गः | બીજોરું |
| केकी | મયૂર |
| बीजपुरः | બીજોરું |
| मुषण्ढी | એક જાતનું શસ્ત્ર |
| प्रतिपत्तिथिः | એકમતિથિ, પડવો |
| दंष्ट्रा | દાઢા |

### द्वितीयः सर्गः

| | |
|---|---|
| परिखा | ખાઈ |
| प्रष्ठः | આગેવાન |
| अपराह्णः | બપોર પછીનો ભાગ |
| सहकारतरुः | આંબાનું વૃક્ષ |
| परायत्तम् | પરાધીન |
| मिषम् | બહાને, છળ |
| व्याधः | શિકારી |
| वर्त्म | માર્ગ |
| मुद्गरः | હથોડો |
| पाशः | એક શસ્ત્ર |
| नकुलः | નોળીયો |
| शूलम् | ભાલો |
| अक्षसूत्रम् | જપમાલાની દોરી |
| वामनः | ઠીંગુજી |
| जन्ययात्रा | લગ્નની જાન |
| कूपमण्डूकः | કૂવાનો દેડકો |
| शिरोर्तिः | માથાની પીડા |
| स्वैरम् | સ્વેચ્છાએ |
| वेश्म | ઘર |
| फलकम् | પાટીયું |
| आपणम् | દુકાન |
| तन्त्री | વીણા |
| अनुस्यूतः | પરોવાયેલ |
| वल्लकी | વીણા |

| | |
|---|---|
| पर्षद् | સભા |
| रहः | એકાન્ત |
| आकृतिः | દેખાવ |
| प्रकृतिलोला | સ્વભાવથી ચંચળ |
| असवः | પ્રાણ |
| अध्वा | રસ્તો |
| सनिर्बन्धम् | આગ્રહપૂર્વક |
| पोतः | વહાણ |
| उत्तालतरङ्गः | ઉછળતાં મોજાં |
| ग्रावा | પત્થર |
| व्रतिनी | સાધ્વીજી |
| प्रतिश्रयः | ઉપાશ્રય |
| प्रवहणम् | વહાણ |
| सकलत्रम् | પત્ની સાથે |
| जामाता | જમાઈ |

### तृतीयः सर्गः

| | |
|---|---|
| निदानम् | નિયાણું |
| उत्तुङ्गः | ઊંચો |
| तार्क्ष्यः | ગરુડ, વિષ્ણુ |
| तालध्वजः | બળદેવ |
| शार्ङ्गम् | ધનુષ |
| लाङ्गलम् | હળ |
| तुम्बप्रहारः | અગ્રભાગનો પ્રહાર |

### चतुर्थः सर्गः

| | |
|---|---|
| निशीथकृत्यम् | રાત્રિકાર્ય |
| वल्मीकाकीर्णम् | રાફડાથી વ્યાપ્ત |
| प्रेप्सुः | પ્રાપ્ત કરવાની ઈચ્છાવાળો |
| पलितम् | વૃદ્ધત્વને કારણે વાળની ધોળાશ |
| क्षामः | કૃશ, દુર્બળ |
| श्यालीः | સાળી (પત્નીની બહેન) |
| पर्शुः | કુહાડી |
| अन्तकः | યમરાજ |
| सत्रागारम् | દાનશાળા |
| मक्षिका | માખી |

### पञ्चमः सर्गः

| | |
|---|---|
| कुञ्जरः | હાથી |

### षष्ठः सर्गः

| | |
|---|---|
| सांयात्रिकाः | દરિયાઈ વેપારીઓ |
| क्षमणा | ક્ષમાપના |
| भाण्डम् | વાસણ |
| उपायनम् | ભેટણું |
| सौविदल्लः | અંતઃપુરનો રખેવાળ |
| निर्वासितः | કાઢી મૂકેલ |
| उत्सङ्गः | ગોદ |
| अन्तर्जवनिका | પડદાની અંદર |
| आढ्यः | ધનિક |
| वृषी | સંન્યાસીનું દર્ભનું આસન |
| वैरानृण्यम् | વેરનો બદલો લેવો |
| स्त्रैणम् | સ્ત્રીઓનો સમૂહ |
| शुषिरम् | પોલાણ |
| अपवरकः | ઓરડો, રૂમ |
| निराकृतः | તિરસ્કાર પામેલ |
| तालु | તાળવું |



| | |
|---|---|
| कुथितः | ગંધાતો, સડેલો |
| शलाका | સળી |
| शप्ता | શ્રાપ આપનાર |
| आयुधम् | શસ્ત્ર |

### सप्तमः सर्गः

| | |
|---|---|
| आलयम् | ઘર |
| कुविन्दी | વણકર સ્ત્રી |
| धौरेयः | મુખ્ય |
| प्रातिवेश्मिकः | પડોશમાં રહેનાર |
| प्रतिपत्तिः | સેવા, ભક્તિ |
| भृगुकच्छपत्तनम् | ભરૂચનગર |
| उत्कर्णो हयः | ઊંચા કરેલ કાનવાળો ઘોડો |
| प्रतिशीनम् | થીજેલું |
| उपदेहिका | ઊધઈ |
| सोपहासम् | મશ્કરીપૂર્વક |
| उपचिकीर्षा | ઉપકારની ઈચ્છા |
| परिवेषणम् | પીરસવું |
| प्रसह्य | બલાત્કારે, બળજબરીથી |

### अष्टमः सर्गः

| | |
|---|---|
| जिगीषुः | જીતવાની ઈચ્છાવાળો |
| धर्मशुश्रूषा | ધર્મ સાંભળવાની ઈચ્છા |
| सूना | વધસ્થાન |
| निरस्तः | પરાભવ કરેલ |
| अवस्कन्दम् | પડાવ, હુમલો |
| गेहेनर्दी | ઘરમાં બડાઈ હાંકનાર, બીકણ |
| विधित्सा | કરવાની ઈચ્છા |
| विप्लवः | બળવો |
| निकषा | નજીક |
| तारतारम् | મોટેથી |
| वासः | વસ્ત્ર |
| तुमुलम् | યુદ્ધ |
| पर्यङ्कः | પલંગ |
| सर्वाभिसारः | ચતુરંગ સેના સાથે યુદ્ધ માટે પ્રયાણ |
| हरिः | સિંહ |
| जिघृक्षा | ગ્રહણ કરવાની ઈચ્છા |
| विहायः | આકાશ |
| असकृत् | વારંવાર |

## सप्तमं पर्व

### प्रथमः सर्गः

| | |
|---|---|
| व्योममार्गः | આકાશમાર્ગ |
| कुचौ | સ્તન |
| लुब्धकः | શિકારી |
| उदन्तः | વૃત્તાન્ત |
| रन्तुमनाः | રમવાની ઈચ્છાવાળો |
| दोहदः | મનોરથ |

| | |
|---|---|
| दोर्बलम् | ભુજાબળ |
| ज्यायसी | મોટી |
| कनीयसी | નાની |
| सूतिकातल्पम् | સુવાવડી બાઈની પથારી |
| उद्दामपादः | વિશાળ પગવાળો |
| अनल्पौजाः | મહાબળવાળો |
| करण्डकः | કરંડિયો |

## द्वितीयः सर्गः

| | |
|---|---|
| लुण्टाकः | લૂંટનાર |
| कारागारम् | કેદખાનું |
| मराली | હંસી |
| यामद्वितयम् | બે પ્રહર |
| गिरिशृङ्गम् | ગિરિશિખર |
| बिभीषिका | ભયજનક પરિસ્થિતિ |
| अम्बरम् | આકાશ |
| दृग्प्रीणकः | આંખને સંતોષ આપનાર |
| सरः | સરોવર |
| जिघांसुः | હણવાની ઈચ્છાવાળો |
| गरीयान् | મોટું, ભારે |
| अनीहः | ઈચ્છા રહિત |
| समुच्छ्रायः | ઊંચો |
| आस्थानी | સભા |
| पत्तिः | સૈનિક |
| उद्वाह्य | વિવાહ કરીને |
| अग्रेगूः | અગ્રેસર |
| कन्दुकः | દડો |
| कक्षा | બગલ |
| अवनिः | પૃથ્વી |
| फेनिलम् | ફીણવાળું |
| सेतुः | પૂલ |
| संवर्मितः | બખ્તર સહિત |
| उदस्त्रः | તૈયાર શસ્ત્રધારી |
| उल्लुठितः | ઉછળેલ |
| मुमूर्षुः | મરવાની ઈચ્છાવાળો |
| धीवरः | માછીમાર |
| अधिज्यधन्वा | દોરી ચઢાવેલ ધનુષવાળો |
| तृणपूलः | ઘાસનો પૂડો |
| व्यावृत्तः | પાછા વળેલ |
| पावकः | અગ્નિ |
| कलुषाविलजलम् | ગંદકીથી ખરડાયેલ પાણી |
| क्रतुः | યજ્ઞ |
| अनागाः | નિરપરાધી |
| वेदिः | યજ્ઞ માટેની ભૂમિ |
| यष्टा | યજ્ઞ કરનાર |
| सर्पिः | ઘી |
| यूपः | યજ્ઞ માટેનો સ્તંભ |
| व्याधः | શિકારી |
| मखः | યજ્ઞ |
| अध्वर्युः | યજુર્વેદનો જાણકાર |
| क्रव्यादः | રાક્ષસ |



| | |
|---|---|
| पिष्टकुक्कुटः | લોટમાંથી બનાવેલ કૂકડો |
| पणः | પ્રતિજ્ઞા |
| पर्जन्यः | મેઘ |
| पार्थिवः | રાજા |
| पुरोधा | પુરોહિત |
| हविः | સમિધ |
| खल्वाटः | ટાલિયો |
| तुरङ्गः | ઘોડો |
| कृपाणः | તલવાર |
| प्राकारः | કિલ્લો |

## तृतीयः सर्गः

| | |
|---|---|
| ह्रीः | લજ્જા |
| स्तम्भः | થાંભલો |
| तिरोहितः | છૂપાયેલ |
| दिष्टिः | ભાગ્યયોગે |
| त्रपावती | લજ્જાળુ |
| अङ्गुलीयः | વીંટી |
| शिबिरम् | છાવણી, પડાવ |
| साधिक्षेपम् | આક્ષેપપૂર્વક |
| अवकरः | કચરો |
| जामिः | બહેન |
| मातुलः | મામા |
| लम्बमानी | લટકતી |
| रत्नकिङ्किणी | રત્નની ઘૂઘરી |
| सन्धिः | સમાધાન |
| व्यसनम् | દુઃખ |
| स्कन्धावारम् | છાવણી, પડાવ |

## चतुर्थः सर्गः

| | |
|---|---|
| श्यालः | સાળો (પત્નીનો ભાઈ) |
| नर्मोक्तिः | કટાક્ષ |
| विस्फारितमुखा | મુખ પહોળું કરેલ |
| सूदः | રસોઈયો |
| अन्तिकः | પાસે, નજીક |
| कालयापना | સમય પસાર કરવો |
| रश्मिः | દોરી, લગામ |
| न्यासीभूतः | થાપણરૂપ |
| स्नुषा | પુત્રવધૂ |
| आर्यिका | સાધ્વીજી |
| विक्रयः | માલ વેચવો |
| पल्लीः | ઝૂંપડી |
| तूलिका | રૂ |
| यात्राभेरी | યુદ્ધનો પડહ |
| शरभः | હાથીનું બચ્ચું |
| कान्दिशीकः | ડરપોક |
| वयस्यः | મિત્ર |
| सौप्तिकम् | રાત્રિ યુદ્ધ |
| चापम् | ધનુષ |
| गुणम् | દોરી |
| कार्मुकम् | ધનુષ |
| कञ्चुकी | અંતઃપુરનો અધિકારી |
| वार्धक्यम् | ઘડપણ |
| पदातिः | પાયદળ |

| | |
|---|---|
| जिगमिषुः | જવાની ઈચ્છાવાળો |
| निदेशः | આદેશ |

### पञ्चमः सर्गः

| | |
|---|---|
| कुल्यम् | નહેર |
| इक्षुवाटः | શેરડીનું ખેતર |
| मृगया | શિકાર |
| अपजिहीर्षा | અપહરણ કરવાની ઈચ્છા |
| खात्रम् | કોદાળી, પાવડો |
| उद्वसः | નિર્જન, વસતિશૂન્ય |
| सौधम् | ઘર |
| इभ्यः | શ્રેષ્ઠી |
| सूत्रम् | હાર |
| सपदि | અધુના, તુરંત |
| सन्नद्धः | તૈયાર થવું |
| पुरोभूय | આગળ આવીને |
| प्रसद्य | કૃપા કરીને |
| वरः | વરદાન, વરરાજા |
| पथिकः | મુસાફર |
| सलिलम् | પાણી |
| उद्वासितः | કાઢી મૂકવો |
| आयामः | લંબાઈ |
| समिध् | સમિધ |
| इप्सितवादिनी | ઈચ્છિત વગાડનાર |
| एकिका | એકલી |
| प्राहरिकः | દ્વારપાળ |
| गलपाशः | ગળાફાંસો |
| तस्करः | ચોર |
| ज्या | ધનુષની દોરી |
| कामिकः | ઈચ્છિત |
| द्वाःस्थः | દ્વારપાળ |
| कर्षकः | ખેડૂત |
| वातायनम् | બારી |
| कन्दरम् | ગુફા |
| गृध्रः | ગીધ |
| प्रत्ययः | વિશ્વાસ |
| शकुनिका | સમડી |
| पादपङ्क्तिः | પગલાં |
| भागिनेयः | ભાણેજ |
| उरः | છાતી |
| सानुनयः | વિનંતિપૂર્વક |

### षष्ठः सर्गः

| | |
|---|---|
| दयिता | પ્રિયા |
| त्रपाकरः | લજ્જાકારક |
| रिरंसुः | રમવાની ઈચ્છાવાળો |
| ऊर्मिका | વીંટી |
| व्यात्तमुखा | પહોળું કરેલ મુખવાળી |
| कर्परः | ઠીકરું |
| स्कन्धः | ખભો |
| चूडामणिः | મસ્તક પર રહેલ મણિ |
| किरीटः | મુગુટ |



### सप्तमः सर्गः

| | |
|---|---|
| पारिपार्श्विकः | સેવક |
| शुकरः | ભૂંડ |
| अमोघम् | નિષ્ફળ ન જનાર |
| वज्री | ઇંદ્ર |
| दोः | હાથ |
| पितृव्यः | કાકા |
| व्याजः | બહાનું, કપટ |
| नक्रः | મગરમચ્છ |
| जिघत्सुः | ખાવા ઈચ્છતો |
| देवरः | દિયર |
| गतागतम् | આવનજાવન |
| विपन्नः | મૃત્યુ પામેલ |
| वर्त्तिका | ચકલી |
| वणः | જખમ, ઘા |
| श्येनः | બાજ પક્ષી |
| आयतिः | ભવિષ્ય |
| कृतान्तः | યમરાજ |
| अक्षमाला | રુદ્રાક્ષની માળા |
| चारः | ગુપ્તચર |
| कूष्माण्डः | કોઠાનું ફળ |

### अष्टमः सर्गः

| | |
|---|---|
| पलायितः | ભાગી જવું |
| और्ध्वदेहिकम् | મરેલાની મરણ તિથિએ ખવાતું પિંડ |
| किंवदन्ती | અફવા |
| अनुस्त्रियमाणः | અનુસરાતો |
| परिचर्या | સેવા |
| अर्गला | આગળીયો |
| अनुरोधः | આગ્રહ |
| हस्तिपकः | મહાવત |
| होतुः | યજ્ઞ |
| देवकः | જુગારી |
| तूणः | બાણ રાખવાનું ભાથું |
| प्रावृट्कालः | વર્ષાકાળ |
| निसमयः | પીડા રહિત |
| दुर्विधिः | દુર્ભાગ્ય |
| राजधानीमहत्तराः | મહાજન |
| नीरङ्गीच्छन्नमुखः | ઘુંઘટ કાઢીને |

### नवमः सर्गः

| | |
|---|---|
| रभसः | ઉતાવળ |
| नीडः | માળો |
| भूभुग् | રાજા |
| गर्तः | ખાડો |
| सत्यापना | સાચું, ખરું |
| वापी | વાવ, જળાશય |
| सावर्तः | ઘુમરી સાથે |
| सोपानम् | નિસરણી |
| लोकप्रघोषः | લોક અવાજ |

### दशमः सर्गः

| | |
|---|---|
| कुरङ्गः | હરણ |
| पर्याणम् | ઘોડા ઉપર નાંખવાનું પલાણ |
| उच्छूनम् | સોજા, ફૂલી જવું |
| निकुञ्जः | લતામંડપ |
| चमूपतिः | સેનાપતિ |
| अंसः | ખભો |

| | |
|---|---|
| अश्मा | પત્થર |
| लाङ्गुलः | પૂંછડી |
| वालुका | રેતી |
| शवः | મડદું |
| करामलकवत् | હાથમાં રાખેલ આંબળાની જેમ |
| उपढौकितः | સામે રાખવું |
| जवः | ઝડપ |
| कुम्भी | નાનો ઘડો, હાંડલી |
| भ्राष्ट्रम् | તવી |
| पारदः | પારો |

## एकादशः सर्गः

| | |
|---|---|
| कारामोक्षणम् | બંદીઓને છોડી મૂકવા |
| तरङ्गः | મોજાં, લહેર |
| अभ्युत्थानम् | ઊભા થવું |
| अभिगमनम् | સામા જવું |
| यकृद् | કલેજું |
| चर्मप्रसेविका | ચામડાની ધમણ |

## द्वादशः सर्गः

| | |
|---|---|
| उत्कीर्य | કોતરીને |

• • •